THE WORKS
OF
Sri Sankaracharya
SRI
VANI VILAS
EDITION.

THE WORKS OF
SRI SANKARACHARYA
VOLUME
19
SRI VANI VILAS PRESS
SRIRANGAM

CONTENTS.

॥ विषयाः ॥

Prapanchasara

VOL. I.

॥ प्रपञ्चसारः ॥
प्रथमो भागः ॥

॥ श्रीः ॥

॥ प्रपञ्चसारविषयविवेकः ॥

*P. O

॥ श्रीचक्रम् ॥

॥ प्रपञ्चसारः ॥

अकचटतपयाद्यैः सप्तभिर्वर्णवर्गै-

र्विरचितमुखबाहापादमध्याख्यहृत्का[1] ।

सकलजगदधीशा शाश्वता विश्वयोनि-

र्वितरतु परिशुद्धिं चेतसः शारदा वः ॥ १ ॥

अथाभवन्ब्रह्महरीश्वराख्याः

पुरा प्रधानात्प्रलयावसाने ।

गुणप्रभिन्ना जगतोऽस्य सृष्टि-

स्थितिक्षयस्पष्टनिविष्टचेष्टाः ॥ २ ॥

स्वनिष्पत्तिं च कृत्यं च ते विचिन्त्य समाविदन् ।

वक्तारमजमव्यक्तमरूपं मायिनं विभुम् ॥ ३ ॥

---

1. ...हृत्कुक्षिमध्या.

मूर्त्याभासेन दुग्धाब्धौ झषशङ्खसमाकुले ।
मरुत्संघट्टनोत्कीर्णलहरीकणशीतले ॥ ४ ॥

उद्यदादित्यकिरणप्रशान्तशिशिरोदये ।
पूर्णचन्द्रकरामर्शप्रतिक्षुब्धजलाशये ॥ ५ ॥

अनन्तभोगे विमले फणायुतविराजिते ।
शयितं शार्ङ्गिणं शर्वशौरिपद्मभुवस्तदा ॥ ६ ॥

तुष्टुवुर्हृष्टमनसो विष्टरश्रवसं विभुम् ।
सूक्तिभिः स्तुतिभिः प्रीतः स्वमूर्तिं स व्यदर्शयत् ॥

नीलोत्पलदलप्रख्यां नीलकुञ्चितमूर्धजाम् ।
अष्टमीचन्द्रविभ्राजल्ललाटामायतभ्रुवम् ॥ ८ ॥

रक्तारविन्दनयनामुन्नसीमरुणाधराम् ।
मन्दस्मिताधरमुखीं लसन्मकरकुण्डलाम् ॥ ९ ॥

कम्बुग्रीवां पृथुद्व्यंसविसरद्भुजमण्डलाम्[1] ।
अनेकरत्नप्रत्युप्तवलयाङ्गदमुद्रिकाम् ॥ १० ॥

हारतारावलीराजत्पृथूरोव्योममण्डलाम् ।
कौस्तुभोद्भासितोरस्कां श्रीवत्सद्युतिदीपिताम् ॥

1. ...विलसद्भुजमण्डलाम्.

लसदौदरिकाबन्धभास्वरां संभृतोदरीम् ।
गम्भीरनाभिं विपुलजघनां पीतावाससम् ॥ १२ ॥

पृथुवृत्तोरुमापूर्णजानुमण्डलबन्धुराम् ।
वृत्तजङ्घां गूढगुल्फां प्रपदाजितकच्छपाम् ॥ १३ ॥

तनुदीर्घाङ्गुलीभास्वन्नखराजिविराजिताम् ।
चक्रस्वस्तिकशङ्खाब्जध्वजाङ्कितपदद्वयाम् ॥ १४ ॥

तां दृष्ट्वा तरलात्मानो विध्यधोक्षजशंकराः ।
अतिष्ठन्नितिकर्तव्यमूढास्तत्राब्रवीदजः ॥ १५ ॥

स्वामिन्प्रसीद विश्वेश के वयं केन भाविताः ।
किंमूलाः किंक्रियाः सर्वमस्मभ्यं वक्तुमर्हसि ॥

इति पृष्टः परं ज्योतिरुवाच प्रमिताक्षरम् ।
यूयमक्षरसंभूताः सृष्टिस्थित्यन्तहेतवः ॥ १७ ॥

तैरेव विकृतिं यातास्तेषु वो जायते लयः ।
इति तस्य वचः श्रुत्वा तमपृच्छत्सरोजभूः ॥ १८ ॥

अक्षरं नाम किं नाथ कुतो जातं किमात्मकम् ।
इति पृष्टो हरिस्तेन सरोजोदरयोनिना ॥ १९ ॥

मूलार्णमर्णविकृतीर्विकृतेर्विकृतीरपि[1] ।
तत्प्रभिन्नानि मन्त्राणि प्रयोगांश्च पृथग्विधान् ॥ २० ॥

वैदिकांस्तान्त्रिकांश्चैव सर्वानित्थमुवाच ह ।
प्रकृतिः पुरुषश्चेति नित्यौ कालश्च सत्तम ॥ २१ ॥

अणोरणीयसी स्थूलात्स्थूला व्याप्तचराचरा[2] ।
आदित्येन्द्वादितेजोमद्यद्यत्तत्तन्मयी विभुः ॥ २२ ॥

न श्वेतरक्तपीतादिवर्णैर्निर्धार्य सोच्यते ।
न गुणेषु न भूतेषु विशेषेण व्यवस्थिता ॥ २३ ॥

अन्तरान्तर्बहिश्चैव देहिनां देहपूरणी ।
स्वसंवेद्यस्वरूपा सा दृश्या देशिकदर्शितैः ॥ २४ ॥

यथाकाशस्तमो वापि लब्धा या नोपलभ्यते ।
पुंनपुंसकयोस्तुल्याप्यङ्गनासु विशिष्यते ॥ २५ ॥

प्रधानमिति यामाहुर्या शक्तिरिति कथ्यते ।
या युष्मानपि मां नित्यमवष्टभ्यातिवर्तते ॥ २६ ॥

साहं यूयं तथैवान्यद्यद्वेद्यं तत्तु सा स्मृता ।
प्रलये व्याप्यते तस्यां चराचरमिदं जगत् ॥ २७ ॥

---

1. ...विकृतिविकृतिं विकृतेरपि; 2. ...स्थूलव्याप्त...

सैवं स्वां वेत्ति परमा तस्या नान्योऽस्ति वेदिता ।
सा तु कालात्मना सम्यग्ज्ञयैव ज्ञायते सदा ॥ २८ ॥

लवादिप्रलयान्तोऽयं कालः प्रस्तूयते ह्यज ।
नलिनीपत्रसंहत्यां सूक्ष्मसूच्यभिवेधने ॥॥ २९ ॥

दले दले तु यः कालः स कालो लववाचकः ।
लवैस्त्रुटिः स्यात्त्रिंशद्भिः कलां तावत्त्रुटिं विदुः ॥ ३० ॥

काष्ठा तावत्कला ज्ञेया तावत्काष्ठो निमेषकः ।
सोऽङ्गुलिस्फोटतुल्यश्च मात्राष्टाभिस्तु तैः स्मृता ॥

कालेन यावता स्वीयो हस्तः स्वं जानुमण्डलम् ।
पर्येति मात्रा सा तुल्या स्वयैकश्वासमात्रया ॥ ३२ ॥

षष्ट्युत्तरैस्तु त्रिशतैर्निश्वासैर्नाडिका स्मृता ।
द्विनाडिका मुहूर्तः स्यात्त्रिंशद्भिस्तैरहर्निशम् ॥ ३३ ॥

त्रिंशद्भिरप्यहोरात्रैर्मासो द्वादशभिस्तु तैः ।
संवत्सरो मानुषोऽयमहोरात्रं दिवौकसाम् ॥ ३४ ॥

तथा दिव्यैरहोरात्रैस्त्रिशतैः षाष्टिसंयुतैः ।
दिव्यः संवत्सरो ज्ञेयो दिव्यैः संवत्सरैस्तु तैः ॥

भवेद्द्वादशसाहस्रैर्भिन्नैरेकं चतुर्युगम् ।
तैः सहस्रैः शतानन्द तवैकं दिनमिष्यते ॥ ३६ ॥

तावती तव रात्रिश्च कथिता कालवेदिभिः ।
तथाविधैरहोरात्रैस्त्रिंशद्भिर्मासमृच्छति ॥ ३७ ॥

तथाविधैर्द्वादशभिर्मासैरब्दस्तव स्मृतः ।
तथाविधानामब्दानां शतं त्वमपि जीवसि ॥ ३८ ॥

तवायुर्मम निश्वासः कालेनैवं प्रचोद्यते ।
स जानाति विपाकांश्च तस्यां सम्यग्व्यवस्थितान् ॥

सोऽन्वीक्ष्य त्वादृशामायुः परिपाकं प्रदास्यति ।
प्रकृतेश्च क्वचित्कालो विकृतिं प्रतिपादयेत् ॥ ४० ॥

सा तत्त्वसंज्ञा चिन्मात्रज्योतिषः संनिधेस्तथा[1] ।
विचिकीर्षुर्घनीभूत्वा क्वचिदभ्येति बिन्दुताम् ॥ ४१ ॥

कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा ।
स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते ॥ ४२ ॥

स बिन्दुनादबीजत्वभेदेन च निगद्यते ।
बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मको भवेत् ॥ ४३ ॥

---

1. संनिधेस्तदा.

स एवः श्रुतिसंपन्नैः शब्दब्रह्मेति कथ्यते ।
तद्विस्तारप्रकारोऽयं यथा वक्ष्यामि सांप्रतम् ॥ ४४ ॥

अव्यक्तादन्तरुदितविभेदगहनात्मकम्[1] ।
महन्नाम भवेत्तत्त्वं महतोऽहंकृतिस्तथा ॥ ४५ ॥

भूतादिकवैकारिकतैजसभेदक्रमादहंकारात् ।
कालप्रेरितया गुणघोषयुजा शब्दसृष्टिरथ शक्त्या ॥

शब्दाद्व्योम स्पर्शतस्तेन वायु-
स्ताभ्यां रूपाद्वह्निरेतै रसाच्च ।
[2]आपस्त्वेभिर्गन्धतोऽभूद्धराद्या
भूताः पञ्च स्युर्गुणानां[3] क्रमेण ॥ ४७ ॥

खमपि सुषिरचिह्नमीरणः स्या-
च्चलनपरः परिपाकवान्कृशानुः ।
जलमपि रसवद्धना धरा ते
सितशितिपाटलशुभ्रपीतभासः ॥ ४८ ॥

वृत्तं व्योम्नो बिन्दुषट्काञ्चितं
तद्वायोरग्नेः स्वस्तिकोद्यत्त्रिकोणम् ।

---

1. ...त्रिभेदगहनात्मकम्; 2. अम्भांस्येभिर्गन्धतो;
3. स्युर्गुणोनाः.

अब्जोपेतार्धेन्दुमाद्बिम्बमाप्यं
स्याद्यज्ञोद्यच्चातुरश्रं धरायाः ॥ ४९ ॥

निवृत्तिसंज्ञा च तथा प्रतिष्ठा
विद्याह्वया शान्तिसशान्त्यतीते ।
स्युः शक्तयः पञ्च धरादिभूत-
प्रोत्थाः क्रमान्नादकलादिभूताः ॥ ५० ॥

पुटयोरुभयोश्च दण्डसंस्था
पृथिवी तोयमधः कृशानुरूर्ध्वम् ।
पवनस्त्वथ पार्श्वगोऽपि मध्ये
गगनं भूतगतिस्तनूद्भवेयम् ॥ ५१ ॥

व्योम्नि मरुदत्र दहनस्तत्रापस्तासु संस्थिता पृथिवी ।
सचराचरात्मकानि च तस्यां जातानि सर्वभूतानि ॥

श्रोत्रत्वगक्षिजिह्वाघ्राणान्यपि चेन्द्रियाणि बुद्धेः स्युः ।
वाक्पाणिपादपायूपस्थानि च कर्मसंज्ञानि तथा ॥ ५३ ॥

वचनादाने सगती सविसर्गानन्दकौ च संप्रोक्ताः ।
वागाद्यर्थाः समना बुद्धिरहंकाराश्चित्तमपि करणम् ॥

भूतेन्द्रियेन्द्रियार्थैरुद्दिष्टस्तत्त्वपञ्चविंशतिकः ।
व्यानन्दकैश्च तैरपि तत्त्वचतुर्विंशतिस्तथा प्रोक्ताः ॥ ५५ ॥

करणोपेतैरेतैस्तत्त्वान्युक्तानि रहितवचनाद्यैः ।
भूतानीन्द्रियदशकं समनः प्रोक्तो विकारषोडशकः ॥

अव्यक्तमहदहंकृतिभूतानि प्रकृतयः स्युरष्टौ च ।
तन्मात्राहंकाराः समहान्तः प्रकृतिविकृतयः सप्त ॥ ५७ ॥

सत्त्वं रजस्तम इति संप्रोक्ताश्च त्रयोगुणास्तस्याः ।
तत्संबन्धाद्विकृतैर्भेदत्रितयैस्ततं जगत्सकलम् ॥ ५८ ॥

देवाः सश्रुतयः स्वराः समरुतो लोकाश्च वैश्वानराः
कालाः शक्तियुतास्त्रिवर्गसहितास्तिस्रस्तथा वृत्तयः ।
नाड्योऽन्यच्च जगत्त्रयेऽत्र नियतं यद्वस्तु संबध्यते
विश्वेषां स्थितये चरन्त्यविरतं सूर्येन्दुवैश्वानराः ॥५९॥

एष सर्गः समुत्पन्न इत्थं विश्वं प्रतीयते ।
विश्वप्रतीतौ हि यतः प्रपञ्चस्त्ववगम्यते ॥ ६० ॥

शब्दब्रह्मेति यत्प्रोक्तं तदुद्देशः प्रवर्त्यते ।
अतः परमवाच्यं हि स्वसंवेद्यस्वरूपतः ॥ ६१ ॥

शब्दब्रह्मेति शब्दावगम्यमर्थं विदुर्बुधाः ।
स्वतोऽर्थानवबोधत्वात्प्रोक्तो नैतादृशो रवः ॥ ६२ ॥

स तु सर्वत्र संस्यूतो जाते भूताकरे पुनः ।
आविर्भवति देहेषु प्राणिनामर्थविस्मृतः ॥ ६३ ॥

प्रकृतौ कालनुन्नायां गुणान्तःकरणात्मनि ।
देहश्चतुर्विधो ज्ञेयो जन्तोरुत्पत्तिभेदतः ॥ ६४ ॥

औद्भिदः स्वेदजोऽण्डोत्थश्चतुर्थस्तु जरायुजः ।
उद्भिद्य भूमिमुद्गच्छत्यौद्भिदः स्थावरस्तु सः ॥ ६५ ॥

निर्दिष्टस्कन्धविटपपत्रपुष्पफलादिभिः ।
पञ्चभूतात्मकः सर्वः क्ष्मामाधिष्ठाय जायते ॥ ६६ ॥

अम्बुयोन्यग्निपवननभसां समवायतः ।
स्वेदजः स्विद्यमानेभ्यो भूवह्न्यद्भ्यः प्रजायते ॥ ६७ ॥

यूकमत्कुणकीटाणुस्त्रुट्याद्याः क्षणभङ्गुराः ।
अण्डजो वर्तुलीभूताच्छुक्लशोणितसंपुटात् ॥ ६८ ॥

कालेन भिन्नात्पूर्णात्मा निर्गच्छन्प्रक्रमिष्यति ।
अहिगोधावयोभेदशिंशुमारादिकश्च सः[1] ॥ ६९ ॥

---

1. अहिगोधावयोभेदाः शिंशुमारादिकच्छपाः.

जरायुजस्तु ग्राम्यातः क्रियातः स्त्र्यतिसंभवः ।
स जायते चतुर्विंशत्तत्त्वसंयुक्तदेहवान् ॥ ७० ॥

स्वस्थानतश्च्युताच्छुक्राद्बिन्दुमादाय मारुतः ।
गर्भाशयं प्रविशति यदा तुल्यं तदापरः ॥ ७१ ॥

आर्तवात्परमं बीजमादायास्याश्च मूलतः ।
यदा गर्भाशयं नेष्यत्यथ संमिश्रयेन्मरुत् ॥ ७२ ॥

मायीयं नाम योषोत्थं पौरुषं कार्मणं मलम् ।
आणवं नाम संपृक्तं मिलितं तन्मलद्वयम् ॥ ७३ ॥

सूक्ष्मरूपाणि तत्त्वानि चतुर्विंशन्मलद्वये ।
तत्र युक्तिं नयत्याशु ततस्तद्गर्भमारुतः ॥ ७४ ॥

संक्षोभ्य संवर्धयति तन्मलं शोणिताधिकम् ।
स्त्री स्याच्छुक्राधिकं ना स्यात्समभागं[1] नपुंसकम् ॥ ७५ ॥

स्वगाभिर्मरुदग्न्याद्भिः क्लेद्यते काथ्यते च तत् ।
सान्द्रीभूतं तदह्नैव मातुरङ्गुष्ठसंमितम् ॥ ७६ ॥

आयामि बुद्बुदाकारं परेऽहनि विजृम्भते ।
पक्षेण चतुरश्रं स्यान्मातुर्भुक्तरसात्मवत् ॥ ७७ ॥

---

1. समबन्धं

मिलितादपि तस्मात्तु पृथगेव मलद्वयात् ।
किट्टभूतद्वयं पूर्वं बीजयुग्मं समुन्नमेत् ॥ ७८ ॥

ऊर्ध्वं तु मरुता नुन्नं तस्मादपि फलद्वयात् ।
उभयात्मिकयधोवृत्ता नाडी दीर्घा भवेदृजुः ॥ ७९ ॥

अवाङ्मुखी सा तस्याश्च भवेत्पक्षद्वये द्वयम् ।
नाड्योस्तत्संधिबन्धाः स्युः सप्तान्या नाड्यो मताः ॥

ततो या प्रथमा नाडी सा सुषुम्नेति कथ्यते ।
या वामेडेति सा ज्ञेया दक्षिणा पिङ्गला स्मृता ॥ ८१ ॥

या वाममुष्कसंबन्धा सा श्लिष्यन्ती सुषुम्नया ।
दक्षिणवृक्कमाश्रित्य धनुर्वक्रा हृदि स्थिता ॥ ८२ ॥

वामांसजत्र्वन्तरगा दक्षिणां नाडिकामियात् ।
तथा दक्षिणमुष्कोत्था नाडी या वामरन्ध्रगा ॥ ८३ ॥

अन्या धमन्यो याः प्रोक्ता गान्धारीहस्तिजिह्विका ।
सपूषालंबुषा चैव यशस्विन्यपि शङ्खिनी ॥ ८४ ॥

कुहूरिति च विद्वद्भिः प्रधाना व्यापिकास्तनौ ।
काचिन्नाडी बहिर्वक्त्रा या मातुर्हृदि बध्यते ॥ ८५ ॥

यथा तत्पुष्टिमाप्नोति केदार इव कुल्यया ।
मातुराहाररसजैर्धातुभिः पुष्यते क्रमात् ॥ ८६ ॥

क्रमवृद्धौ परंज्योतिष्कला क्षेत्रज्ञतामियात् ।
सक्षेत्रज्ञं मलं तत्तु सभूतं सगुणं पुनः ॥ ८७ ॥

सदोषं दूष्यसंपन्नं जन्तुरित्यभिधीयते ।
फलकोशद्वयं तत्तु व्यक्तं पुंसो न तु स्त्रियः ॥ ८८ ॥

नपुंसकस्य किंचित्तु व्यक्तिरत्रोपलक्ष्यते ।
मध्यस्थायाः सुषुम्नायाः पर्वपञ्चकसंभवाः ॥ ८९ ॥

शाखोपशाखतां प्राप्ताः सिरालक्षत्रयात्परम् ।
अर्धलक्षमिति प्राहुः शरीरार्थविशारदाः ॥ ९० ॥

तद्भेदांश्च बहूनाहुस्ताभिः सर्वाभिरेव च ।
व्याप्नोति सर्वतो वायुर्येन देहः प्रवर्त्यते[1] ॥ ९१ ॥

देहेऽपि मूलाधारे तु समुदेति समीरणः ।
नाडीभ्यामस्तमभ्येति घ्राणतो द्विषडङ्गुले ॥ ९२ ॥

अहोरात्रमिनेन्दुभ्यामूर्ध्वाधोवृत्तिरुच्यते ।
वामदक्षिणनाडीभ्यां स्यादुदग्दक्षिणायनम् ॥ ९३ ॥

---

1. भेदः प्रवर्तते.

अत्रापि चेतनायातोरागतिं बहुधा विदुः ।
रेतःशोणितजं प्राहुरेकेऽन्ये मातुराहृतात् ॥ ९४ ॥

आहाराद्रसजं प्राहुः केचित्कर्मफलं विदुः ।
कश्चिदस्य परं धाम्नो व्याप्तिमेव विवक्षति ॥ ९५ ॥

कश्चित्कर्मप्रकारज्ञः पितुर्देहात्मनासकृत् ।
[1]संबध्य मथनोद्रेकविधिना शुक्लधातुतः ॥ ९६ ॥

तत्परंधाम सौजस्कं संक्रान्तं मारुतेन तु ।
ब्रूते रक्तव्यतिकृताद्दीपाद्दीपान्तरं यथा ॥ ९७ ॥

कश्चित्तु भौतिकव्याप्ते जन्मकाले वपुष्यथ ।
कुतश्चिदेत्य जीवात्मा निष्पन्न इति शंसति ॥ ९८ ॥

बहुना किं पुनः[2] पुंसः सांनिध्यात्प्रविजृंभिता ।
प्रकृतिर्गुणसंभिन्ना त्रिदोषात्मा[1] महीयसी ॥ ९९ ॥

पञ्चभूतमयी सप्तधातुभिन्ना च भौतिकैः ।
पञ्चभिश्च गुणैर्युक्ता पञ्चेन्द्रियविचारिणी ॥ १०० ॥

पञ्चेन्द्रियार्थगा भूयः पञ्चबुद्धिप्रभाविनी ।
पञ्चकर्मेन्द्रियगता पञ्चत्वादा प्रवर्तते ॥ १०१ ॥

---

1. त्रिसंध्यमथनोद्रेकविलीनाः; 2. परं. 3. त्रिदोषा सा.

परेण धाम्ना समनुप्रबद्धा
मनस्तदा सा तु महाप्रभावा ।
यदा तु संकल्पविकल्पकृत्या
यदा पुनर्निश्चिनुते तदा सा ॥ १०२ ॥

स्याद्बुद्धिसंज्ञा च यदा प्रवेत्ति
ज्ञातारमात्मानमहंकृतिः स्यात् ।
तदा यदा सा त्वभिलीयतेऽन्त-
श्चित्तं च निर्धारितमर्थमेषा ॥ १०३ ॥

यदा स्वयं व्यञ्जयितुं यतेत
महीयसी सा करणैः क्रमेण ।
तदा तु बिन्दुस्फुटनोद्भवस्य
रवस्य सम्यक्प्रविजृम्भितं स्यात् ॥ १०४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे प्रथमः पटलः ॥

द्वितीयः पटलः ॥

अथ व्यवस्थिते त्वेवं मासात्पक्षाद्दिनादपि ।
मुहूर्तान्नाडिकायाश्च क्षणादपि च वर्धते ॥ १ ॥

जन्तुः षडङ्गी पूर्वं स्याच्छिरः पादौ करावपि ।
अन्तराधिश्चेति पुनः षडङ्गेषु प्रवर्तते ॥ २ ॥

अक्षिनासास्यकर्णभ्रूकपोलचिबुकादिकम् ।
प्रकोष्ठकोर्परांसाद्यं कट्यूरूप्रपदादिकम ॥ ३ ॥

उरः कुक्षिस्तनाद्यं च ततः सर्वाङ्गवान्विभुः ।
कालेन जन्तुर्भवति दोषास्त्वनुगुणा यदि ॥ ४ ॥

प्रसूतिसमये सोऽथ जनित्रीं क्लेशयन्मुहुः ।
संवृतास्यसुषुम्नाख्योऽवाङ्मुखोऽनिलचोदितः ॥ ५ ॥

तस्यां ग्रहिण्यां शकृतिमग्नवक्त्राक्षिनासिकः ।
पुराकृतानां पापानामयुतं संस्मरन्मुहुः ॥ ६ ॥

तस्याः कायाग्निना दग्धः क्लेदैः क्लिन्नाङ्गबन्धनः ।
प्रत्युद्वारपरीतश्च तत्पायुद्वारगोचरः ॥ ७ ॥

तदा प्रक्षुभितैः स्वीयवायुभिर्दशतां[1] गतैः ।
संपिण्डितशरीरस्तु मोक्षमेव किलेच्छति ॥ ८ ॥

प्राणाद्या वायवस्तत्र पूर्वमेव कृतास्पदाः ।
परस्परमपानश्च प्राणश्च प्रतिबध्यते[2] ॥ ९ ॥

प्रयात्यूर्ध्वं यदा प्राणस्तदापानोऽप्यधस्तथा ।
यदा समानः कायाग्निं संधुक्षयति पाचितुम् ॥ १० ॥

तदा तत्पाकमुक्तं तु रसमादाय धावति ।
व्यानो जन्तोस्तु तद्देहमापादतलमस्तकम् ॥ ११ ॥

उदानः प्राणसहितो निमेषोन्मेषकारकः ।
उद्गारकारको नाग उन्मीलयति कूर्मकः ॥ १२ ॥

क्षुतकृत्कृकलो देवदत्तो जृम्भणकर्मकृत् ।
धनंजयाख्यो देहेऽस्मिन्कुर्याद्बहुविधान्रवान् ॥ १३ ॥

स तु लौकिकवायुत्वान्मृतं च न विमुञ्चति ।
इत्यमी मारुताः प्रोक्ता दश देहाधिगामिनः ॥ १४ ॥

वह्नयश्च दशान्ये स्युस्तेषां सप्त तु धातुगाः ।
त्रयस्त्रिदोषगाः प्रोक्ताः स्वेदक्लेदान्त्रगाश्च ते ॥ १५ ॥

---

1. दशधागतैः; 2 प्रतिबाध्यते.

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रानि धातवः ।
ते दूष्याः कफपित्तेरा दोषास्तत्प्रेरको मरुत् ॥ १६ ॥

समवायी स विश्वात्मा विश्वगो विश्वकर्मकृत् ।
[1]स दोषो वा स वा दूष्यः क्रियातः संप्रधार्यते ॥ १७ ॥

बुभुक्षा च पिपासा च शोकमोहौ जरामृती ।
षडूर्मयः प्राणबुद्धिदेहधर्मे व्यवस्थिताः[2] ॥ १८ ॥

मज्जास्थिस्नायवः शुक्राद्रक्तात्त्वङ्मांसशोणिताः ।
इति षाट्कौशिकं नाम देहे भवति देहिनाम् ॥ १९ ॥

रसादितः क्रमात्पाकः शुक्रान्तेषु तु धातुषु ।
शुक्रपाकात्स्वयं भिद्येदोजो नामाष्टमी दशा ॥ २० ॥

क्षेत्रज्ञस्य तदोजस्तु केवलाश्रयमिष्यते ।
यथा स्नेहः प्रदीपस्य यथाभ्रमशनित्विषः ॥ २१ ॥

बहुद्वारेण कुम्भेन संवृतस्य हविर्भुजः ।
यथा तेजः प्रसरति समीपालोकशक्तिमत् ॥ २२ ॥

तथा देहावृतस्यापि क्षेत्रज्ञस्य महात्विषः ।
इन्द्रियैः संप्रवर्तन्ते स्वं स्वमर्थग्रहं प्रति ॥ २३ ॥

---

1. स दोषोऽथवा दूष्यः; 2. देहधर्मेष्वस्थिताः.

नभः श्रोत्रेऽनिलश्चर्मण्यग्निश्चक्षुष्यथो रसः ।
जिह्वायामवनिर्घ्राण इत्थमर्थप्रवर्तनम् ॥ २४ ॥

यदा पित्तं मरुन्नुन्नं विलीनं प्रविलापयेत्[1] ।
धातूंस्तदा क्रमाद्रक्तं लसीकां द्रावयेत्क्षणात् ॥ २५ ॥

[2]द्रुता सा तु लसीकाह्वा रोमकूपैः प्रवर्तते ।
बहिः सर्वत्र कणशस्तदा स्वेदः प्रतीयते ॥ २६ ॥

यदा कफो मरुत्पित्तं नुन्नोमीन(?) प्रवर्तते ।
[3]ऊर्ध्वीभूतं दृढो बाष्पं प्रसेकं च प्रवर्तयेत् ॥ २७ ॥

कफात्मिकास्तु विकृतीः कर्णशष्कुलिपूर्विकाः ।
गण्डमालादिका वापि कुर्याज्जन्तोस्तु कर्मजाः ॥ २८ ॥

ग्रहणी नाम सा पात्री प्रसृताञ्जलिसंनिभा ।
अधस्तस्याः प्रधानाग्निः स समानेन नुद्यते ॥ २९ ॥

तस्याधस्तात्रिकोणाभं ज्योतिराधारमुत्तमम् ।
विद्यते स्थानमेतद्धि मूलाधारं विदुर्बुधाः ॥ ३० ॥

अथाहृतं षड्रसं वाप्याहारं कण्ठमार्गगम् ।
श्लेष्मणानुगतं तस्य प्रभावान्मधुरीभवेत् ॥ ३१ ॥

---

1. प्रविचालयेत्; 2. एका सा तु लसीकाह्वाद्रोमकूपैः;
3. ऊर्ध्वभूतान्तको बाष्पं.

तत्र स्वाद्वम्ललवणतिक्तोषणकषायकाः ।
षड्रसाः कथिता भूतविकृत्या द्रव्यमाश्रिताः ॥ ३२ ॥

तथैवामाशयगतं पश्चात्पित्ताशयं व्रजेत् ।
तदा तस्यानुगमनात्कटुकत्वं प्रपद्यते ॥ ३३ ॥

तत्रान्त्रान्तरसंश्लिष्टं पच्यते पित्तवारिणा ।
पच्यमानाद्रसं भिन्नं वायू रक्तादिकां नयेत् ॥ ३४ ॥

तत्र किट्टं पृथग्भिन्नं ग्रहण्यां चिनुतेऽनिलः ।
तच्चीयमानं विण्णाम ग्रहणीं पूरयेन्मुहुः ॥ ३५ ॥

सा तेन शकृता पूर्णा वलिता प्रतिमुञ्चति ।
पुरीषं पायुमार्गेण तत्पाकेऽच्छांभसा ततः[1] ॥ ३६ ॥

अङ्गं स्वेदवदभ्यन्तर्व्याप्तैः सूक्ष्मैः सिरामुखैः ।
वस्तिमापूरयेद्वायुः पूर्णे मुञ्चति धारया ॥ ३७ ॥

मूत्राशयो धनुर्वक्रो वस्तिरित्यभिधीयते ।
मूत्रमित्याहुरुदकं वस्तेर्मेहननिर्गतम् ॥ ३८ ॥

अपथ्यभाजामनयोर्मार्गयोर्दोषदुष्टयोः ।
प्रमेहमूत्रकृच्छ्रादेर्ग्रहण्यादेश्च संभवः ॥ ३९ ॥

1. अच्छांभसस्ततः.

इत्थंभूतः स जन्तुस्तु जरायुच्छन्नगात्रवान् ।
अपत्यवर्त्म संगम्य सज्यते वायुना मुहुः ॥ ४० ॥

जायतेऽधिकसंविग्नो जृम्भतेऽङ्गैः प्रकम्पितैः ।
मूर्त्योद्गूर्णं न श्वसिति भीत्या च परिरोदिति ॥ ४१ ॥

अथ पापकृतां शरीरभाजा-
मुदरान्निष्क्रमितुं महान्प्रयासः ।
नलिनोद्भवधीविचित्रवृत्ता
नितरां कर्मगतिस्तु मानुषाणाम् ॥ ४२ ॥

जायते पुनरसौ निजाङ्गकै-
र्जृम्भते जनितभीति कम्पते ।
उल्बणं श्वसिति रोदिति ज्वरा-
त्प्रागनेकशतदुःखभावितः ॥ ४३ ॥

मूलाधारात्प्रथममुदितो यस्तु भावः पराख्यः
पश्चात्पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना
बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः ॥ ४४ ॥

स्रोतोमार्गस्याविभक्तत्वहेतो-
स्तत्रार्णानां जायते न प्रकाशः ।
तावद्यावत्कण्ठमूर्धादिभेदो
वर्णव्यक्तिस्थानसंस्था यतोऽतः ॥ ४५ ॥

ज्ञातास्मीति यदा भावो मनोऽहंकारबुद्धिमान् ।
जातश्चित्पूर्वको जन्तोः स भावः क्रमवर्धितः ॥ ४६ ॥

बध्नाति मातापित्रोस्तु पूर्वं बन्धुषु च क्रमात् ।
स पीत्वा बहुशः स्तन्यं मातरं स्तन्यदायिनीम् ॥ ४७ ॥

इच्छन्नोदिति तां वीक्ष्य तत्र स्यादितरेतरम् ।
बन्धस्तत्राधिकर्तारमतिस्निग्धमनन्यगम् ॥ ४८ ॥

पितरं वीक्ष्य तत्रापि तथा भ्रातरमेव च ।
पितृव्यमातुलादींश्च समुद्वीक्ष्य प्रमोदते ॥ ४९ ॥

एवं [1]संबन्धसंसारबान्धवो विस्मरिष्यति ।
पूर्वकर्म च गर्भस्थित्युद्भूतक्लेशमेव च ॥ ५० ॥

अथ स्वमुत्तारयितुमाह्वयेज्जननीं मुहुः ।
अवैशद्यान्मुखस्रोतोमार्गस्याविशदाक्षरम् ॥ ५१ ॥

1. संबन्धिसंसारबान्धवो.

अप्यव्यक्तं प्रलपति यदा कुण्डलिनी तदा ।
मूलाधाराद्विसरति सुषुम्ना वेष्टनी मुहुः ॥ ५२ ॥

त्रिचतुःपञ्चषट्सप्ताष्टमो दशम एव च ।
तथा द्वादशपञ्चाशद्भेदेन गुणयेत्क्रमात् ॥ ५३ ॥

यदा त्रिंशोऽथ गुणयेत्तदा [1]त्रिगुणिता विभुः ।
शक्तिः कामाग्निनादात्मा गूढमूर्तिः प्रतीयते ॥ ५४ ॥

तदा तां तारमित्याहुरोमात्मेति बहुश्रुताः ।
तामेव शक्तिं ब्रुवते हरेरात्मेति चापरे ॥ ५५ ॥

त्रिगुणा सा त्रिदोषा सा त्रिवर्णा सा त्रयी च सा ।
त्रिलोका सा त्रिमूर्तिः सा त्रिरेखा सा विशिष्यते ॥ ५६ ॥

एतेषां तारणात्तारः शक्तिस्तद्भूतशक्तितः ।
यदा चतुर्धा गुणिता सूक्ष्मादिस्थानवाचिका ॥ ५७ ॥

वाचिका जाग्रदादीनां करणानां च सा तदा ।
यदा सा पञ्चगुणिता पञ्चपञ्चविभेदिनी ॥ ५८ ॥

पञ्चानामक्षराणां च वर्णानां मरुतां तथा ।
गुणिता सा यदा षोढा कोशोर्मिरसभेदिनी ॥ ५९ ॥

---

1. द्विगुणिता.

तदा षड्गुणिताख्यस्य यन्त्रस्य च विभेदिनी ।
यदा सा सप्तगुणिता तारहृल्लेखयोस्तदा ॥ ६० ॥

भेदैरहाद्यैः शान्तान्तैर्भिद्यते सप्तभिः पृथक् ।
अकारश्चाप्युकारश्च मकारो बिन्दुरेव च ॥ ६१ ॥

नादः शक्तिश्च शान्तश्च तारभेदाः समीरिताः ।
हकाररेफमायाश्च बिन्दुनादौ तथैव च ॥ ६२ ॥

शक्तिशान्तौ च संप्रोक्ताः शक्तेर्भेदाश्च सप्तधा ।
अङ्गेभ्योऽस्यास्तु सप्तभ्यः सप्तधा भिद्यते जगत् ॥ ६३ ॥

लोकाद्रिद्वीपपातालसिन्धुग्रहमुनिस्वरैः ।
धात्वादिभिस्तथान्यैश्च सप्तसंख्याप्रभेदकैः ॥ ६४ ॥

यदाष्टधा सा गुणिता तदा प्रकृतिभेदिनी ।
अष्टाक्षरा हि वस्वाशा मातृका मूर्तिभेदिनी ॥ ६५ ॥

दशधा गुणिता नाडी मर्मांशादिविभेदिनी ।
द्वादशात्मिक्यपि यदा तदा राश्यर्कमूर्तियुक् ॥ ६६ ॥

मन्त्रं च द्वादशार्णाख्यमभिधत्ते स्वरानपि ।
तत्संख्यं च तदा यन्त्रं शक्तेस्तद्गुणितात्मकम् ॥ ६७ ॥

पञ्चाशदंशगुणिताथ यदा भवेत्सा
देवी तदात्मविनिवेशितदिव्यभावा ।
सौषुम्नवर्त्मसुषिरोदितनादसंगा-
त्पञ्चाशदीरयति पङ्क्तिश एव वर्णान् ॥ ६८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे द्वितीयः पटलः ॥

तृतीयः पटलः ॥

अथोभयात्मका वर्णाः स्युरग्नीषोमात्मभेदतः ।
त एव स्युस्त्रिधा भूयः सोमेनाग्निविभागशः ॥ १ ॥

स्वराख्याः षोडश प्रोक्ताः स्पर्शाह्वाः पञ्चविंशतिः ।
व्यापकाश्च दशैते स्युः सोमेनाग्न्यात्मकाः क्रमात् ॥ २ ॥

एषु स्वरा ह्रस्वदीर्घभेदेन द्विविधा मताः ।
पूर्वो ह्रस्वः परो दीर्घो बिन्दुसर्गान्तिकौ च तौ ॥ ३ ॥

आद्यन्तस्वरषट्कस्य मध्यगं यच्चतुष्टयम् ।
वर्णानामागमधनैस्तन्नपुंसकमीरितम् ॥ ४ ॥

तच्चतुष्कं सुषुम्नास्थे कुर्यात्प्राणेऽयनस्थितिम् ।
दक्षोत्तरस्थे प्राणाख्ये स्यातां दक्षोत्तरायणे ॥ ५ ॥

दक्षः सव्यस्थिते ह्रस्वदीर्घाः पञ्चोदयन्ति च ।
भूतभूतकलाभिस्तदुदयः प्रागुदीरितः ॥ ६ ॥

बिन्दुसर्गौ तु यौ प्रोक्तौ तौ सूर्यशशिनौ क्रमात् ।
तयोर्विकारविस्तारः परस्तात्संप्रवक्ष्यते ॥ ७ ॥

स्पर्शाख्या अपि ये वर्णाः पञ्चपञ्चविभेदतः ।
भवन्ति पञ्चवर्गास्तदन्त्य आत्मा रविः स्मृतः ॥ ८ ॥

चतुर्विंशतितत्त्वस्थास्तस्माद्वर्णाः परे क्रमात् ।
तेन स्पर्शाह्वयाः सौराः प्राणाग्नीळाम्बुखात्मकाः ॥ ९ ॥

व्यापकाश्च द्विवर्गाः स्युस्तथा पञ्चविभेदतः ।
शशीनाग्न्युत्थिता यस्मात्स्वरस्पृग्व्यापकाक्षराः ॥ १० ॥

तात्रिभेदसमुद्भूता अष्टत्रिंशत्कलाः स्मृताः ।
स्वरैः सौम्याः स्पर्शयुग्मैः सौरा याद्यैश्च वह्निजाः ॥ ११ ॥

षोडशद्वादशदशसंख्याः स्युः क्रमशः कलाः ।
वर्णेभ्य एव तारस्य पञ्चभेदैस्तु भूतगैः ॥ १२ ॥

सर्वगाश्च समुत्पन्नाः पञ्चाशत्संख्यकाः कलाः[1] ।
ताभ्य एव तु तावत्यः शक्तिभिर्विष्णुमूर्तयः ॥ १३ ॥

तावत्यो मातृभिः सार्धं तेभ्यः स्यू रुद्रमूर्तयः ।
तेभ्य एव तु पञ्चाशत्स्युरोषधय ईरिताः ॥ १४ ॥

याभिस्तु मन्त्रिणः सिद्धिं प्राप्नुयुर्वाञ्छितार्थदाम् ।
अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ॥ १५ ॥

---

1. पञ्चाशद्वर्णसंख्यकाः.

शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गना[1] ।
पूर्णापूर्णामृताकामदायिन्यः सस्वराः कलाः ॥ १६ ॥

तपिनी तापिनी धूम्रा मरीची ज्वालिनी रुचिः ।
सुषुम्नाभोगदाविश्वाबोधिनीधारिणीक्षमाः ॥ १७ ॥

[2]कामाद्या वसुदाः सौराः षडान्ता द्वादशेरिताः ।
धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विष्फुलिङ्गिनी ॥ १८ ॥

सुश्रीः सुरूपा कपिला[3] हव्यकव्यवहे अपि ।
याद्यर्णयुक्ता वह्नेस्तथा दश धर्मप्रदाः कलाः ॥ १९ ॥

सृष्टि ऋद्धिः स्मृतिर्मेधा कान्तिर्लक्ष्मीर्द्युतिः स्थिरा ।
स्थितिः सिद्धिरकारोत्थाः कला दश समीरिताः ॥ २० ॥

अकारप्रभवा ब्रह्मजाताः स्युः सृष्टये कलाः ।
जरा च पालिनी शान्तिरैश्वरी रतिकामिके ॥ २१ ॥

वरदा ह्लादिनी प्रीतिर्दीर्घा चोकारजाः कलाः ।
उकारप्रभवा विष्णुजाताः स्युः स्थितये कलाः ॥ २२ ॥

तीक्ष्णा रौद्री भया निद्रा तन्द्री क्षुत्क्रोधिनी[4] क्रिया ।
उत्कारी चैव मृत्युश्च मकाराक्षरजाः कलाः ॥ २३ ॥

---

1. प्रीतिरङ्गदा. 2. कभाद्याः ससुधाः सौर्याः षडान्ता ; 3. कमला ; 4. क्रोधनी.

मकारप्रभवा रुद्रजाताः संहृतये कलाः ।
बिन्दोरपि चतस्रः स्युः पीतश्वेतारुणाः सिताः ॥ २४ ॥

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
इन्धिका दीपिका चैव रेचिका गोचिका परा ॥ २५ ॥

सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा ।
व्यापिनी व्योमरूपा चेत्यनन्ता नादसंभवाः ॥ २६ ॥

नादजाः षोडश प्रोक्ता भुक्तिमुक्तिप्रदायकाः ।
केशवनारायणमाधवगोविन्दविष्णवः ॥ २७ ॥

मधुसूदनसंज्ञश्च सप्तमः स्यात्त्रिविक्रमः ।
वामनः श्रीधरश्चैव हृषीकेशस्त्वनन्तरः ॥ २८ ॥

पद्मनाभस्तथा दामोदराह्वो वासुदेवयुक् ।
संकर्षणश्च प्रद्युम्नः सानिरुद्धः स्वरोद्भवाः ॥ २९ ॥

ततश्चक्री गदी शार्ङ्गी खड्गी शङ्खी हली तथा ।
मुसली शूलिसंज्ञश्च भूयः पाशी च साङ्कुशी ॥ ३० ॥

मुकुन्दो [1]नन्दजो नन्दी नरो नरकजिद्धरिः ।
कृष्णः सत्यः सात्वतश्च शौरिः शूरो जनार्दनः ॥ ३१ ॥

---

1. नन्दनो.

भूधरो विश्वमूर्तिश्च वैकुण्ठः पुरुषोत्तमः ।
बली बलानुजो बालो वृषघ्नश्च वृषस्तथा ॥ ३२ ॥

हंसो वराहो विमलो नृसिंहो मूर्तयो हलाम् ।
कीर्तिः कान्तिस्तुष्टिपुष्टी धृतिः क्षान्तिः क्रिया दया ॥३३॥

मेधा च हर्षा श्रद्धाह्वा लज्जा लक्ष्मीः सरस्वती ।
प्रीती रतिश्च संप्रोक्ताः क्रमेण स्वरशक्तयः ॥ ३४ ॥

जया दुर्गा प्रभा सत्या चण्डा वाणी विलासिनी ।
विजया विरजा विश्वा विनदा सुनदा[1] स्मृतिः ॥ ३५ ॥

ऋद्धिः समृद्धिः शुद्धिश्च बुद्धिर्भक्तिर्मतिः क्षमा ।
[2]रमोमा क्लेदिनी क्लिन्ना वसुदा वसुधापरा ॥ ३६ ॥

[3]परा परायणा सूक्ष्मा संध्या प्रज्ञा प्रभा निशा ।
अमोघा विद्युता चेति मूर्त्याद्याः सर्वकामदाः ॥ ३७ ॥

एकपञ्चाशदुद्दिष्टा नमोऽन्ता वर्णपूर्विकाः ।
सधातुप्राणशक्त्यात्मयुक्ता यादिषु मूर्तयः ॥ ३८ ॥

श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्तिरमरेश्वरः ।
अर्घीशो भारभूतिश्च स्थितीशः[4] स्थाणुको हरः ॥ ३९ ॥

---

1. च तथा; 2. रमा मा; 3. पारा; 4. निधीशः, तिथीशः, अतिथीशः.

झण्डीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः ।
अक्रूरश्च महासेनः स्युरेताः स्वरमूर्तयः ॥ ४० ॥

ततः [1]क्रोधीशचण्डीशपञ्चान्तकशिवोत्तमाः ।
तथैकरुद्रकूर्मैकनेत्राह्वचतुराननाः ॥ ४१ ॥

अजेशशर्वसोमेशास्तथा लाङ्गलिदारुकौ ।
अर्धनारीश्वरश्चोमाकान्तश्चाषाढिदण्डिनौ ॥ ४२ ॥

आत्रिर्मीनश्च मेषश्च लोहितश्च शिखी तथा ।
छगलण्डद्विरण्डौ च समहाकालचालिनौ[2] ॥ ४३ ॥

भुजङ्गेशः पिनाकी च खड्गीशश्च बकस्तथा ।
श्वेतो भृगुश्च लकुलिः शिवः संवर्तकः स्मृतः ॥ ४४ ॥

पूर्णोदरी च विरजा तृतीया शाल्मली तथा ।
लोलाक्षी वर्तुलाक्षी च दीर्घघोणा तथैव च ॥ ४५ ॥

[3]सुदीर्घमुखिगोमुख्यौ नवमी दीर्घजिह्विका ।
कुण्डोदर्यूर्ध्वकेशी[4] च मुखी विकृतपूर्विका ॥ ४६ ॥

सज्वालोल्काश्रियाविद्यामुख्यः[5] स्युः स्वरशक्तयः ।
महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विता ॥ ४७ ॥

---

1. क्रोडीशः; 2. समहाकालपालिनौ; 3. सुदीर्घा सुमुखी चैव, सुदीपा सुमुखी चैव. 4. कुण्डोदर्यूर्ध्वकेश्यौ च; 5. ...मुखाः.

गौरी त्रैलोक्यविद्या च तथा मन्त्रार्णशक्तिका[1] ।
भूतमाता लम्बोदरी द्राविणी नागरी तथा ॥ ४८ ॥

खेचरी मञ्जरी चैव रूपिणी वीरिणी तथा ।
कोदरी पूतना भद्रकालीयोगिन्य एव च ॥ ४९ ॥

शङ्खिनी गर्जिनी कालरात्री कुर्दिन्य[2] एव च ।
कपर्दिनी तथा वज्रा जया च सुमुखेश्वरी ॥ ५० ॥

रेवती माधवी चैव वारुणी वायवी तथा ।
रक्षोऽवधारिणी चान्या तथैव सहजाह्वया ॥ ५१ ॥

लक्ष्मीश्च व्यापिनी [3]मायेत्याख्याता वर्णशक्तयः ।
इत्युक्तस्त्रिविधो न्यासः क्रमात्सर्वसमृद्धिदः ॥ ५२ ॥

चन्दनकुचन्दनागरुकर्पूरोशीररोगजलघुसृणाः ।
तक्कोलजातिमांसीमुरचोरग्रन्थिरोचनापत्राः ॥ ५३ ॥

पिप्पलबिल्वगुहारुणतृणकलवङ्काह्वकुम्भिवन्दिन्यः ।
सौदुम्बरीकाश्मरिकास्थिराब्जदरपुष्पिकामयूरशिखाः ॥

प्लक्षाग्निमन्थसिह्मीकुशाह्वदर्भाश्च कृष्णदरपुष्पी ।
रोहिणडुण्डुमबृहतीपाटलचित्रातुलस्यपामार्गाः ॥ ५५ ॥

---

1. मन्त्रात्मशक्तिके ; 2. कूर्दिन्य ; 3. शैवेत्याख्याता.

शतमखलताद्विरेफो विष्णुक्रान्ती मुसल्यथाञ्जलिनी ।
दूर्वा श्रीदेविसहे तथैव लक्ष्मी सदाभद्रे ॥ ५६ ॥

आदीनामिति कथिता वर्णानां क्रमवशादथौषधयः ।
गुलिकाकषायभस्मप्रभेदतो निखिलसिद्धिदायिन्यः ॥

यथा भवन्ति देहान्तरमी पञ्चाशदक्षराः ।
येन येन प्रकारेण तथा वक्ष्यामि तत्त्वतः ॥ ५८ ॥

समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः ।
व्यक्तिं प्रयान्ति वदने कण्ठादिस्थानघट्टिताः ॥ ५९ ॥

उच्चैरुन्मार्गगो वायुरुदात्तं कुरुते स्वरम् ।
नीचैर्गतोऽनुदात्तं च तिर्यक् स्वरितविस्तृतिः[1] ॥ ६० ॥

अर्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिपयः क्रमात् ।
सव्यञ्जना ह्रस्वदीर्घप्लुतसंज्ञा भवन्ति ताः ॥ ६१ ॥

अकारेकारयोर्योगादेकारो वर्ण इष्यते ।
तस्यैवैकारयोगेन स्यादैकाराक्षरस्तथा ॥ ६२ ॥

---

1. स्वरिसमीरितः.

उकारयोगात्तस्यैव स्यादोकाराह्वयोऽक्षरः ।
तस्यैवौकारयोगेन स्यादौकाराक्षरस्तथा ॥ ६३ ॥

संध्यक्षराः स्युश्चत्वारो मन्त्राः सर्वार्थसाधकाः ।
ऌवर्णवर्णयोर्व्यक्तिर्लरोः सम्यक् प्रदृश्यते[1] ॥ ६४ ॥

बिन्दुसर्गात्मनोर्व्यक्तिममसोरजपा वदेत् ।
कण्ठात्तु निःसरन्सर्गः प्रायोऽचामेकतः परः ॥ ६५ ॥

नश्वरः सर्ग एव स्यात्सोष्मा सप्राणकस्तु हः ।
स सर्गः श्लेषितः कण्ठे वायुनाकादिमीरयेत् ॥ ६६ ॥

सर्गस्पर्शनमात्रेण कं खरस्पर्शनात्तु खम् ।
स्तोकगम्भीरसंस्पर्शाद्गघौ ङश्च बहिर्गतः ॥ ६७ ॥

ससर्गस्तालुगः सौष्म्यः शं च वर्गं च यं तथा ।
ऋटुरेफषकारांश्च मूर्धगो दन्तगस्तथा ॥ ६८ ॥

ऌतवर्गलसानोष्ठादुपूपध्मानसंज्ञकान् ।
दन्तोष्ठाभ्यां च वं तत्तत्स्थानगोऽर्णान्समीरयेत् ॥ ६९ ॥

---

1. प्रदिश्यते.

ह्रस्वाः पञ्च परे च संधिविकृताः पञ्चाथ बिन्द्वन्तिकाः
काद्याः प्राणहुताशभूकखमया याद्याश्च शार्णान्तिकाः ।
हान्ताः षक्षळसाः क्रमेण कथिता भूतात्मकास्ते पृथ-
क्तैस्तैः पञ्चभिरेव वर्णदशकैः स्युः स्तम्भनाद्याः क्रियाः ॥

ऊदद्वादिलळाः कोर्णसौ चतुर्थार्णकावसौवारः ।
दृष्टचैव द्वितीयरक्षा वह्नेरद्वन्द्वयोनिकादिवर्षाः ॥ ७१ ॥

मरुतः कपोलबिन्दुकपञ्चमवर्णाः शहौ तथा व्योम्नः ।
मनुषु परेष्वपि मन्त्री करोतु कर्माणि तस्य संसिध्यै ॥

स्तम्भनाद्यमथ पार्थिवैरपा-
मक्षरैश्च परिवर्षणादिकम् ।
दाहशोषणसशून्यतादिका-
न्वह्निवायुवियदुत्थितैश्चरेत् ॥ ७३ ॥

दशभिर्दशभिरमीभि-
र्नमोऽन्तिकैर्द्वन्द्वशश्च बिन्दुयुतैः ।
योनेर्मध्ये कोण-
त्रितये मध्ये च संयजेन्मन्त्री ॥ ७४ ॥

पूर्वोक्ताद्बिन्दुमात्रात्स्वयमथ रवतन्मात्रतामभ्युपैता-
कारादीन्व्यष्टकादीनपि तदनुगतान्पञ्चविंशत्तथैव ।
यादीन्संयुक्तधातूनपि गुणसहितैः पञ्चभूतैश्च ताभि-
स्तन्मात्राभिर्व्यतीत्य प्रकृतिरथ हसंज्ञा भवेद्व्याप्य विश्वम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे तृतीयः पटलः ॥

चतुर्थः पटलः ॥

अथ व्यवस्थिते त्वेवमस्य शक्तित्वमिष्यते ।
कृतकृत्यस्य जगति सततं रूढसंस्थितेः ॥ १ ॥

प्राणात्मकं हकाराख्यं बीजं तेन तदुद्भवाः ।
षडूर्मयः स्यू रेफोत्था गुणाश्चत्वार एव च ॥ २ ॥

पवनाद्याः पृथिव्यन्ताः स्पर्शाद्यैश्च गुणैः सह ।
करणान्यपि चत्वारि सङ्घातश्चेतनेति च ॥ ३ ॥

ईकारस्य गुणाः प्रोक्ताः षडिति क्रमतो[1] बुधैः ।
ऊकारान्तास्त्वकाराद्याः षड्वर्णाः षड्भ्य एव तु ॥ ४ ॥

प्रभेदेभ्यः समुत्पन्ना हकारस्य महात्मनः ।
ऋकाराद्यास्तु चत्वारो रेफोत्था ल्परः स्मृताः ॥ ५ ॥

एकारादिविसर्गान्तं वर्णानां षट्कमुद्गतम् ।
ईकारस्य षडङ्गेभ्य इतीदं षोडशांशवत् ॥ ६ ॥

येभ्यः संजज्ञिरेंशेभ्यः स्वराः षोडश सर्वगाः ।
तेभ्यो वर्णान्तराः सर्वे ततो मूलमिदं विदुः ॥ ७ ॥

1. क्रमते.

गतो वो बीजतामेष प्राणिष्वेव व्यवस्थितः ।
ब्रह्माण्डं ग्रस्तमेतेन व्याप्तस्थावरजङ्गमम् ॥ ८ ॥

नादः प्राणश्च जीवश्च घोषश्चेत्यादि कथ्यते ।
एष पुंस्त्रीनियमितैर्लिङ्गैश्च सनपुंसकैः ॥ ९ ॥

रेफो मायाबीजमिति त्रिधा समभिधीयते ।
[1]शक्तिः श्रीः संनतिः कान्तिर्लक्ष्मीर्मेधा सरस्वती ॥ १० ॥

क्षान्तिः पुष्टिः स्मृतिः शान्तिरित्याद्यैः स्वार्थवाचकैः ।
नानाविकारतां प्राप्तैः स्वैः स्वैर्भावैर्विकल्पितैः ॥ ११ ॥

तामेनां कुण्डलीत्येते सन्तो हृदयगां विदुः ।
सा रौति सततं देवी भृङ्गी संगीतकध्वनिः ॥ १२ ॥

आकृतिं स्वेन भावेन पिण्डितां बहुधा विदुः ।
कुण्डली सर्वथा ज्ञेया सुषुम्नानुगतैव सा ॥ १३ ॥

चराचरस्य जगतो बीजत्वान्मूलमेव तत् ।
मूलस्य बिन्दुयोगेन शतानन्द त्वदुद्भवः ॥ १४ ॥

रेफान्वितेकाराकारयोगादुत्पत्तिरेतयोः ।
ह्रंकाराख्यो भवांस्तेन हरिरित्येष शब्द्यते ॥ १५ ॥

---

1. सक्तिश्रीः.

हरत्वमस्य तेनैव सर्वात्मत्वं ममापि च ।
अस्य बिन्दोः समुद्धृत्या तदन्तो हं स उच्यते[1] ॥ १६ ॥

स हंकारः पुमान्प्रोक्तः स इति प्रकृतिः स्मृता ।
अजपेयं मता शक्तिस्तथा दक्षिणवामगा ॥ १७ ॥

बिन्दुर्दक्षिणभागस्तु वामभागो विसर्गकः ।
तेन दक्षिणवामाख्यौ भानौ[2] पुंस्त्रीविशेषितौ ॥ १८ ॥

बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिर्मता ।
पुंप्रकृत्यात्मको हंसस्तदात्मकमिदं जगत् ॥ १९ ॥

पुंरूपं सा विदित्वा स्वं सोऽहंभावमुपागता ।
स एष परमात्माख्यो मनुरस्य महामनोः ॥ २० ॥

सकारं च हकारं च लोपयित्वा प्रयोजयेत् ।
संधिं वै पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत् ॥ २१ ॥

ताराद्विभक्ताच्चरमांशतः स्यु-
भूर्तानि खादीन्यथ मध्यमांशात् ।
इनादितेजांसि च पूर्वभागा-
च्छब्दाः समस्ताः प्रभवन्ति लोके ॥ २२ ॥

---

1. तदन्तोऽसौ हमुच्यते, तदन्तः सोऽहमुच्यते ; 2. भागौ

एवमेषा जगत्सूतिः सवितेत्यभिधीयते ।
यदा तदैति स्वैस्तत्त्वैश्चतुर्विंशतिधा भिदाम् ॥ २३ ॥

तद्वर्णभिन्ना गायत्री गायकत्राणनाद्भवेत् ।
सप्तग्रहात्मिका प्रोक्ता यदेयं सप्तभेदिनी ॥ २४ ॥

तदा स्वरेशः सूर्योऽयं कवर्गेशस्तु लोहितः ।
चवर्गप्रभवः काव्यष्टवर्गाद्बुधसंभवः ॥ २५ ॥

तवर्गोत्थः सुरगुरुः पवर्गोत्थः शनैश्चरः ।
यवर्गजोऽयं शीतांशुरिति सप्तगुणा त्वियम् ॥ २६ ॥

यथा स्वरेभ्यो नान्ये स्युर्वर्णाः षड्वर्गभेदिताः ।
तथा सवित्रनुस्यूतं गृहषट्कं न संशयः ॥ २७ ॥

इति संलीनसूर्यांशे वर्गषट्के तु षड्गुणाः ।
हृल्लेखेयं तथा यत्रं स्मर्यते स्मृतिकोविदैः ॥ २८ ॥

सर्वव्याप्ता हि सा शक्तिः शश्वद्भास्कररूपिणी ।
स्वभासा क्रमते यत्र तत्रास्या स्थितिरिष्यते ॥ २९ ॥

अस्यास्तु रजसा चैव तमसा च दिवानिशम् ।
सत्त्वावष्टब्धबिन्द्वात्मा मेरुं चरति[1] भास्करः ॥ ३० ॥

---

1. मेरुश्चरति.

अस्या विकाराद्वर्णेभ्यो जाता द्वादशराशयः ।
लवादिकालोपचितैस्तैः स्याच्चक्रगतिस्त्रिधा ॥ ३१ ॥

ऋक्षराश्यादियुतया चक्रगत्या जगत्स्थितिः ।
वक्ष्यामि चक्ररूपं च प्रबन्धं राशिभिर्यथा ॥ ३२ ॥

अन्तर्बहिर्विभागेन रचयेद्राशिमण्डलम् ।
भूचक्र एष मेषादिः प्रविज्ञेयोऽथ मानुषः ॥ ३३ ॥

आद्यैर्मेषाह्वयो राशिरीकारान्तैः प्रजायते ।
ऋकारान्तैरुकाराद्यैर्वृषो युग्मं ततस्त्रिभिः ॥ ३४ ॥

एदैतोः कर्कटो राशिरोदौतोः सिंहसंभवः ।
अमः शवर्गलेभ्यश्च संजाता कन्यका मता ॥ ३५ ॥

षड्भ्यः कचटतेभ्यश्च पयाभ्यां च प्रजज्ञिरे ।
वणिगाद्यास्तु मीनान्ता राशयः शक्तिजृम्भणात् ॥ ३६ ॥

चतुर्भिर्यादिभिः सार्धं स्यात्क्षकारस्तु मीनगः ।
[1]स्यातामर्धाधिके पञ्चनाडिकौ चापकर्कटौ ॥ ३७ ॥

पादाधिका मकरयुक्सिंहवृश्चिकसंज्ञकाः ।
पादोनौ कुम्भवृषभौ वणिक्कन्ये च पञ्चके ॥ ३८ ॥

---

1. स्यातामर्धादिकौ.

त्रिपादोनौ मीनमेषौ संख्योक्ता राशिसंश्रिता ।
चापनीरजयुक्कन्याः पीताः स्युरुभयास्त्वमी ॥ ३९ ॥

वणिङ्मकरमेषाह्वकुलीरा रक्तरोचिषः ।
चरावशिष्टाश्चत्वारः स्थिराः श्वेताः पृथङ्मताः ॥ ४० ॥

स्युः कर्कटो वृश्चिकमीनराशी
विप्रा नृपाः सिंहकधन्वमेषाः ।
तुला सकुम्भा मिथुनं च वैश्याः
कन्या वृषोऽथो मकरश्च शूद्राः ॥ ४१ ॥

अङ्गारावजवृश्चिकौ वृषतुले शुक्रस्य युक्कन्यके
बौधे कर्कटकाह्वयो हिमरुचः सिंहस्तथा गोपतेः ।
चापाब्जावपि धैषणौ मकरकुम्भाख्यौ च मान्दौ ग्रहाः
प्रोक्ता राश्यधिपा बलौ च कलशे सोऽयं क्रमो दर्शितः ॥

लग्नो धनभ्रातृबन्धुपुत्रशत्रुकलत्रकाः ।
मरणं धर्मकर्मायव्यया द्वादशराशयः ॥ ४३ ॥

ततस्तदूर्ध्वभागस्थो भुवश्चक्रः समस्तथा ।
स तु सिंहादिको यस्मिन्पैतृकी नियता गतिः ॥ ४४ ॥

तदूर्ध्वभागसंस्थः स्यात्स्वश्चक्रश्चापि तादृशः ।
स तु चापादिको दैवश्चक्रस्त्वैनाभिकस्त्वयम् ॥ ४५ ॥

धनुस्तु देवलग्नत्वात्समासाल्लग्नमुच्यते ।
वेध्या धनुर्मेषसिंहमकरर्षभकन्यकाः ॥ ४६ ॥

सकुम्भयुग्मवणिजो मीनकर्कटवृश्चिकाः ।
अयं तु राशिवेधः स्यादतो वेधस्तु भात्मकः ॥ ४७ ॥

मूलाश्विनीमघज्येष्ठारेवत्याश्लेषकास्तथा ।
याम्यपूर्वानुपूर्वाहिर्बुध्निपुष्यानुराधकाः ॥ ४८ ॥

स्वातीशतभिषार्द्रा च श्रोणारोहिणिहस्तकाः ।
पादं पादत्रये बुध्यायोजयेदर्धमर्धकैः ॥ ४९ ॥

चरस्थिरोभयात्मानश्चातुर्वर्ण्यगुणात्मकाः ।
राशिं राश्यधिपास्त्वेवं बुध्युर्वेधविधानतः ॥ ५० ॥

एभ्य एव तु राशिभ्यो नक्षत्राणां च संभवः ।
स चाप्यक्षरभेदेन सप्तविंशतिधा भवेत् ॥ ५१ ॥

आभ्यामश्वयुगेर्जाता[1] भरणी कृत्तिका पुनः ।
लिपित्रयाद्रोहिणी च तत्परस्ताच्चतुष्टयात् ॥ ५२ ॥

---

1. आभ्यामश्वयुजेर्जाता.

एदैतोर्मृगशीर्षार्द्रे तदन्ताभ्यां पुनर्वसू ।
अमसोः केवलो योगो रेवत्यर्थं पृथग्गतः ॥ ५३ ॥

कतस्तिष्यस्तथाश्लेषा खगयोर्घङयोर्मघाः ।
चतः पूर्वाथ छजयोरुत्तरा झञयोस्तथा ॥ ५४ ॥

हस्तश्चित्रा च टठयोः स्वाती डादक्षराद्भूत् ।
विशाखास्तु ढणोद्भूतास्तथा देऽभ्योऽनुराधकाः ॥ ५५ ॥

ज्येष्ठा धकारान्मूलाख्यो नपफेभ्यो बतस्तथा ।
पूर्वाषाढा भतोऽन्या च संजाता श्रवणो मतः ॥ ५६ ॥

श्रविष्ठा चापि यरयोस्तथा शतभिषग्लतः ।
वशयोः प्रोष्ठपात्संज्ञा षसहेभ्यः परा स्मृता ॥ ५७ ॥

ताभ्याममोभ्यां लार्णोऽयं यदा वै सह वत्स्यते ।
तदेन्दुसूर्ययोर्योगादमावास्या प्रतीयते ॥ ५८ ॥

कषतो भुवनं मत्तः कषयोः संगमो भवेत् ।
ततः क्षकारः संजातो नृसिंहस्तस्य देवता ॥ ५९ ॥

स पुनः षसहैः सार्धं परप्रोष्ठपदं गतः ।
कारस्कराख्यामलकोदुंबरो जम्बुसंज्ञकः ॥ ६० ॥

खदिरः कृष्णवंशौ च पिप्पलो नागरोहिणौ ।
पलाशः प्लक्षकाम्बष्ठबिल्वार्जुनविकङ्कताः ॥ ६१ ॥

वकुलः शबरः सर्जो वञ्जुलः पनसार्ककौ ।
शमीकदम्बनिम्बाम्रौ मधूकान्ता दिनाङ्घ्रिपाः ॥ ६२ ॥

आयुष्कामः स्वकं वृक्षं छेदयेन्न कदाचन ।
सेचयेद्वर्धयेच्चापि पूजयेत्प्रणमेदपि ॥ ६३ ॥

तिथिनक्षत्रवारेषु स्वेषु मन्त्रजपो वरः ।
तस्मादेषां दिनादीनां वक्ष्यन्ते देवता अपि ॥ ६४ ॥

अश्वियमानलधाता शशिरुद्रादितिसुरेड्यसर्पाश्च
पित्र्यर्यमभगदिनकृत्त्वष्टारो मारुतस्तथेन्द्राग्नी ।
मित्रेन्द्रौ निर्ऋतिर्जाले विश्वे देवा हरिस्तथा वसवः
वारुणोऽजैकपादहिर्बुध्निः पूषा च देवता भानाम् ॥

अश्वेभाजभुजङ्गसर्पसरमा मार्जारकाजा बिली
मूषा मूषिकरुद्रयानमहिषी व्याघ्रो यमारोहणम् ।
व्याघ्रचैणी हरिणी श्ववानरपशुः शाखामृगी स्त्री हयो
मर्त्यो गौः करिणीति साधु कथिता नक्षत्रयोन्यः क्रमात् ॥

एभ्योऽमावास्यान्ता
वर्तन्ते प्रतिपदादिकास्तिथयः ।
राशिभ्योऽथ तिथीना-
मध्यर्धयुगं तु राशिरेकं स्यात् ॥ ६७ ॥

तेन त्रिंशत्तिथयो
द्वादशधा वर्णतो भिन्नाः ।
ता एव स्युर्द्विविधाः
पुनरपि पूर्वान्त्यपक्षभेदेन ॥ ६८ ॥

पक्षः पञ्चदशाहः
स्यात्पूर्वः प्रतिपदादिकः शुक्लः ।
तद्वज्ज्ञेयोऽप्यपरः
कृष्णः प्रतिपदादिकः प्रोक्तः ॥ ६९ ॥

संज्ञासाम्ये सत्यपि
सौम्यात्तु ह्रासवृद्धितस्तिथयः ।
न समाः पक्षद्वितये
त्रिंशद्भेदास्तथा हि संप्रोक्ताः ॥ ७० ॥

अग्न्यश्व्युमा सविघ्ना
  नागा गुहसवितृमातरो दुर्गा ।
ककुभो धनपतिविष्णू
  यमहरचन्द्राः क्रमेण तिथ्यधिपाः ॥ ७१ ॥

राशिभ्यः सदिनेभ्यः स-
  तिथिभ्यः शक्तिजृम्भणसमुत्थानात् ।
अक्षरभेदविकारा-
  त्करणान्यपि सप्तभेदकान्यभवन् ॥ ७२ ॥

सिंहव्याघ्रवराहाः
  खरगजवृषकुक्कुटाः प्रतिपदर्धात् ।
अन्त्यां तिथ्यर्धेऽर्धे
  तिष्ठन्त्याः कृष्णगोश्चतुर्दश्याः ॥ ७३ ॥

एवं संग्रहराशिक
  दिनातिथिकरणप्रभेदकाः कथिताः ।
अस्मात्पञ्चाविभेदा-
  द्विज्ञेया पञ्चवर्णनिष्पत्तिः ॥ ७४ ॥

वर्णाः पीतश्वेता-
  रुणासितश्यामकास्तथा काद्याः ।
इति मूलाक्षरविकृतिं
  कथितमिदं वर्णविकृतिबाहुल्यम् ॥ ७५ ॥

सचराचरस्य जगतो
  मूलत्वान्मूलतास्य बीजस्य ॥ ७६ ॥

यां ज्ञात्वा सकलमपास्य कर्मबन्धं
  तद्विष्णोः परमपदं प्रयाति लोकः ।
तामेनां त्रिजगति जन्तुजीवभूतां
  हृल्लेखां जपत च नित्यमर्चयीत ॥ ७७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे चतुर्थः पटलः ॥

पञ्चमः पटलः ॥

अथ प्रवक्ष्ये विधिवन्मनूनां
दीक्षाविधानं जगतो हिताय ।
येनोपलब्धेन समाप्नुवन्ति
सिद्धिं परत्रेह च साधकेशाः ॥ १ ॥

दद्याच्च दिव्यभावं
क्षिणुयाद्दुरितान्यतो भवेद्दीक्षा ।
मननात्तत्त्वपदस्य
त्रायत इति मन्त्र उच्यते भयतः ॥ २ ॥

दैवादिकस्याप्यथ मानुषादेः
पैत्रादिकस्याप्यथ वत्सरस्य ।
आदिं समारभ्य समग्रसंप-
द्यत्नेन दीक्षाविधिमारभेत ॥ ३ ॥

*P. 4

शुभकर्मणि दीक्षायां
मण्टपकरणे गृहादिविधिषु तथा ।
विहितो वास्तुबलिः स्या-
द्रक्षाविघ्नोपशान्तिसंपद्भ्यः ॥ ४ ॥

अभवत्पुराथ किल वास्तुपुमा-
निति विश्रुतो जगदुपद्रवकृत् ।
चतुरश्रसंस्थितिरसौ निहितो
[1]निहतः क्षितौ सुरगणैर्दितिजः ॥ ५ ॥

तद्देहसंस्थिता ये
देवास्ते विश्रुतास्त्रिपञ्चाशत् ।
मण्डलमध्याद्यर्च्या
यथा तथोक्तक्रमेण कथ्यन्ते ॥ ६ ॥

कृत्वावनिं समतलां चतुरश्रसंस्था-
मष्टाष्टकोद्यतपदां च सकोणसूत्राम् ।
तस्यां चतुष्पदसमन्वितमध्यकोष्ठे
ब्रह्मा तु साधकवरेण समर्चनीयः ॥ ७ ॥

1. निहितः.

प्राग्याम्यवारुणोद-
  ग्दिक्कोष्ठचतुष्पदेषु समभियजेत् ।
[1]आर्याख्यं सविवस्व-
  त्संज्ञं मित्रं महीधरं क्रमशः ॥ ८ ॥

कोणद्वयार्धकोष्ठे-
  ष्वर्च्याः सावित्रसावितृशक्राह्वाः ।
सेन्द्रजयरुद्रतज्जय-
  सापश्च तथापवत्सकोऽग्न्याद्याः ॥ ९ ॥

अग्नेः पार्श्वोत्थपद-
  द्वन्द्वे शर्वं गुहार्यमणौ च तथा ।
जम्भकपिलिपिञ्छाख्यौ
  चरकिविदार्यौ च पूतनाः प्रोक्ताः ॥ १० ॥

अर्धपदाद्यन्तासु च
  चतसृषु दिक्षु क्रमेण बहिरर्च्याः ।
वासवयमजलशशिना-
  मष्टावष्टौ च मन्त्रिणा विधिना ॥ ११ ॥

---

1. आर्यकं.

ईशानाख्यः स पर्जन्यो जयन्तः शक्रभास्करौ ।
सत्यो वृषान्तरिक्षौ च देवताः प्रागुदीरिताः ॥ १२ ॥

अग्निः पूषा च वितथो यमश्च ग्रहरक्षकः ।
गन्धर्वो भृङ्गराजश्च मृगो दक्षदिगाश्रिताः ॥ १३ ॥

निर्ऋतिर्दौवारिकश्चैव सुग्रीवो वरुणस्तथा ।
पुष्पदन्तासुरौ शोषरोगौ प्रत्यग्दिगाश्रिताः ॥ १४ ॥

वायुर्नागश्च मुख्यश्च सोमो भल्लाट एव च ।
अर्गलाख्योऽदितिस्तद्वद्दितिः सौम्यदिगाश्रिताः ॥ १५ ॥

इतीरितानामपि देवतानां
चित्राणि कृत्वा रजसा पदानि ।
पयोऽन्धसा साधुबलिर्विधेयो
द्रव्यैश्च वा तन्त्रविशेषसिद्धैः ॥ १६ ॥

भूयो भूमितले समे विरहिते लोमास्थिलोष्टादिभिः
कर्तव्यं नवसप्तपञ्चकमितैर्हस्तैः परीणाहतः ।
युक्तं द्वारचतुष्ककल्पितपयोभूरुट् चतुस्तोरणं
दर्भस्रक्परिवीतमुज्ज्वलतलं स्यात्संवृतं मण्डपम् ॥१७॥

सप्ताहतो वा नवरात्रतो वा
प्रागेव दीक्षादिवसाद्यथावत् ।
सपालिकापञ्चमुखीशराव-
चतुष्टये बीजनिवापमुक्तम् ॥ १८ ॥

अन्यस्मिन्भवने सुसंवृततरे शुद्धे स्थले मण्डलं
कुर्यात्प्राग्वरुणायतं पदचतुष्कोपेतभानूदरम् ।
पीतारक्तसितासितं प्रतिपदं वह्न्यादिशर्वान्तिकं
याम्योदीच्यसमायतं प्रणिगदन्त्यन्ये च तन्मन्त्रिणः ॥

वैष्णव्यस्त्वथ पालिका अपि चतुर्विंशाङ्गुलोच्छ्रायकाः
वैरिञ्च्यो घटिकास्तु पञ्चवदना व्यष्टाङ्गुलोच्छ्रायकाः ।
शैवाः स्युर्द्विषडङ्गुला अपि शरावाह्वा जलक्षालिताः
सूत्रैश्च प्रकल्प्य पङ्क्तिषु च ताः प्रोक्तक्रमाद्विन्यसेत् ॥

पृथगपि शालीतण्डुल-
पूर्णासु सदर्भबद्धकूर्चासु ।
मृद्वालुकाकरीषैः
क्रमेण पूर्णानि तानि पात्राणि ॥ २१ ॥

शालीकङ्गुश्यामा-
तिलसर्षपमुद्गमाषनिष्पावाः ।
खल्वाढकीसमेता
बीजानि विदुः प्ररोहयोग्यानि ॥ २२ ॥

प्रक्षाल्य तानि निवपेदभिमन्त्र्य मूल-
बीजेन साधकवरस्त्वपि पात्रकेषु ।
विप्राशिषा च विधिवत्प्रतिपाद्यमान-
शङ्खादिमुख्यतरपञ्चमहास्वनैश्च ॥ २३ ॥

हारिद्राद्भिः सम्यगभ्युक्ष्य वस्त्रै-
राच्छाद्याद्भिः सिञ्चतां पञ्चघोषैः ।
सायंप्रातः शर्वरीषु प्रदद्या-
दुक्तैर्द्रव्यैस्तद्बलिं साधकेशः ॥ २४ ॥

भूतपितृयक्षनाग-
ब्रह्मशिवा देवताश्च विष्णवन्ताः ।
ताभ्यः क्रमेण रात्रिषु
सप्तसु वा नवसु बलिर्देयः ॥ २५ ॥

लाजतिलनक्तरजो

दधिसक्त्वन्नानि भूतकूराख्यम् ।

पित्र्यं तिलतण्डुलकं

सोडुम्बिकधानलाजकं याक्षम् ॥ २६ ॥

केरोदसक्तुपिष्टं

नागं पद्माक्षतं च वैरिञ्च्यम् ।

अन्नापूपं शैवं

गुलोदनं वैष्णवं च दुग्धान्नम् ॥ २७ ॥

कृसरं च वैष्णवेयं

यदि नवरात्रं क्रमेण बलिरुक्तः ।

तारादिकैर्नमोऽन्तैः

स्वैः स्वैरपि नामभिश्च बलिमन्त्रः ॥ २८ ॥

पात्राणि त्रिविधान्यपि

परितः पुनरष्टदिक्षु बलिक्लृप्तिः ।

बीजारोपणकर्म

प्रथितमिदं सार्वकामिकं भवति ॥ २९ ॥

प्रागेव लक्षणयुतानि च मण्टपेऽस्मि-
न्कुण्डानि कारयतु सम्यगथो दिशासु ।
आखण्डलार्कभववारिपभाधिपानां
दोर्मात्रकाणि विलसद्गुणमेखलानि ॥ ३० ॥

चतुरश्रमर्धशशिबिम्बविलसितमथ त्रिकोणकम् ।
पद्मदलरुचिरवृत्तमिति ब्रुवते सुधाविधिषु[1] कुण्डलक्षणम् ॥

विंशद्भिश्चतुरधिकाभिरङ्गुलीभिः
सूत्रेणाप्यथ परिसूत्र्य भूमिभागम् ।
ताभिश्च प्रखनतु तावतीभिरेकां
त्यक्त्वा चाङ्गुलिमपि मेखलाश्च कार्याः ॥ ३२ ॥

सत्त्वपूर्विकगुणान्विताः क्रमा-
द्द्वादशाष्टचतुरङ्गुलोच्छ्रिताः ।
सर्वतोऽङ्गुलिचतुष्कविस्तृता
मेखलाः सकलसिद्धिदा मताः ॥ ३३ ॥

---

1. बुधा विधिषु

योनिस्तत्पश्चिमस्यामथ दिशि चतुरश्रस्थलारब्धनाला
तन्मध्योल्लासि रन्ध्रोपरिपरि विततश्वत्थपत्रानुकारा ।
उत्सेधायामकाभ्यां प्रकृतिविकृतिसंज्ञाङ्गुलाष्टाङ्गुला स्या-
द्विस्तृत्या द्वादशार्धाङ्गुलमितनमिताग्रा निविष्टेव कुण्डे ॥

अथवा दिशि कुण्डमुत्तरस्यां
प्रविदध्याच्चतुरश्रमेकमेव ।
गदितैरपि लक्षणैः समेता-
पवनं दृष्टिमनोहरं च कान्त्या ॥ ३५ ॥

ततो मण्टपमध्ये तु स्थण्डिलं गोमयाम्बुना ।
उपलिप्य यथान्यायं तस्य मध्ये निधापयेत् ॥ ३६ ॥

सूत्रं प्राक् प्रत्यगात्ताग्रं[1] विप्राशीर्वचनैः सह ।
गुणितेनाभितो मत्स्यौ मध्यादारभ्य विन्यसेत् ॥ ३७ ॥

तन्मध्यस्थितयाम्योदगग्रं सूत्रं निधापयेत्
ततो मध्यात्सपद्धस्तमानेन च दिशं प्रति ॥ ३८ ॥

सूत्रेषु मकरान्न्यस्येत्स्पष्टानन्योन्यतः समात्[2] ।
सूत्राग्रमकरेभ्यस्तु न्यसेत्कोणेषु मत्स्यकान् ॥ ३९ ॥

---

1. प्रत्यगाशाग्रं; 2. क्रमात्.

कोणमत्स्यास्थिताग्राणि दिक्षु सूत्राणि [1]पातयेत् ।
ततो भवेच्चतुष्कोष्ठं चतुरश्रं च मण्डलम् ॥ ४० ॥

तत्राग्निमारुतं सूत्रं नैर्ऋतेशं निपातयेत् ।
प्राग्याम्यवारुणोदीच्यसूत्राग्रमकरेषु च ॥ ४१ ॥

[2]निहिताग्रयुगं सूत्रं चतुष्कं प्रतिपातयेत् ।
कृत एवं भवेयुस्ते कोणकोष्ठेषु मत्स्यकाः ॥ ४२ ॥

एषु प्राग्वारुणात्सूत्रान्याम्योदीच्यां निपातयेत् ।
षट्पञ्चाशत्पदानि स्युरधिकानि शतद्वयात् ॥ ४३ ॥

यदा [3]तदाजो विभजेत्पदानि क्रमशः सुधीः ।
पदैः षोडशभिर्मध्ये पद्मं वृत्तत्रयान्वितम् ॥ ४४ ॥

तैरष्टचत्वारिंशद्भी राशिः स्याद्वीथ्यशीतिभिः ॥
सद्वादशैः शतपदैः शोभायुग्द्वारकोणकम् ॥ ४५ ॥

द्वाराणि पदषट्काणि शोभाख्याः स्युश्चतुष्पदाः ।
चतुष्पदाश्चोपशोभाः षट्पदं कोणकं भवेत् ॥ ४६ ॥

वृत्तवीथ्योरारचयेन्मध्ये सूत्रचतुष्टयम् ।
प्राग्याम्यवारुणोदीच्यसूत्राग्रमकरेषु च ॥ ४७ ॥

---

1. सूत्रान्निपातयेत्; 2. निहतं च युगं सूत्रचतुष्कं. 3. तथो.

[1]निहिताग्रयुगं सूत्रं तद्वद्राशिमण्डलम् ।
कर्णिकायाः केसराणां दलसंधेर्दलस्य च ॥ ४८ ॥

दलाग्रवृत्तराशीनां वीथ्याः शोभोपशोभयोः ।
वृत्तानि चतुरश्राणि व्यक्तास्थानानि कल्पयेत् ॥ ४९ ॥

भवेन्मण्डलमध्यार्धे कर्णिका चतुरङ्गुला ।
त्र्यङ्गुलाः केसराश्च स्युः संधिश्च चतुरङ्गुला ॥ ५० ॥

तथा दलानां मानं तदग्रव्यङ्गुलकं भवेत् ।
अन्तरालं पृथग्वृत्तत्रयस्य[2] व्यङ्गुलं भवेत् ॥ ५१ ॥

ततश्च राशिचक्रं स्यात्स्वं स्वं वर्णविभूषितम् ।
राशिमङ्गलकैः कुर्यात्षड्भिर्नवभिरेव[3] वा ॥ ५२ ॥

द्वात्रिंशदङ्गुलं ह्येतत्परस्तात्तावदिष्यते ।
वृत्तचक्रमुशन्त्येके चतुरश्रं च तद्विदः ॥ ५३ ॥

यदि वा वर्तुलमराः स्युश्च द्वादशराशयः ।
ते स्युः पिपीलिकामध्या मातुलङ्गनिभा अपि ॥ ५४ ॥

चक्रं च चतुरश्रं च त्र्यश्रा द्वादशराशयः ।
भवेयुः पङ्कजदलनिभा वा कथिता बुधैः ॥ ५५ ॥

---

1. निहताग्रयुतं; 2. पृथग्वृत्ते त्रयस्य; 3. षड्भिरष्टाभिरेव वा.

तद्बहीं रुचिरान्कुर्याच्चतुरान्कल्पशाखिनः ।
ललितान्रूढकुसुमान्फलपल्लवशोभितान् ॥ ५६ ॥

जलजैः स्थलजैर्वापि सुमनोभिः समन्वितान् ।
हंससारसकारण्डशुकभ्रमरकोकिलैः ॥ ५७ ॥

मयूरचक्रवाकाद्यैरारूढविटपानतान् ।
[1]सर्वर्तुनिष्कृतिकरान्विलोचनमनोहरान् ॥ ५८ ॥

तद्बहिः पार्थिवं कुर्यान्मण्डलं कृष्णकोणकम् ।
मण्डलानि तु तत्त्वज्ञो राश्यन्तान्येव कारयेत् ॥ ५९ ॥

राशेरन्यत्र रचयेत्प्रमोहादन्यमण्डलम् ।
आवाह्य देवतामन्यामर्चयेदन्यदेवताम् ॥ ६० ॥

उभाभ्यां लभते शापं मन्त्री तरलदुर्मतिः ।
कालात्मकस्य देवस्य राशिव्याप्तिमजानता ॥ ६१ ॥

कृतं समस्तं व्यर्थं स्यादज्ञेन ज्ञानमानिना ।
तस्मात्सर्वप्रयत्नेन राशीन्साधिपतीन्क्रमात् ॥ ६२ ॥

अवगम्यानुरूपाणि [2]मण्डलानि च मान्यधीः ।
उपक्रमेदर्चयितुं होतुं वा सर्वदेवताः ॥ ६३ ॥

---

1. सर्वर्तुनिर्वृतिकरान्; 2. मण्डलानिव.

रजांसि पञ्चवर्णानि पञ्चद्रव्यात्मकानि च ।
पीतशुक्लारुणशितिश्यामान्येतानि भूतशः ॥ ६४ ॥

हारिद्रं स्याद्रजः पीतं तण्डुलं च सितं भवेत् ।
तथा दोषा रजःक्षारसंयुक्तं रक्तमुच्यते ॥ ६५ ॥

कृष्णं दग्धपुलाकोत्थं श्यामं बिल्वदलादिजम् ।
सितेन रजसा कार्याः सीमा रेखा विपाश्रिता ॥ ६६ ॥

अङ्गुलोत्सेधविस्ताराः[1] सर्वमण्डलकर्मसु ।
पीताः स्यात्कर्णिका रक्तशुक्लपीताश्च केसराः ॥ ६७ ॥

दलान्यच्छान्यन्तरालं श्यामचूर्णेन पूरयेत्[2] ।
सितरक्तासितैर्वर्णैर्वृत्तत्रयमुदीरितम् ॥ ६८ ॥

नानावर्णविचित्रा स्युश्चित्राकाराश्च वीथयः ।
द्वारशोभोपशोभाश्राः सितरक्तनिशासिताः ॥ ६९ ॥

राशिचक्रावशिष्टानि कोणानि शृणु यानि वै ।
पीठपादानि तानि स्युररुणान्यपि तानि वा ।
तत्तत्पादोक्तवर्णानि तत्तदाकारवन्ति वा ॥ ७० ॥

---

1. अङ्गुलोत्सेधविटपाः; 2. श्यामं चूर्णेन पूरयेत्; श्यामचूर्णेन कारयेत्.

अथवारुणानि च दलानि तथा
दलसंधिरप्यसितरुग्भवति[1] ।
असितारुणाच्छरजसा
विहितान्यपि वर्तुलानि कथयन्त्यपरे ॥ ७१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे पञ्चमः पटलः ॥

1. दलसंधिरप्यसितयुग्भवति.

षष्ठः पटलः ॥

अथ पुनराचम्य गुरुः
प्राग्वदनो विष्टरोपविष्टः सन् ।
प्राणायामं सलिपिन्यासं
कृत्वा न्यसेत्तदृष्यादीन् ॥ १ ॥

ऋषिर्गुरुत्वाच्छिरसैव धार्य-
श्छन्दोऽक्षरत्वाद्रसनागतं स्यात् ।
धियावगन्तव्यतया सदैव
हृदि प्रदिष्टा मनुदेवता च ॥ २ ॥

ऋषिवर्णादिकौ धातू स्तो गत्या प्रापणेन च ।
यात्याभ्यां यत्स्वरूपं स गुरुः स्यादृषिवाचकः ॥ ३ ॥

इच्छादानार्थकौ धातू स्तश्छदाद्यश्च दादिकः ।
तयोरिच्छां ददातीति छन्दो मन्त्रार्णवाचकम् ॥ ४ ॥

आत्मनो देवताभावप्रधानाद्देवतेति च ।
पदं समस्तमन्त्रेषु विद्वद्भिः समुदीरितम् ॥ ५ ॥

हृदयशिरसोः शिखायां कवचाक्ष्यस्त्रेषु सह चतुर्थीषु ।
नत्याहुत्या च वषड्ढुं वौषट्फट्पदैः षडङ्गविधिः ॥ ६ ॥

हृदयं बुद्धिगम्यत्वात्प्रणामः स्यान्नमःपदम् ।
क्रियते हृदयेनातो बुद्धिगम्यनमस्क्रिया ॥ ७ ॥

तुङ्गार्थत्वाच्छिरः स्वे स्वे विषयाहरणे द्विठः ।
शिरोमन्त्रेण चोत्तुङ्गविषयाहृतिरीरिता ॥ ८ ॥

[1]शिखादेशसमुद्दिष्टा वषडित्यङ्गमुच्यते ।
तत्तेजोऽस्य तनुः प्रोक्ता शिखामन्त्रेण मन्त्रिणः ॥ ९ ॥

[2]कचग्रहण इत्यस्माद्धातोः कवचसंभवः ।
हुंतेजस्तेजसां देहो गृह्यते कवचं ततः ॥ १० ॥

नेत्रदृष्टिः समुद्दिष्टा वौषड् दर्शनमुच्यते ।
दर्शनं दृशि येन स्यात्तत्तेजो नेत्रवाचकम् ॥ ११ ॥

असुत्रसादिकौ धातू स्तः क्षेपचलनार्थकौ ।
ताभ्यामनिष्टमाक्षिप्य चालयेत्फट्पदाग्निना ॥ १२ ॥

प्रोक्तानीत्यङ्गमन्त्राणि सर्वमन्त्रेषु सूरिभिः ।
पञ्चैव यस्य मन्त्रस्य भवन्त्यङ्गानि मन्त्रिणः ॥ १३ ॥

---

1. शिखातेजः समुद्दिष्टा; 2. कवग्रहण.

सर्वेष्वपि च [1]मन्त्रेषु नेत्रलोपो विधीयते ।
अङ्गुलीषु क्रमादङ्गैरङ्गुष्ठादिषु विन्यसेत् ॥ १४ ॥

कनिष्ठान्तासु तद्वाह्यतलयोः करयोः सुधीः ।
अस्त्रेण तालत्रितयं कृत्वा तेनैव बन्धयेत् ॥ १५ ॥

दिशो दश क्रमादङ्गषट्कं वा पञ्चकं न्यसेत् ।
जपारम्भे मनूनां तु सामान्येयं प्रकल्पना ॥ १६ ॥

शङ्खं सगन्धपुष्पाक्षततोयं वामतः प्रविन्यस्य ।
साङ्गं मन्त्रं पूजामूर्तेर्न्यस्येद्गुरूपदेशेन ॥ १७ ॥

न्यस्येच्च दक्षभागे सुमनःपात्रं तथाभितो दीपान् ।
अन्यत्साधनमखिलं पुरतो गन्धाक्षतादिकं मन्त्री ॥ १८ ॥

प्रथमं निजसव्यतो यथाव-
त्प्रयजेद्देवमयान्महागुरूंस्वान् ।
गणनाथमन्यतश्च पाशा-
ङ्कुशदन्ताभयहस्तमुज्ज्वलाङ्गम् ॥ १९ ॥

रक्तं धर्मं वृषतनुमथाग्नौ हरिं श्यामवर्णं
ज्ञानं रक्षोदिशि मरुति पीतं च वैराग्यसंज्ञम् ।

1. तन्त्रेषु.

*P. 5

भूताकारं द्विरदतनुमैश्वर्यमीशे च कृष्णं
नञ्पूर्वैस्तैर्यजतु दिशि चित्राणि गात्राणि पीठे ॥ २० ॥

मध्येऽनन्तं पद्ममस्मिंश्च सूर्यं
सोमं वह्निं तारवर्णैर्विभक्तैः ।
सत्त्वादींश्च त्रीन्गुणानात्मयुक्ता-
ञ्शक्तिः किंजल्केषु मध्ये यजेच्च ॥ २१ ॥

श्वेता कृष्णा रक्ता
पीता श्यामानलोपमा[1] शुक्ला ।
अञ्जनजपासमाने
तेजोरूपाश्च शक्तयः प्रोक्ताः ॥ २२ ॥

विन्यस्य कर्णिकोपरि शाली-
स्तदुपरि च तण्डुलानि तथा ।
तेषामुपरि च दर्भा-
न्पूर्वोपरि कूर्चमक्षतोपेतम् ॥ २३ ॥

त्रिगुणेन च तन्तुरूपभाजा
परितोऽसौ परिवेष्टितं यथावत् ।

1. ...नवोपमा.

लघुनालघुधूपितं च कूर्चौ
परिकुम्भं निदधातु तारजापी ॥ २४ ॥

न्यस्य दर्भमयं कूर्चमक्षता-
द्यायुतं सनवरत्नकं घटे ।
पूरयेत्सह कषादिकान्तगै-
रक्षरौषधिविपाचितैर्जलैः ॥ २५ ॥

अथवा दशमूलपुष्पदुग्धा-
ङ्घ्रिपचर्मोत्कथितैः कषायतोयैः ।
स्तनजद्रुमचर्मसाधितैर्वा
सलिलैः संयतधीः शुभोदकैर्वा ॥ २६ ॥

शङ्खे कषायोदकपूरिते च
विलोड्य सम्यग्विधिना सगन्धम् ।
कलाः समावाह्य विनिक्षिपेत्त-
त्क्वाथोदकापूर्णमुखे च कुम्भे ॥ २७ ॥

त्रिविधं गन्धाष्टकमपि
शाक्तेयं वैष्णवं च शैवमिति ।

गन्धाष्टकेन शक्तिः
स्यात्कलशे मन्त्रिणा कृतेऽनन्ता ॥ २८ ॥

चन्दनकर्पूरागरु-
कुङ्कुमकपिमांसिरोचनाचोराः ।
गन्धाष्टकमपि शक्तेः
सांनिध्यकरं च लोकरञ्जनकृत् ॥ २९ ॥

चन्दनह्रीबेरागरु-
कुष्ठासृगुशीरमांसिमुरमपरम् ।
चन्दनकर्पूरागरु-
दलरुधिरकुशीतरोगजलमपरम्[1] ॥ ३० ॥

अष्टत्रिंशत्प्रभेदेन याः कलाः प्रागुदीरिताः ।
गुरूपदेशक्रमतस्ता विद्वान्विनियोजयेत् ॥ ३१ ॥

याः पञ्चाशत्कलास्तारपञ्चभेदसमुत्थिताः ।
पञ्चपञ्चकसंभिन्ना विदुस्तास्तत्त्ववेदिनः ॥ ३२ ॥

सप्तात्मकस्य तारस्य परौ द्वौ तु वरौ यतः ।
ततस्तु शक्तिशान्ताख्यौ न पठ्येते परैः सह ॥ ३३ ॥

1. ...रोगजमपरम्.

प्रथमप्रकृतेर्हंसः प्रतद्विष्णुरनन्तरः ।
त्रियम्बकस्तृतीयः स्याच्चतुर्थस्तत्पदादिकः ॥ ३४ ॥

विष्णुर्योनिमथेत्यादिः पञ्चमः कल्प्यतां मनुः ।
चतुर्नवतिमन्त्रात्मदेवमावाह्य[1] पूर्यताम् ॥ ३५ ॥

अत्र याः पञ्च संप्रोक्ता ऋचस्तारस्य पञ्चभिः ।
कलाप्रभेदैश्च मिथो युज्यन्ते ताः पृथक्क्रमात् ॥ ३६ ॥

कुर्यात्प्राणप्रतिष्ठां च तत्र तत्र समाहितः ।
प्राणप्रतिष्ठामन्त्रेण पुनस्तोयं कलात्मकम् ।
उच्चारयन्मूलमन्त्रं कलशे संनिधापयेत् ॥ ३७ ॥

अश्वत्थचूतपनस-
स्तबकैः सुत्रामवल्लरीयुक्तैः ।
सुरतरुधिया पिधाय
कुम्भमुखं वेष्टयीत वासोभ्याम् ॥ ३८ ॥

पुनस्तोयगतं देवं साध्यमन्त्रानुरूपतः ।
सकलीकृत्य च गुरुरुपचारान्समाचरेत् ॥ ३९ ॥

1. ...देवतावाह्य.

आसनस्वागते सार्घ्यपाद्ये साचमनीयके ।
मधुपर्काचमस्नानवसनाभरणानि च ॥ ४० ॥

सुगन्धसुमनोधूपदीपनैवेद्यवन्दनान् ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥ ४१ ॥

अर्घ्यपाद्याचमनकमधुपर्काचमान्यपि ।
गन्धादयो निवेद्यान्ता उपचारा दश क्रमात् ॥ ४२ ॥

गन्धादयो निवेद्यान्ता पूजा पञ्चोपचारिकी ।
सपर्यास्त्रिविधाः प्रोक्तास्तासामेकां समाश्रयेत् ॥ ४३ ॥

गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ।
दूर्वा चेति क्रमादर्घ्यद्रव्याष्टकमुदीरितम् ॥ ४४ ॥

पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्ताभिरुच्यते ।
जातीलवङ्गतक्कोलैर्मतमाचमनीयकम् ॥ ४५ ॥

मधुपर्कं च सक्षौद्रं दधि प्रोक्तं मनीषिभिः ।
शुद्धाभिरद्भिर्विहितं पुनराचमनीयकम् ॥ ४६ ॥

चन्दनागरुकर्पूरपङ्कं गन्धमिहोच्यते ।
अथवा लघुकाश्मीरपटीरमृगनाभिजम् ॥ ४७ ॥

तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरकौ ।
शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च ॥ ४८ ॥

उत्पलानि च नीलानि कुमुदानि च मालती ।
मल्लिकाकुन्दमन्दारनन्द्यावर्तादिकानि च ॥ ४९ ॥

पलाशपाटलीपार्थपारन्त्यावर्तकानि च ।
चम्पकानि सनागानि रक्तमन्दारकानि च ॥ ५० ॥

अशोकोद्भवबिल्वाब्जकर्णिकारोद्भवानि च ।
सुगन्धीनि सुरूपाणि स्वागमोक्तानि यानि वै ॥ ५१ ॥

मुकुलैः पतितैर्म्लानैर्जीर्णैर्वा जन्तुदूषितैः ।
आघ्रातैरङ्गसंस्पृष्टैरुषितैश्चापि[1] नार्चयेत् ॥ ५२ ॥

सगुग्गुल्वगरूशीरसिताज्यमधुचन्दनैः ।
साराङ्गारविनिक्षिप्तैर्मन्त्री नीचैः प्रधूपयेत् ॥ ५३ ॥

गोसर्पिषा वा तैलेन वर्त्या च लघुगर्भया ।
दीपितं सुरभिं शुद्धं दीपमुच्चैः प्रदापयेत् ॥ ५४ ॥

सुसितेन सुशुद्धेन पायसेन[2] सुसर्पिषा ।
सितोपदंशकदलीदध्याद्यैश्च निवेदयेत् ॥ ५५ ॥

---

1. ...संस्पृष्टैः पर्युषितैश्च; 2. यायतेन.

वर्णैर्मनुप्रपुटितैः क्रमशः शतार्धै-
न्यासक्रमादभियजेत्सकलासु मन्त्री ।
गन्धादिभिः प्रथमतो मनुदेवतासु
त्रैलोक्यमोहनमिति प्रथितः प्रयोगः ॥ ५६ ॥

हृदयं सशिरस्तथा शिखाथो
कवचं चेत्यनलादिकाश्रिषु ।
पुरतो नयनं दिशां क्रमात्स्या-
त्पुनरस्त्रं च समर्पयेत्क्रमात् ॥ ५७ ॥

हारस्फटिककलाया-
ञ्जनपिङ्गलवह्निरोचिषो ललनाः ।
अभयवरोद्यतहस्ताः
प्रधानतनवोऽङ्गदेवताः कथिताः ॥ ५८ ॥

आदावङ्गावरणं
सकलविधानेषु पूजनीयं स्यात् ।
अन्ते च लोकपाला-
वृतिरथ कुलिशादिकान्तं वा ॥ ५९ ॥

इन्द्राग्नियमनिशाचर-
वरुणानिलशशिशिवाहिपतिविधयः ।
जात्यधिपहेतिवाहन-
परिवारान्ताः क्रमेण यष्टव्याः ॥ ६० ॥

पीतः पिङ्गः कृष्णो
धूमः शुक्लश्च धूम्रसितशुक्लाः ।
काशारुणाम्बुजाभा
लोकेशा वासवादयः प्रोक्ताः ॥ ६१ ॥

वज्रः सशक्तिदण्डः
खड्गः पाशाङ्कुशौ गदाशूले ।
रथचरणनलिनसंज्ञे
प्रोक्तान्यस्त्राणि लोकपालानाम् ॥ ६२ ॥

पीतहिमजलदगगना-
च्चिरप्रभारक्तकुन्दनीलरुचः ।
[1]करवन्दारुणवर्णाः
प्रोक्ताः स्युर्वर्णतोऽपि वज्राद्याः ॥ ६३ ॥

1. अरविन्दारुण...

कृते निवेद्ये च ततो मण्डलं परितः क्रमात् ।
मङ्गलाङ्कुरपत्राणि स्थापनीयानि मन्त्रिणा ॥ ६४ ॥

उपलिप्य कुण्डमत्र
स्वचरणयोग्या विलिख्य रेखाश्च ।
अभ्युक्ष्य प्रणवजपेन[1]
प्रकल्पयेद्योगविष्टरं मन्त्री ॥ ६५ ॥

अथवा षट्कोणावृत-
त्रिकोणके गुरुजनोपदेशेन ।
प्राणाग्निहोत्रविधिना-
प्यावसथीयाह्वयेऽनलस्थाने ॥ ६६ ॥

तत्राथो सदृतुमतीमथेन्द्रियाभां
स्मृत्वा तां सकलजगन्मयीं च शक्तिम् ।
तद्योनौ मणिभवमारणेयकं वा
तारेण क्षिपतु गृहोत्थमेव वाग्निम् ॥ ६७ ॥

चितिपिङ्गलपदमुक्त्वा
हनदहपचयुग्मकानि सर्वज्ञम् ।

1. प्रणवजलेन.

आज्ञापयाग्निजाये

प्रभाष्य मनुनानलं ज्वलयेत् ॥ ६८ ॥

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णमनलं समिद्धं विश्वतोमुखम् ॥ ६९ ॥

अनेन ज्वलितं मन्त्रेणोपतिष्ठेद्धुताशनम् ।
ततः प्रविन्यसेद्देहे जिह्वामन्त्रैर्विभावसोः ॥ ७० ॥

सलिङ्गगुदमूर्धास्यनासानेत्रेषु च क्रमात् ।
सर्वाङ्गेषु च जिह्वाश्च वक्ष्यन्ते त्रिविधात्मकाः ॥ ७१ ॥

हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा ।
बहुरूपातिरक्ता च जिह्वाः सप्तेति सात्त्विकाः ॥ ७२ ॥

पद्मरागा सुवर्णा च तृतीया भद्रलोहिता ।
लोहिताख्या तथा श्वेता धूम्रिणी सकरालिका ॥ ७३ ॥

राजस्यः कथिता ह्येताः क्रमात्कल्याणरेतसः ।
विश्वमूर्तिस्फुलिङ्गिन्यौ धूम्रवर्णा मनोजवा ॥ ७४ ॥

लोहिता च करालाख्या काली तामसजिह्विका ।
अनलेरार्घिबिन्द्वन्तसादिवान्ताक्षरान्विताः ॥ ७५ ॥

सात्त्विक्यो दिव्यपूजासु राजस्यः काम्यकर्मसु ।
तामस्यः क्रूरकार्येषु प्रयोक्तव्या विपश्चिता ॥ ७६ ॥

सुराः सपितृगन्धर्वयक्षनागपिशाचिकाः ।
राक्षसाश्च क्रमादग्नेराश्रिता रसनास्वमी ॥ ७७ ॥

जिह्वासु त्रिदशादीनां तत्तत्कार्यसमाप्तये ।
जुहुयाद्वाञ्छितां सिद्धिं दद्युस्ता देवतामयाः ॥ ७८ ॥

स्वनामसदृशाकाराः प्रायो जिह्वा हविर्भुजः ।
मन्त्री प्रविन्यसेद्भूयो वह्नेरङ्गानि वै क्रमात् ॥ ७९ ॥

सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषस्तथा ।
धूमव्यापी सप्तजिह्वो धनुर्धर इतीरिताः ॥ ८० ॥

अङ्गमन्त्राः क्रमादष्टमूर्तिश्चाथ प्रविन्यसेत् ।
मूर्धा सपार्श्वकंट्यन्धुकटिपार्श्वांसकेषु च ॥ ८१ ॥

प्रादक्षिण्येन विन्यस्येद्यथावद्देशिकोत्तमः ।
जातवेदाः सप्तजिह्वो हव्यवाहन एव च ॥ ८२ ॥

अश्वोदरजसंज्ञश्च स वैश्वानर एव च ।
कौमारतेजाश्च तथा [1]विश्वेदेवमुखाह्वयौ ॥ ८३ ॥

1. विश्वदेवमुखाह्वयौ.

स्युरष्टमूर्तयो वह्नेरग्नये पदपूर्विकाः ।
प्रणवादिनमोऽन्ताश्च पुनर्दर्भचतुष्टयैः ॥ ८४ ॥

दिक्क्रमात्संपरिस्तीर्य सम्यग्गन्धादिभिर्यजेत् ।
मध्ये च कोणषट्के च जिह्वाभिः केसरेषु च ॥ ८५ ॥

अङ्गमन्त्रैस्ततो बाह्ये अष्टाभिर्मूर्तिभिः क्रमात् ।
ततोऽग्निमनुनानेन मन्त्री मध्ये च संयजेत् ॥ ८६ ॥

वैश्वानरं जातवेदमुक्त्वा चेहावहेति च ।
लोहिताक्षपदं सर्वकर्माणीति समीरयेत् ।
ब्रूयाच्च साधयेत्यन्ते वह्निजायान्तिको मनुः ॥ ८७ ॥

त्रिणयनमरुणप्राबद्धमौलिं सुशुक्लां-
शुकमरुणमनेकाकल्पमम्भोजसंस्थम् ।
अभिमतवरशक्तिस्वस्तिकाभीतिहस्तं
नमत कनकमालालंकृतांसं कृशानुम् ॥ ८८ ॥

जिह्वा ज्वालारुचः प्रोक्ता वराभययुतानि च ।
अङ्गानि मूर्तयः शक्तिस्वास्तिकोद्यतदोर्द्वयाः ॥ ८९ ॥

संस्कृतेन घृतेनाभिद्योतनोद्योतितेन[1] च ।
व्याहृत्यनन्तरं तेन जुहुयान्मनुना त्रिशः ॥ ९० ॥

---

1. अभिद्योतितोद्योतितेन.

गर्भाधानादिका वह्नेः समुद्वाहावसानिकाः ।
क्रियास्तारेण वै कुर्यादाज्याहुत्यष्टकैः पृथक् ॥ ९१ ॥

जिह्वाङ्गमूर्तिमनुभिरेकावृत्या हुनेत्तथा ।
जिह्वायां मध्यसंस्थायां मन्त्री ज्वालावली तनौ ॥ ९२ ॥

[1]ताराद्यैर्दशभिर्भेदैः पूर्वैः पूर्वैः समन्वितः ।
मनुना गाणपत्येन [2]हुनेत्पूर्वं दशाहुतीः ॥ ९३ ॥

जुहुयाच्च चतुर्वारं समस्तेनैव तेन तु ।
आज्येन संध्यमनुना पञ्चविंशतिसंख्यकम् ॥ ९४ ॥

जुहुयात्सर्वहोमेषु[3] सुधीरनलतृप्तये ।
तान्त्रिकाणामयं न्यायो हुतानां समुदीरितः ॥ ९५ ॥

पुनः साध्येन मनुना हुनेदष्टसहस्रकम् ।
अथवाष्टशतं सर्पिः संयुक्तेन पयोन्धसा ॥ ९६ ॥

द्रव्यैर्विधानप्रोक्तैर्वा महाव्याहृतिपश्चिमम् ।
पुनः समापयेद्धोमं परिषेकावसानिकम् ॥ ९७ ॥

भूर्भुवःस्वर्भूर्भुवस्वःपूर्वं स्वाहान्तमेव च ।
अग्नये च पृथिव्यै च महते च समन्वितम् ॥ ९८ ॥

---

1. ताराभिर्दशभिः प्रोक्तैः; 2. जुहुयात्; 3. जुहुयात्सर्वधर्मेषु.

वायवे चान्तरिक्षाय महते च समन्वितम् ।
आदित्याय च दिवे च महते च समन्वितम् ॥ ९९ ॥

चन्द्रमसे च दिग्भ्यश्च महते च समन्वितम् ।
महाव्याहृतयस्त्वेताः सर्वशो देवतामयाः ॥ १०० ॥

ब्रह्मार्पणाख्यमनुना पुनरष्टावथाहुतीः ।
जुहुयान्मन्त्रवर्येण कर्मबन्धविमुक्तये ॥ १०१ ॥

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः ।
जाग्रत्स्वप्नसुषुप्तीनामन्तेऽवस्थास्वितीरयेत् ॥ १०२ ॥

ततश्च मनसा वाचा कर्मणेति प्रभाषयेत् ।
हस्ताभ्यां च तथा पद्भ्यामुदरेण तु भाषयेत् ॥ १०३ ॥

शिश्ना च यत्कृतं प्रोक्त्वा यदुक्तं यत्स्मृतं तथा ।
तत्सर्वमिति संभाष्य ब्रह्मार्पणपदं वदेत् ॥ १०४ ॥

भवत्वन्ते द्विठश्चायं ब्रह्मार्पणमनुर्मतः ।
हुते तु देशिकः पश्चान्मण्डले बलिमारभेत् ॥ १०५ ॥

नक्षत्राणां सराशीनां सवाराणां यथाक्रमम् ।
दद्याद्बलिं गन्धपुष्पधूपपूर्वकमादरात् ॥ १०६ ॥

तारणामश्विनादीनां राशीः पादाधिकद्वयम् ।
मेषादिमुक्त्वा नक्षत्रसंज्ञां पूर्वमनन्तरम् ॥ १०७ ॥

देवताभ्यः पदं प्रोक्त्वा दिवानक्तपदं तथा ।
चारिभ्यश्चाथ सर्वेभ्यो भूतेभ्यश्च नमो वदेत् ॥ १०८ ॥

एवं राशौ तु संपूर्णे तस्मिंस्तद्वत्प्रयोजयेत् ।
तथा राश्यधिपानां च ग्रहाणां तत्र तत्र तु ॥ १०९ ॥

सप्तानां करणानां च दद्यान्मीनाह्वमेषयोः ।
अन्तराले बलिस्त्वेवं संप्रोक्तः कलशात्मकः ॥ ११० ॥

पुनर्निवेद्यमुद्धृत्य पुरोवत्परिपूज्य च ।
मुखवासादिकं दत्त्वा स्तुत्या तद्युक्तया पुनः ।
स्तुत्वा यथावत्प्रणमेद्भक्तियुक्तस्तु साधकः ॥ १११ ॥

दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा ।
वचसा मनसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥ ११२ ॥

बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यात्पूजासु प्रवराविमौ ॥ ११३ ॥

गुर्वाद्यास्तारादिका यागमन्त्रा
लोकेशान्तास्ते चतुर्थीनमोऽन्ताः ।

पूजायामप्यग्निकार्ये द्विठान्ता
बीजैः पूजा स्याद्विभक्त्या वियुक्तैः ॥ ११४ ॥

वाससी च पुनरङ्गुलिभूषां
होमकृत्सु मुखजप्रवरेषु ।
ईश्वरार्पणमिति प्रतिदत्त्वा
वर्धितो द्विजमुखेरितवाग्भिः ॥ ११५ ॥

नत्वा ततस्तनुभृते परमात्मने स्वं
द्रव्यार्धमेव गुरवे चतुरंशकं वा ।
दत्त्वा दशांशमथवापि च वित्तशाठ्यं
हित्वार्पयेन्निजतनुं तदधीनचेताः ॥ ११६ ॥

अथ पटुरवमुख्यवाद्यघोषै-
र्द्विजमुखनिष्पतदाशिषां रवेण ।
सुनियतमपि सुस्थितं च शिष्यं
कलशजलैरभिषेचयेद्यथावत् ॥ ११७ ॥

यथा पुरा पूरितमक्षरैर्घटैः
सुधामयैः शिष्यतनौ तथैव तैः ।
*P. 6

प्रपूरयन्मन्त्रिवरोऽभिषेचये-
दवाप्तये मङ्क्षु यथेष्टसंपदाम् ॥ ११८ ॥

विमले परिधाय वाससी
पुनराचम्य गुरुं प्रणम्य च ।
निकटे समुपासतो वदे-
दथ शिष्यस्य मनुं त्रिशो गुरुः ॥ ११९ ॥

गुरुणा समनुगृहीतं
मन्त्रं सद्यो जपेच्छतावृत्त्या ।
गुरुदेवतामनूना-
मैक्यं संभावयन्धिया शिष्यः ॥ १२० ॥

मन्त्रे मन्त्रगुरावपि
मन्त्री मन्त्रस्य देवतायां च ।
त्रिषु विहितसततभक्तिः
प्रेत्येह निजेप्सितं फलं लभते ॥ १२१ ॥

संक्षेपादिति गदिता हिताय दीक्षा
जन्तूणां प्रवरफलप्रदा चिराय ।

प्राप्यैनां जपविधिरादरेण कार्यो
विद्वद्भिः सहुतविधिं निजेष्टसिद्ध्यै ॥ १२२ ॥

प्रोक्तेनैवं कलशविधिनैकेन वानेककुम्भै-
र्भक्त्या यो वा सुमतिरभिषिञ्चेन्नरो मन्त्रजापी ।
कामान्प्राप्नोत्ययमिह परत्रापि किं तत्र चित्रं
लोकैश्चिन्त्यो न खलु मणिमन्त्रौषधीनां प्रभावः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे षष्ठः पटलः ॥

सप्तमः पटलः ॥

अथाक्षराणामधिदेवतायाः
समस्तबोधस्थितिदीपिकायाः ।
अशेषदुःखप्रशमाय नृणां
वक्ष्येऽजपादेः प्रवरं विधानम् ॥ १ ॥

ब्रह्मा स्यादृषिरीरितः सुमतिभिर्गायत्रमुक्तं च त-
च्छन्दस्त्वेऽपि सरस्वती निगदिता तन्त्रेषु तद्देवता ।
आद्यन्तस्वरषट्कलब्धपरयोरन्तस्थितैः कादिभि-
र्वर्गैर्यान्तगतैः क्रमेण कथितान्यस्याः षडङ्गानि च ॥२॥

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देशां[1] भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां पद्मसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥३॥

---

1. देहां.

काननवृत्तद्वयक्षि
 श्रुतिनोगण्डोष्ठदन्तमूर्धास्ये ।
दोःपत्संध्यग्रेषु च
 पार्श्वद्वयपृष्ठनाभिजठरेषु ॥ ४ ॥

हृद्दोर्मूलापरगल-
 कक्षेषु हृदादिपाणिपादयुगे ।
जठराननयोर्व्यापक-
 संज्ञा न्यस्येदथाक्षरान्क्रमशः ॥ ५ ॥

संदीक्षितो विमलधीर्गुरुणानुशिष्टो
 लक्षं न्यसेत्सुनियतः प्रजपेच्च तावत् ।
अन्ते हुतं प्रतिहुनेन्मधुरत्रयाक्तैः
 शुद्धैस्तिलैरभियजेद्दिनशोऽक्षरेशीम् ॥ ६ ॥

व्योमाविः स चतुर्दशस्वरविसर्गार्णस्फुरत्कर्णिकं
 किञ्जल्कालिखितस्वरं प्रतिदलप्रारब्धवर्गाष्टकम् ।
क्ष्माबिम्बेन च सप्तमार्णवयुजाश्राशासु संवेष्टितं
 वर्णाब्जं शिरसि स्मृतं विषगदप्रध्वंसि मृत्युंजयम् ॥ ७ ॥

प्रविधाय पद्ममिति पीठमथो
कथितक्रमेण विधिनाभियजेत् ।
नवभिश्च शक्तिभिरमुत्र समा-
वरणैः समर्चयतु वर्णतनुम् ॥ ८ ॥

मेधा प्रज्ञा प्रभा विद्या
धीर्धृतिस्मृतिबुद्धयः ।
विद्येश्वरीति संप्रोक्ता
भारत्या नव शक्तयः ॥ ९ ॥

अङ्गान्यादौ तदनु च कलायुग्मशश्चाष्टवर्गा-
न्ब्रह्माण्यादीञ्छतमखमुखानप्यथो लोकपालान् ।
मुख्यैर्गन्धैः प्रवरकुसुमैर्धूपदीपैर्निवेद्यै-
र्वर्णाञ्जापी यजतु दिनशो भारतीं भक्तिनम्रः ॥ १० ॥

ब्रह्माणी माहेशी
कौमारी वैष्णवी च वाराही ।
इन्द्राणी चामुण्डी
समहालक्ष्मीति मातरः प्रोक्ताः ॥ ११ ॥

वर्गस्वरयाद्यंशाः
 क्रमेण कलधौतरजतताम्राः स्युः ।
इति रचितं रुचकमिदं
 साधकसर्वार्थदायि सततं स्यात् ॥ १२ ॥

त्रिवारमम्भः परिजप्तमेतया
 पिबेद्दिनादावपि विद्यया सुधीः ।
अनेडमूकोऽपि कवित्वगर्वितः
 परां च कीर्तिं लभतेऽर्कमासतः ॥ १३ ॥

कमलोद्भवौषधिरसेव च या
 पयसा च पक्कमथ सर्पिरपि ।
अयुताभिजप्तममुना दिनशो
 लिहतां कविर्भवति वत्सरतः ॥ १४ ॥

वर्णौषध्याश्रिताभिः कलशममलधीरद्भिरापूरयित्वा
 प्रातस्तेनाभिषिञ्चेद्दशशतपरिजप्तेन यं वापि मासम् ।
स स्यान्मेधेन्दिरायुःप्रशमकवियशो विश्वसंवादयुक्तो
 नारी वन्ध्यापि नानागुणगणनिलयं पुत्रवर्यं प्रसूते ॥१५॥

आधारोद्यच्छक्तिबिन्दूत्थिताया
वक्त्रे मूर्धेन्दुप्रसन्त्याः प्रभायाः ।
क्षाद्यान्तार्णान्पातयेद्वह्निसोम-
प्रोतान्मन्त्री मुच्यते रोगजातैः ॥ १६ ॥

विन्यासैरथ सजपैर्हुताशनाद्यै-
र्ध्यानैश्च प्रभजति भारतीं नरो यः ।
स श्रीमान्भवति च मङ्क्षु काव्यकर्ता
क्ष्वेलादीञ्जयति जरापमृत्युरोगान् ॥ १७ ॥

कलाः कलानादभवा वदन्त्यजाः
कचादिवर्णानुभवाष्टतादिकान् ।
पयादिकान्माक्षरजाश्च बिन्दुजाः
क्रमादनन्तावधिकास्तु षादिकान् ॥ १८ ॥

कुर्यात्कलाभिराभि-
र्मन्त्री दिनशस्तनौ तथा न्यासम् ।
सांनिध्यकृत्समर्थः
प्रतिमाकलशादिषु प्रविज्ञेयः ॥ १९ ॥

मन्त्रोद्धारविधाने
 वर्णव्यत्यासकल्लप्तिरुद्दिष्टा ।
आभिः श्रीकण्ठादि-
 प्रोक्तैर्वा नामभिर्विशेषज्ञैः ॥ २० ॥

अष्टाक्षरोक्तमनुवर्यविशिष्टमूर्तिं
 संस्मृत्य विष्णुमपि मन्त्रितमो यथावत् ।
वर्णैर्न्यसेदपि पुरैव च केशवादि-
 मूर्त्या युतैर्वपुषि भक्तिभरावनम्रः ॥ २१ ॥

रुद्रादीञ्छक्तियुतान्न्यस्ये-
 द्याद्यांस्त्वगादिधातुयुगान् ।
श्रीकण्ठादौ विद्वा-
 न्वर्णान्प्राग्बीजसंयुतान्वापि ॥ २२ ॥

सिन्दूरकाञ्चनसमोभयभागमर्ध-
 नारीश्वरं गिरिसुताहरभूषाचिह्नम् ।
पाशाभयाक्षवलयेष्टदहस्तमेवं
 स्मृत्वा न्यसेत्सकलवाञ्छितवस्तुसिद्ध्यै ॥ २३ ॥

शक्त्या शक्तिश्रीभ्यां
शक्तिश्रीक्लीभिरन्वितैर्वर्णैः ।
श्रीशक्तियुगशराद्यै-
रथवाभिहितः समृद्धये न्यासः ॥ २४ ॥

अथानया पञ्चविभेदभिन्नया
प्रपञ्चयागस्य विधिः प्रवक्ष्यते ।
कृते तु यस्मिन्निह साधकोत्तमाः
प्रयान्ति निर्वाणपदं तदव्ययम् ॥ २५ ॥

पूर्वं महागणपतिं स्वविधानसिद्ध-
रूपं च साङ्गमपि सावरणं विचिन्त्य ।
बीजेन संयुतमृचा प्रजपेत[1] माला-
मन्त्रं निजेष्टविधयेऽवहितो यथावत् ॥ २६ ॥

स चतुश्चत्वारिंश-
द्वारं बीजं तथैकवारमृचम् ।
प्रजपेच्चतुरावृत्त्या
मालापूर्वं मनुं च मन्त्रितमः ॥ २७ ॥

1. प्रजपेन.

स मुनिश्छन्दोदैवत-
मपि साङ्गं मातृकां च विन्यस्येत् ।
प्रागभिहितेन विधिना
वारत्रितयं गृहांश्च सप्त तथा ॥ २८ ॥

वदने च बाहुपाद-
द्वितये जठरे च वक्षसि यथावत् ।
अर्काद्यान्विन्यस्ये-
त्क्रमेण मन्त्री स्वरादिवर्गेशान् ॥ २९ ॥

तारश्च शक्तिरजपा परमात्मबीजं
वह्नेःप्रिया च गदिता इति पञ्चमन्त्राः ।
एभिस्त्रितीयलिपिभिः कथितः प्रपञ्च-
यागाह्वयो हुतविधिः सकलार्थदायी ॥ ३० ॥

ब्रह्मा स्यादृषिरस्य
च्छन्दः परमान्विता च गायत्री ।
सकलपदार्थसदर्थं
परिपूर्णं देवता परंज्योतिः ॥ ३१ ॥

जायाग्नेर्हृदयमथो शिरश्च सोऽहं
हंसात्मा त्वथ च शिखा स्वयं च वर्म ।
ताराख्यं स्वमुदितमीक्षणं तथास्त्रं
प्रोक्तं स्याद्धरिहरवर्णमङ्गमेवम् ॥ ३२ ॥

अत्राकारहकाराद्यावाद्यौ शान्तान्त्यकौ मनू ।
हकारश्चाप्यकारश्च बिन्दुः सर्गी च साक्षरः ॥ ३३ ॥

साकारश्चात्ममन्त्रः षडिन्द्रियात्मक उच्यते ।
सकारौकारहकारा बिन्दुः पञ्चार्णको मनुः ॥ ३४ ॥

करणात्मसमायुक्तः परमात्माह्वयो मनुः ।
स्वाकारैर्हृदीर्घाभ्यां वह्निजायामनुर्मतः ।
वागादीन्द्रियसंभिन्नः सोऽयं पञ्चाक्षरात्मकः ॥ ३५ ॥

ब्रह्मा बृहत्तया स्या-
त्परमपदेन प्रकाशितः प्रवरः ।
गायकसंत्राणनतो
गायत्रं समुनिनिगदितं छन्दः ॥ ३६ ॥

परमन्यदतिशयं वा
ज्योतिस्तेजो निरूपितेऽन्यद्यत् ।

अतिशायि च नितरामिति
कथितैवं देवता परंज्योतिः ॥ ३७ ॥

स्वेति स्वर्गः स्वेति चात्मा समुक्तो
हेत्याहुतिर्हेति विद्याद्गतिं च ।
स्वर्गात्मावध्याातता धामशाखा[1]
वह्नेर्जाया यत्र हूयेत सर्वम् ॥ ३८ ॥

स इति परततं परं तु तेज-
स्त्वहमिति मय्युदिते मनोऽस्य यत्र ।
तदिति सकलचित्प्रकाशरूपं
कथितमिदं शिरसोऽपि मन्त्रमेवम् ॥ ३९ ॥

हमिति प्रकाशितोऽहं
स इति च सकलप्रकाशनिर्वाणम् ।
अतुलमनुष्णमशीतं
यत्तदितीत्थं प्रकाशितेह शिखा ॥ ४० ॥

प्रतिमध्य गुणत्रयानुबद्धं
सकलं स्थावरजङ्गमाभिपूर्णम् ।

1. स्वस्वर्गात्मास्याततधामशाखा.

स्वगुणैर्निजबिन्दुसन्ततात्मा-
खिललोकस्थितिवर्ममन्त्रमुक्तम् ॥ ४१ ॥

आद्यैस्त्रिभेदैस्तपनान्तिकैर्य-
त्सृजत्यजस्रं जगतोऽस्य भावम् ।
तेजस्तदेतन्मनुवर्यकस्य
नेत्रत्रयं सन्त उदाहरन्ति ॥ ४२ ॥

हृंकाराख्या धातु-
र्हरणार्थे साधकानभीष्टानि ।
संहरतीह यदेत-
त्तेजोरूपं तदस्त्रमन्त्रं स्यात् ॥ ४३ ॥

यदा लिपिविहीनोऽयं तदात्माष्टाक्षरः स्मृतः ।
एतत्सर्वप्रपञ्चस्य मूलमष्टाक्षरं स्मृतम् ॥ ४४ ॥

प्रपञ्चयागस्त्वमुना कृतो न्यासविधिः स्मृतः ।
वर्णैर्देहेऽनले द्रव्यैः कुर्याद्धुतविधिं द्विधा ॥ ४५ ॥

मातृकान्यासवत्सार्धं लिपिनाष्टाक्षरेण तु ।
नित्यं न्यसेत्संयतात्मा पञ्चाशद्वारमुत्तमम् ॥ ४६ ॥

पञ्चज्ञानेन्द्रियाबद्धाः सर्वास्तु लिपयो मताः ।
ताभिराराात्तनं सर्वं तत्तदिन्द्रियगोचरम् ॥ ४७ ॥

स्मर्तव्याशेषलोकान्तर्वर्ति यत्तेज ऐश्वरम् ।
ब्रह्माग्नौ जुहुयात्तस्मिन्सदा सर्वत्र वर्तिनि ॥ ४८ ॥

ब्रह्मात्मभिर्महामन्त्रैर्ब्रह्मविद्भिः समाहितैः ।
ब्रह्माग्नौ ब्रह्महविषा हुतं ब्रह्मार्पणं स्मृतम् ॥ ४९ ॥

एवं वर्णविभेदभिन्नमदृढं मांसास्रमज्जावृतं
देहं तत्क्षरमक्षरे सुविशदे सर्वत्र वर्तिन्यथ ।
हुत्वा ब्रह्महुताशने विमलधीस्तेजःस्वरूपी स्वयं
भूत्वा सर्वमनुं जपेदभियजेद्ध्यायेत्तथा तर्पयेत् ॥५०॥

शुद्धश्चापि सबिन्दुकस्त्वथ कलायुक्केशवाद्यस्तथा
श्रीकण्ठादियुतश्च शक्तिकमलामारैस्तथैकैकशः ।
न्यासास्ते दशधा पृथङ् निगदिताः स्युर्ब्रह्मयागान्तिकाः
सर्वे साधकसिद्धिसाधनविधौ संकल्पकल्पद्रुमाः ॥

प्रपञ्चयागस्तु विशेषतो विप-
त्प्रपञ्चसंसारविशेषयापकः ।

परश्च नित्यं भजतामयत्नतः
परस्य चार्थस्य निवेदकस्तथा ।। ५२ ।।

द्रव्यैर्यथा यैः क्रियते प्रपञ्च-
यागक्रिया तानि तथैव संपत् ।
यास्वप्यवस्थासु च ताश्च कृत्वा
प्राप्नोति यत्तत्कथयामि सर्वम् ।। ५३ ।।

प्रोक्तक्रमेण विघ्ना-
दिकमपि हुत्वा क्रमेण मन्त्रितमः ।
एकावृत्त्या जुहुया-
त्प्रपञ्चयागाह्वयं घृतेन ततः ।। ५४ ।।

अश्वत्थोदुम्बरजाः
प्लक्षन्यग्रोधसंभवाः समिधः ।
तिलसर्षपदोग्धघृता-
न्यष्ट द्रव्याणि संप्रदिष्टानि ।। ५५ ।।

एतैर्जुहोति नियुताधिकलक्षसंख्यं
मन्त्री ततोऽर्धमथवापि तदर्धकं यः ।

स त्वैहिकीं सकलसिद्धिमवाप्य वाञ्छा-
योग्यां [1]पुनः परतरां च परत्र याति ॥ ५६ ॥

एकद्विकत्रिकचतुष्कशताभिवृत्त्या
तांस्तान्समीक्ष्य विकृतिं प्रजुहोतु मन्त्री ।
क्षुद्रग्रहारिविषमज्वरभूतयक्ष-
रक्षःपिशाचजनिते महति प्रकोपे ॥ ५७ ॥

द्वादशसहस्रमथवा
तद्द्विगुणं वा चतुर्गुणं वाथ ।
जुहुयात्क्षुद्रग्रहरिपु-
विषमज्वरभूतसंभवे कोपे ॥ ५८ ॥

अयथाप्रतिपत्तिमन्त्रकाणां
प्रजपात्स्यादिह विस्मृतिर्नराणाम् ।
शमयेदचिरात्सहस्रवृत्त्या
मतिमान्वस्तुभिरेभिरेव जुह्वन् ॥ ५९ ॥

---

1. पदं परतरं.

*P. 7

एतैः सहस्रद्वितयाभिवृत्त्या
जुहोति यस्तु क्रमशो यथावत् ।
जयेत्क्षणेनैव स विस्मृतीश्च
सापस्मृतीः शापभवांश्च दोषान् ॥ ६० ॥

मधुरत्रयावसिक्तै-
रेतैर्लक्षं जुहोति यो मन्त्री ।
तस्य सुराधिपविभवो
महदृद्ध्या तृणलवायते नाचिरात् ॥ ६१ ॥

लक्षं तदर्धकं वा
मधुरत्रयसंयुतैर्हुनेदेतैः ।
अब्दत्रयादथार्वा-
क्त्रिभुवनमखिलं वशे कुरुते ॥ ६२ ॥

वश्यादीन्यपि कर्मा-
ण्यभिकाङ्क्षन्नेभिरेव सद्रव्यैः ।
जुहुयात्कार्ये गुरुता-
लाघवमभिवीक्ष्य योग्यपरिमाणम् ॥ ६३ ॥

लक्षं तिलानां जुहुयाद्यवानां
शान्त्यै श्रियेऽथो नलिनैश्च तावत् ।
दौग्ध्येन पुष्ट्यै यशसे घृतेन
वश्याय जातीकुसुमैश्च लोणैः ॥ ६४ ॥

शालीतण्डुलचूर्णकैस्त्रिमधुरासिक्तैः स्वसाध्याकृतिं
कृत्वाष्टोर्ध्वशताख्यमस्य शितधीः प्राणान्प्रतिष्ठाप्य च ।
न्यासोक्तक्रमतो निशासु जुहुयात्तां सप्तरात्रं नरो
नारीं वा वशमेति मङ्क्षु विधिना तेनैव लोणेन वा ॥

पञ्चाशदौषधिविपाचितपञ्चगव्य-
जाते घृतेन शतवृत्ति हुनेद्धुटाग्नौ ।
तावत्प्रजप्य विधिनाभिसमर्च्य सिद्धं
भस्माददीत सकलाभ्युदयावहं तत् ॥ ६६ ॥

अनुदिनमनुलिम्पेत्तेन किंचित्समद्या-
त्तिलकमपि विदध्यादुत्तमाङ्गे क्षिपेच्च ।
अनुततदुरितापस्मारभूतापमृत्यु-
ग्रहविषरहितः स्यात्प्रीयते च प्रजाभिः ॥ ६७ ॥

एकादशार्धकणिकां वरकाञ्चनस्य
दद्यात्तदैव गुरवेऽथ सहस्रहोमे ।
अर्धोर्ध्वपञ्चकणिका द्विकणा च सार्धा
स्याद्दक्षिणेह कथिता मुनिभिस्त्रिधैव ॥ ६८ ॥

निजेप्सितं दिव्यजनैः सुरद्रुमा-
त्समस्तमेव प्रतिलभ्यते यथा ।
प्रपञ्चयागादपि साधकैस्तथा
करप्रचेयाः सकलार्थसंपदः ॥ ६९ ॥

अथ हितविधये विदुषां
वक्ष्ये प्राणाग्निहोत्रविहितविधिम् ।
बद्ध्वा पद्मासनमृजु-
कायो मन्त्री विशेत्पुरोवदनः ॥ ७० ॥

शक्तेः सत्त्वनिबद्धमध्यमथ तन्मायारजोवेष्टितं
प्राग्रक्षोऽनिलदिग्गताश्रजठरं मध्ये च नाभेरधः ।
मध्यप्राग्वरुणेन्द्रयाम्यलसितैः कुण्डैर्ज्वलद्वह्निभिः
मूलाधारमनारतं समतलं योगी स्मरेत्सिद्धये ॥ ७१ ॥

मध्येन्द्रवरुणशशियम-
दिग्गतानि क्रमेण कुण्डानि ।
आवसथजसभ्याहवनी-
यान्वाहार्यगार्हपत्यानि ॥ ७२ ॥

चिद्रूपात्सकलप्रभाप्रभवकान्मूलप्रकृत्यात्मनः
कल्पार्कात्प्रतिलोमतोऽमृतमयीं ज्योतीरुचाच्छां धिया ।
स्पृष्टामक्षरमालिकां तु जुहुयात्कुण्डेषु तेषु क्रमा-
त्कल्पान्ताग्निशिखास्फुरत्कुहरकेष्वास्राविता[1] वर्णशः ॥

क्षाद्यास्ते सप्तवर्गा मरकतपशुमेदाह्वनीलाभवर्णा
भूयः स्युर्विद्रुमाभाः कुलिशसमरुचः पुष्यवैडूर्यभासः ।
सर्वे ते पञ्चशोभी स्रवदमृतमया व्यापकाः स्पर्शसंज्ञा
मुक्तामाणिक्यरूपाः सुमतिभिरुदिताश्चाष्टशः स्युः स्वराख्यः ॥

एतानि केतोरमृताकरारे-
र्मन्दस्य रक्तस्य च भार्गवस्य ।
गुरुज्ञसोमांशुमतां क्रमेण
नवानि रत्नानि विदुर्नवानाम् ॥ ७५ ॥

1. ...आश्राविता.

इत्येवं हुतविधिमन्वहं दिनादौ
ये सम्यग्विदधति मन्त्रिणः शतार्धम् ।
ते रत्नैरपि कनकांशुकैः सधान्यैः
संपन्नाः सकलजगत्प्रिया भवन्ति ॥ ७६ ॥

अन्त्यशवर्गान्त्यासे[1]
वामश्रवणान्यथावसथजाते ।
असितपवर्गचतुर्था-
सूक्ष्माः[2] सभ्याह्वये च सश्रोत्राः[3] ॥ ७७ ॥

हलयुतवर्गतृतीयौ
पराः सशान्तीश्च पश्चिमे वह्नौ ।
भृगुरेफफादिपञ्चक-
सद्यातिथिलोचनानि सव्येऽग्नौ ॥ ७८ ॥

मज्जात्वग्वर्गादिक-
भौतिकभाराह्वयप्रतिष्ठांश्च ।
गार्हपत्ये जुहुया-
दित्युक्तं होमकर्मवर्णानाम् ॥ ७९ ॥

1. अन्त्यशवर्गान्त्यासो; 2. सूक्ष्मान्; 3. सश्रोत्रान्.

व्योम्ना मध्ये स्थितेऽग्नावखिलमविरतं शब्दमैन्द्रेऽनिलेन
स्पर्शं स्वेनैव रूपं पुनरपरभवे सौम्यजेऽद्भी रसं च ।
याम्ये गन्धं पृथिव्योभयरुचिरुचिरैरक्षरौघैर्हुनेद्यो[1]
मन्त्री स्यात्सर्ववेद्यप्रतिमथनसमुद्भासितप्रत्यगात्मा ॥

सतारशक्त्याद्यजपान्तमेवं
हुत्वा महात्माथ शतार्धसंख्यम् ।
विन्यस्य तावच्च तथैव सूत्र-
मात्राकृतिर्नित्यतनुश्च भूयात् ॥ ८१ ॥

कल्पादित्यमुखस्वमूलविलसत्कल्पानलान्तस्फुर-
च्चन्द्रार्कग्रहकालभूतभुवनब्रह्मेशविष्णवादिकः ।
अव्यक्तोऽक्षरसंज्ञकोऽमृतमयस्तेजोद्वयोद्यत्प्रभो
नित्यानन्दमयस्त्वनादिनिधनो यः स्यात्स हंसात्मकः ॥

अनुदिनममुना भजतां
विधिनाहारक्रियासु मन्त्रविदां ।
प्राणाद्याः स्युर्मरुतो
गार्हपत्यादिकानि कुण्डानि ॥ ८३ ॥

---

1. ...रुचिरैष्वक्षरौघै...

सप्तम्यन्तां च कुण्डाख्यामाख्यां च मरुतामपि ।
हिरण्या गगना रक्ता कृष्णाभिर्वर्णमीरयेत् ॥ ८४ ॥

सप्तप्रभाभिः सहिताः शुचयः पावका इति ।
अग्निं विहृत्य चेत्येवमात्मानमुपचर्य च ॥ ८५ ॥

ऊर्ध्वाधस्तिर्यगूर्ध्वाधस्तिर्यक्समथो वदेत् ।
गच्छतूक्त्वा ठयुग्मं च पञ्चाग्नीन्संस्मरेत्ततः ॥ ॥ ८६ ॥

हुताहुतिसमुद्दीप्तशिखासंयुक्तरोचिषः ।
गार्हपत्यादिकं भूय उपचर्यान्तमेव च ॥ ८७ ॥

मन्त्रं सर्वमनुक्रम्य जिह्वाः संस्मृत्य सर्वशः ।
बहुरूपां तु संकल्प्य पञ्चानलशिखायुताम् ॥ ८८ ॥

अहं वैश्वानरो भूत्वा जुहोम्यन्नं चतुर्विधम् ।
पचाम्येवं विधानेनेत्यापूर्णं संयतेन्द्रियः ॥ ८९ ॥

तूष्णीं हुत्वा पिधायाद्भिरुपस्पृश्य विधानतः ।
आरभ्य मूलाधारं स्वमामस्तकमनुस्मरेत् ॥ ९० ॥

क्षेत्रज्ञसंज्ञकममुं प्रकृतिस्थमाद्यं
　व्याप्तद्विसप्तभुवनान्तमनन्तमेकम् ।
पञ्चाननाग्निरसनापरिदत्तशुद्ध-
　सांनाय्यतर्पितमतर्कितमात्मरूपम् ॥ ९१ ॥

संचिन्त्य क्षरितामृताक्षरशताधाम्भोऽवसिक्तं हवि-
　स्तैर्जप्त्वा कुटिलान्तराधिरधिकं संदीप्तपञ्चानलः ।
सायंप्रातरनेन होमविधिना भोज्यानि नित्यं भज-
　न्प्राणी न प्रमदोदरं प्रविशति प्राणाग्निहोत्री पुनः ॥ ९२ ॥

इति तव सषडङ्गवेदशाखा-
　द्युपहितसर्वविकारसंघमाहुः ।
तनुरियमुदिता विरिञ्चविश्व-
　स्थितिलयसृष्टिकरीह वर्णमाला ॥ ९३ ॥

इति जगदनुषक्तां तामिमां वर्णमालां
　न्यसत जपत भक्त्या जुहुताभ्यर्चयीत ।
निरुपमकवितायुःकीर्तिकान्तीन्दिराप्त्यै
　सकलदुरितरोगोच्छित्तये मुक्तये च ॥ ९४ ॥

इतीरिता सकलजगत्प्रभाविनी
क्रमोत्क्रमक्रमगुणितार्णमालिका ।
अभीष्टसाधनविधये च मन्त्रिणां
भवेन्मनुप्रतिपुटिताक्षमालिका ॥ ९५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे सप्तमः पटलः ॥

अष्टमः पटलः ॥

अथ प्रवक्ष्यामि सुदुर्लभास्यै

विद्यां विशिष्टां त्रिपुराभिधानाम् ।

[1]धात्रीप्रभेदापि जगत्यवाप्त-

त्रिंशत्प्रकारा[2] त्रिदशाभिवन्द्या ॥ १ ॥

त्रिमूर्तिसर्गाच्च पुराभवत्वा-

त्त्रयीमयत्वाच्च पुरैव देव्याः ।

लये त्रिलोक्या अपि पूरणत्वा-

त्प्रायोऽम्बिकायास्त्रिपुरेति नाम ॥ २ ॥

व्योमेन्दुवह्न्यधरबिन्दुभिरेकमन्य-

द्रक्ताच्छकेन्द्रशिखिभिः सरमार्धचन्द्रैः ।

अन्यद्द्यु शीतकरपावकमन्वमन्तै-

र्बीजैरमीभिरुदिता त्रिपुरेति विद्या ॥ ३ ॥

---

1. सा त्रिभेदापि; 2. त्रिंशत्प्रभेदा.

वागैश्वर्यातिशयदतया वाग्भवं बीजमुक्तं
त्रैलोक्यक्षोभणवशताकृष्टिदं कामराजम् ।
शाक्तं क्ष्वेलापहरणकविताकारकं मन्त्रमेत-
त्प्रोक्तं धर्मद्रविणसुखमोक्षप्रदं साधकानाम् ॥ ४ ॥

नाभेरथाचरणमाहृदयाच्च नाभिं
मूर्ध्नस्तथा हृदयमित्यमुना क्रमेण ।
बीजैस्त्रिभिर्न्यसतु हस्ततले च सव्ये
दक्षाह्वये द्वितयमप्युभये तृतीयम् ॥ ५ ॥

मूर्धनि गुह्यहृदोरपि
नेत्रत्रितये च कर्णयोरास्ये ।
अंसद्वये च पृष्ठे
कूर्परयोर्नाभिमण्डले न्यस्येत् ॥ ६ ॥

वाग्भवेन पुनरङ्गुलीष्वथो
विन्यसेच्च पुनरुक्तमार्गतः ।
अङ्गषट्कममुना विधाय त-
द्देवतां विशदधीर्विचिन्तयेत् ॥ ७ ॥

आताम्रार्कायुताभां कलितशशिकलारञ्जितम्रां त्रिणेत्रां
देवीं पूर्णेन्दुवक्त्रां विधृतजपपटीपुस्तकाभीत्यभीष्टाम् ।
पीनोत्तुङ्गस्तनार्ता वलिलसितविलग्नामसृक्पङ्कराज-
न्मुण्डस्रङ्मण्डिताङ्गीमरुणतरदुकूलानुलेपां नमामि ॥ ८ ॥

दीक्षां प्राप्य विशिष्टलक्षणयुजः सत्संप्रदायाद्गुरो-
र्लब्ध्वा मन्त्रममुं जपेत्सुनियतस्तत्त्वार्धलक्षावधि ।
स्वाद्वक्तैश्च नवैः पलाशकुसुमैः सम्यक् समिद्धेऽनले
मन्त्री भानुसहस्रकं प्रति हुनेदश्वारिसूनैरपि ॥ ९ ॥

प्राणायामैः पवित्रीकृततनुरथ मन्त्री निजाधारराज-
द्योनिस्थां दिव्यरूपां प्रमुदितमनसाभ्यर्चयित्वोपचारैः ।
आबद्धा योनिमुद्रामपि निजगुदलिङ्गान्तरस्थां प्रदीप्तां
भूयो द्रव्यैः सुशुद्धैररुणरुचिभिरित्यारभेद्बाह्यपूजाम् ॥१०॥

वामादिशक्तिसहितं परिपूज्य पीठं
तत्र प्रकल्प्य विधिवन्नवयोनिचक्रम् ।
योनौ निधाय कलशं त्वथ मध्यगाया-
मावाह्य तां भगवतीं प्रयजेत्क्रमेण ॥ ११ ॥

वह्नेः पुरद्वितयवासवयोनिमध्य-
संबद्धवह्निवरुणेशसमाश्रिताश्री ।
देव्यर्चनाय विहितं मुनिभिः पुरैव
लोके सुदुर्लभमिदं नवयोनिचक्रम् ॥ १२ ॥

वामा ज्येष्ठा रौद्रिका साम्बिकेच्छा-
ज्ञानाभिख्या सक्रिया कुब्जिकाह्वा ।
वह्नी चान्या स्याद्विषघ्नी च दूत-
र्याह्वा सर्वानन्दका शक्तयः स्युः ॥ १३ ॥

प्राङ्मध्ययोन्योः पुनरन्तराले
संपूजयेत्प्राग्गुरुपादपङ्क्तिम् ।
पराभिधानामपराह्वयां च
परापराख्यामपि वाग्भवादिम् ॥ १४ ॥

तेनैव चाङ्गानि विदिग्दिशासु
मन्त्री यथोक्तक्रमतः प्रपूज्य ।
तन्मध्ययोनेरभितः शरांश्च
संपूजयेत्पञ्चममग्रभागे ॥ १५ ॥

सुभगा भगा[1] भगान्ते
  सर्पिणि भगमालिनी[2] अनङ्गाह्वा ।
तत्पूर्वकुसुमसंज्ञा
  तदादिके चाथ मेखलामदने ॥ १६ ॥

संपूज्य योनिषु च मातृगणं सचण्डि-
  कान्तर्दलेष्वभियजेदसिताङ्गकाद्यैः ।
तैर्भैरवैः सह सुगन्धसुपुष्पधूप-
  दीपादिकैर्भगवतीं प्रवरैर्निवेद्यैः ॥ १७ ॥

असिताङ्गाख्यो रुरुरपि
  चण्डः क्रोधाह्वयस्तथोन्मत्तः ।
सकपालिभीषणाख्यः
  संहारश्चाष्टभैरवाः कथिताः ॥ १८ ॥

इति क्रमात्या विहिताभिषेकः
  संप्रीणयित्वा द्रविणैर्गुरुं च ।
जप्त्वार्चयित्वोक्ततयाथ हुत्वा
  युञ्जीत योगांश्च गुरूपदिष्टान् ॥ १९ ॥

---

1. भगां; 2. भगमालिनीमनङ्गाह्वा.

अच्छाभः स्वच्छवेषो[1] धरणिमयगृहे वाग्भवं लक्षमेकं
यो जप्यात्तद्दशांशं विहितहुतविधिर्मन्त्रजप्ताञ्जनादिः ।
काव्यैर्नानार्थवृत्तैस्त्रिभुवनमखिलं पूरयेन्मन्त्रजापी[2]
मारार्त्ता विह्वलाभिः पुनरयमनिशं सेव्यते सुन्दरीभिः ॥

रक्ताकल्पोऽरुणतरदुकूलार्तवालेपनाढ्यो[3]
मौनी भूसद्मनि सुखनिविष्टो जपेल्लक्षमेकम् ।
बीजं मन्त्री रतिपतिमयं प्रोक्तहोमावसाने
योऽसौ लोके स सुरमनुजैः पूज्यते सेव्यते च ॥

ससुरासुरसिद्धयक्ष-
विद्याधरगन्धर्वभुजंगचारणानाम् ।
प्रमदामदवेगतो विकीर्णा-
भरणाः स्रस्तदुकूलकेशजालाः ॥ २२ ॥

[4]अतिदुःसहमन्मथव्यथाभिः
प्रथितान्तःपरितापवेपिताङ्ग्यः ।
घनघर्मजतोयबिन्दुमुक्ता-
फलसक्तोरुकुचान्तबाहुमूलाः ॥ २३ ॥

1. स्वच्छभूषो; 2. पूरयेच्च स्वकीयैः; 3. ...लेपहृद्यो.
4. अतिदुःसहमन्मथाभिघातव्यथिता...

रोमाञ्चकञ्चुकितगात्रलताघनोद्य-
दुत्तुङ्गपीनकुचकुम्भनिपीडिताङ्गयः ।
औत्सुक्यभारपृथुवेपथुखेदसन्न-
पादारविन्दचलनस्खलनाभियाताः ॥ २४ ॥

मारसायकनिपातदारिता
रागसागरनिमग्नमूर्तयः ।
श्वासमारुततरङ्गिताधरा
बाष्पपूरभरविह्वलेक्षणाः ॥ २५ ॥

मस्तकारचितदोर्द्वयाञ्जलि-
प्राभृता हरिणशावलोचनाः ।
वाञ्छितार्थकरणोद्यताश्च त-
दृष्टिपातमभि संनमन्ति ताः ॥ २६ ॥

धरापवरके तथा जपतु लक्षमन्यं मनुं
सुशुक्लकुसुमांशुकाभरणलेपनाढ्यो वशी ।
अमुष्य वदनादनारततयोच्चरेद्भारती
विचित्रपदपद्धतिर्भवति चास्य लोको वशे ॥ २७ ॥

*P. 8

पलाशपुष्पैर्मधुरत्रयाक्तै-
होंमं विदध्यादयुतावधिं यः ।
सरस्वतीमन्दिरमाशु भूया-
त्सौभाग्यलक्ष्म्योश्च स मन्त्रजापी ॥ २८ ॥

राजीकरञ्जाह्वशमीवटोत्थैः
समिद्वरैर्बिल्वभवैः प्रसूनैः ।
त्रिस्वादुयुक्तैर्हवनक्रियाशु
नरेन्द्रनारीनररञ्जनी स्यात् ॥ २९ ॥

मालतीवकुलजैर्दलैर्दलै-
श्चन्दनाम्भसि घने निमज्जितैः ।
श्रीकरीकुसुमकैर्हुतक्रिया
सैव चासु कविताकरी मता ॥ ३० ॥

अनुलोमविलोममन्त्रमध्य-
स्थितसाध्याह्वयुतं प्रजप्य मन्त्री ।
पटुसंयुतया जुहोतु राज्या
नरनारीनरपान्वशे विधातुम् ॥ ३१ ॥

मधुरत्रयेण सह विल्वजैः फलै-
र्हवनक्रियाशु जनतानुरञ्जनी ।
अपि सैव साधकसमृद्धिदायिनी
दिनशो विशिष्टकमलाकरी मता ॥ ३२ ॥

खण्डैः सुधालतोत्थै-
स्त्रिमधुरयुक्तैर्जुहोतु मन्त्रितमः ।
सकलोपद्रवशान्त्यै
जरापमृत्युप्रणोदनाय वशी ॥ ३३ ॥

फुल्लैर्बिल्वप्रसूनैस्तदभिनवदलै रक्तवाराहिपुष्पैः
प्रत्यग्रैर्बन्धुजीवैररुणसरसिजैरुत्पलैः कैरवाह्वैः ।
नन्द्यावर्तैः सकुन्दैर्नृपतरुकुसुमैः पाटलीनागपुष्पैः
स्वाद्वक्तैरिन्दिराप्त्यै जुहुत च दिनशः सर्पिषा पायसेन ॥

मूलाधारात्स्फुरन्तीं शिखिपुरपुटवीतां प्रभां विद्युदाभा-
मार्कात्तन्मध्यगेन्दोः स्रवदमृतमुचा धारया मन्त्रमय्या ।
सद्यः संपूर्यमाणां त्रिभुवनमखिलं तन्मयत्वेन मन्त्री
ध्यायन्मुच्येत वैरूप्यकदुरितजरारोगदारिद्र्यदोषैः ॥ ३५ ॥

वह्नेर्बिम्बद्वयपरिवृताधारसंस्थं समुद्य-
द्बालार्काभं स्वरगणसमावेष्टितं वाग्भवाख्यम् ।
वाण्या स्वीयाद्वदनकुहरात्संततं निःसरन्त्या
ध्यायेन्मन्त्री प्रततकिरणप्रावृतं दुःखशान्त्यै ॥ ३६ ॥

हृत्पद्मस्थितभानुबिम्बविलसद्योन्यन्तरालोदितं
मध्याह्नार्कसमप्रभं परिवृतं वर्णैः कभाद्यन्तगैः ।
ध्यायेन्मन्मथराजबीजमखिलब्रह्माण्डविक्षोभकं
राज्यैश्वर्यविनिन्दिनीमपि रमां दत्त्वा जगद्रञ्जयेत् ॥३७॥

मूर्ध्नोऽथ द्वादशान्तोदितशशधरबिम्बस्थयोनौ स्फुरन्तं
संवीतं व्यापकार्णैर्धवलरुचि मकारस्थितं बीजमन्त्यम् ।
ध्यात्वा सारस्वताच्छामृतजलललितं दिव्यकाव्यादिकर्ता
नित्यं क्ष्वेलापमृत्युग्रहदुरितविकारान्निहन्त्याशु मन्त्री ॥

योनेः परिभ्रमितकुण्डलिरूपिणीं तां
रक्तामृतद्रवमुचा निजतेजसैव ।
व्योमस्थलं सकलमप्यभिपूर्य तस्मि-
न्नावेश्य मङ्क्षु वशयेद्वनिता नरांश्च ॥ ३९ ॥

गुह्यस्थितं वा मदनस्य बीजं
जपारुणं रक्तसुधाः [1]स्रवन्तम् ।
विचिन्त्य तस्मिन्विनिवेश्य साध्यां
वशीकरोत्येव [2]विदग्धलोकम् ॥ ४० ॥

अन्त्यं बीजमथेन्दुकुन्दधवलं[3] संचिन्त्य चित्ताम्बुजे
तद्भूतां धृतपुस्तकाक्षवलयां देवीं मुहुस्तन्मुखात् ।
उद्यन्तं निखिलाक्षरं निजमुखे नानारसस्रोतसा
निर्यान्तं च निरस्तसंहृतिभयो भूयात्स वाग्वल्लभः ॥४१॥

संक्षेपतो निगदिता त्रिपुराभिधाना
विद्या सजापहवना सविधानपूजा ।
सोपासना च सकलाभ्युदयप्रसिद्ध्यै
वाणीरमाप्तिविधये जगतो हिताय ॥ ४२ ॥

विद्येशीं त्रिपुरामिति [4]प्रतिजपन्यो वा भवेन्नित्यश-
स्तद्वक्त्रादथ नूतनार्थविशदा वाणी सदा निःसरेत् ।
संपत्त्या नृपनन्दिनी ततयशःपूरा भवेदिन्दिरा
तस्यासौ प्रतियाति सर्वमुनिभिः संप्रार्थनीयं पदम् ॥४३॥

---

1. द्रवन्तम्; 2. विदग्धलोकः; 3. ०विशदं; 4. प्रतिभजन्;

मध्ये वद्यक्षरयोः
सदवदवाग्वक्षरा निचन्द्रयुगे ।
प्रोक्ता दशाक्षरीयं
कण्वविराजौ च [1]वागृषिप्रभवाः ॥ ४४ ॥

कश्रोत्रनयननासा-
वदनान्धुगुदेषु विन्यसेद्वर्णान् ।
स्वरपुटितैरथ हलिभः
कुर्यादङ्गानि षट् क्रमान्मन्त्री ॥ ४५ ॥

अमलकमलसंस्था लेखिनीपुस्तकोद्य-
त्करयुगलसरोजा कुन्दमन्दारगौरा ।
धृतशशधरखण्डोल्लासिकोटीरचूडा[2]
भवतु भवभयानां भङ्गिनी भारती वः ॥ ४६ ॥

अक्षरलक्षजपान्ते
जुहुयात्कमलैः सितैः पयोभ्यक्तैः ।
त्रिमधुरयुतैः सुशुद्धै-
रयुतं नियतात्मकस्तिलैरथ वा ॥ ४७ ॥

---

1. वागृषिप्रमुखाः. 2. कोटीरजूटा.

मातृकोक्तविधिनाक्षराम्बुजे
  शक्तिभिश्च विनियुज्य पूर्ववत् ।
पीठमन्त्रवचसा महेश्वरीं
  पूजयेत्प्रथममङ्गमन्त्रकैः ॥ ४८ ॥

योगा सत्या विमला
  ज्ञाना बुद्धिः स्मृतिस्तथा मेधा ।
प्रज्ञेत्याभिर्मातृभि-
  रपि लोकेशैः प्रपूजयेत्क्रमशः ॥ ४९ ॥

इति सिद्धमनुर्मनोजदूरो
  नचिरादेव कविर्भवेन्मनस्वी ।
जपहोमरतः सदावगच्छे-
  द्वनितां वागधिपेति गौरवेण ॥ ५० ॥

न्यासान्वितो निशितधीः प्रजपेत्सहस्र-
  मह्नो मुखेऽनुदिवसं प्रपिबेत्तदापः ।
तन्मन्त्रिताः [1]पुनरयत्नत एव वाचः
  सिद्धिर्भवेदभिमता परिवत्सरेण ॥ ५१ ॥

---

1. अयन्त्रितमेव.

हृदयद्वयसे स्थितोऽथ तोये
रविबिम्बे प्रतिपद्य वागधीशाम् ।
जपतस्त्रिसहस्रसंख्यमर्वा-
क्कविता मण्डलतो भवेत्प्रभूता ॥ ५२ ॥

पलाशबिल्वप्रसवैस्तयोश्च
समिद्वरैः स्वादुयुतैश्च होमः ।
कवित्वसौभाग्यकरः समृद्ध-
लक्ष्मीप्रदो रञ्जनकृच्चिराय ॥ ५३ ॥

चतुरङ्गुलजैः समित्प्रसूनै
र्जुहुयाद्यो मधुरत्रयावसिक्तैः ।
मनुजः समवाप्य धीविलासा-
नचिरात्काव्यकृतां भवेत्पुरोगः ॥ ५४ ॥

सुविमलनखदन्तपाणिपादो
मुदितमनाः परदूषणेषु मौनी ।
हरिहरकमलोद्भवाङ्घ्रिभक्तो
भवति चिराय सरस्वतीनिवासः ॥ ५५ ॥

आद्यन्तप्रणवगशक्तिमध्यसंस्था

वाग्भूयो भवति सरस्वतीचडेन्ता ।

नत्यन्तो मनुरयमीशसंख्यवर्णः

संप्रोक्तो भुवि भजमानपारिजातः ॥ ५६ ॥

[1]स सुषुम्नाग्रे भ्रूयुग-

मध्ये नवके तथैव रन्ध्राणाम् ।

विन्यस्य मन्त्रवर्णा-

न्कुर्यादङ्गानि षट्[2]क्रमाद्वाचा ॥ ५७ ॥

हंसारूढा [3]हरहसितहारेन्दुकुन्दावदाता

वाणी मन्दस्मितयुतमुखी मौलिबद्धेन्दुलेखा ।

विद्या वीणामृतमयघटाक्षस्रगादीप्तहस्ता

शुभ्राब्जस्था भवदभिमतप्राप्तये भारती स्यात् ॥

दिनकरलक्षं प्रजपे-

न्मन्त्रमिमं संयतेन्द्रियो मन्त्री ।

द्वादशसहस्रकमथो

सितसरसिजनागचम्पकैर्जुहुयात् ॥ ५९ ॥

1. सौषुम्नाग्रे ; 2. क्रमान्मन्त्री ; 3. भसितहरहारेन्दु०

पूजायां पार्श्वयुगे
ससंस्कृता प्राकृता च वाग्देव्याः ।
केवलवाङ्मयरूपा
संपूज्याङ्गैश्च शक्तिभिस्तदनु ॥ ६० ॥

प्रज्ञा मेधा श्रुतिरपि
शक्तिः स्मृत्याह्वया च वागीशी ।
[1]सुमतिः स्वस्तिरिहाभि-
र्मातृभिराशेश्वरैः क्रमात्प्रयजेत् ॥ ६१ ॥

इति निगदितो वागीश्वर्याः सहोमजपार्चना-
विधिरनुदिनं मन्त्री त्वेनां भजन्परिमुच्यते ।
सकलदुरितैर्मेधालक्ष्मीयशोभिरवाप्यते
परमपरमां भक्तिं प्राप्योभयत्र च मोदते ॥ ६२ ॥

इति मातृकाविभेदा-
न्प्रभजन्मन्त्रवयं च मन्त्रितमः ।
प्रजपेदेनां स्तुतिमपि
दिनशो वाग्देव्यनुग्रहाय बुधः ॥ ६३ ॥

---

1. सुमतिस्वस्तिभिराभिः

अमलकमलाधिवासिनि
मनसो वैमल्यदायिनि मनोज्ञे ।
सुन्दरगात्रि सुशीले
तव चरणाम्भोरुहं नमामि सदा ॥ ६४ ॥

अचलात्मजा च दुर्गा
कमला त्रिपुरेति भेदिता जगति ।
या सा त्वमेव वाचा-
मीश्वरि सर्वात्मना प्रसीद मम ॥ ६५ ॥

त्वच्चरणाम्भोरुहयोः
प्रणामहीनः पुनर्द्विजातिरपि ।
भूयादनेडमूक-
स्त्वद्भक्तो भवति देवि सर्वज्ञः ॥ ६६ ॥

[1]मूलाधारमुखोद्गत-
बिसतन्तुनिभप्रभाप्रभावतया ।
विधृतलिपिव्राताहित-
मुखकरचरणादिके प्रसीद मम ॥ ६७ ॥

1. अयं श्लोकः प्रक्षिप्त इति कश्चिद्व्याख्याता.

वर्णतनोऽमृतवर्णे
नियतमनिर्वर्णितेऽपि योगीन्द्रैः ।
निर्णीतिकरणदूरे
वर्णयितुं देवि देहि सामर्थ्यम् ॥ ६८ ॥

ससुरासुरमौलिलस-
न्मणिप्रभादीपिताङ्घ्रियुगनलिने ।
सकलागमस्वरूपे
सर्वेश्वरि संनिधिं विधेहि मयि ॥ ६९ ॥

पुस्तकजपवटहस्ते
वरदाभयचिह्नचारुबाहुलते ।
कर्पूरामलदेहे
वागीश्वरि शोधयाशु मम चेतः ॥ ७० ॥

क्षौमाम्बरपरिधाने
मुक्तामणिभूषणे मुदावासे ।
स्मितचन्द्रिकाविकासित-
मुखेन्दुबिम्बेऽम्बिके प्रसीद मम ॥ ७१ ॥

विद्यारूपेऽविद्या-
नाशिनि विद्योतितेऽन्तरात्मविदाम् ।
गद्यैः सपद्यजातै-
राद्यैर्मुनिभिः स्तुते प्रसीद मम ॥ ७२ ॥

त्रिमुखि त्रयीस्वरूपे
त्रिपुरे त्रिदशाभिवन्दिताङ्घ्रियुगे ।
त्रीक्षणविलसितवक्त्रे
त्रिमूर्तिमूलात्मिके प्रसीद मम ॥ ७३ ॥

वेदात्मिके निरुक्त-
ज्योतिर्व्याकरणकल्पशिक्षाभिः ।
सच्छन्दोभिः संतत-
क्लृप्तषडङ्गेन्द्रिये प्रसीद मम ॥ ७४ ॥

त्वच्चरणसरसिजन्म-
स्थितिमहितधियां न लिप्यते दोषः ।
भगवति भक्तिमतस्त्वयि
परमां परमेश्वरि प्रसीद मम ॥ ७५ ॥

बोधात्मिके बुधानां
हृदयाम्बुजचारुरङ्गनटनपरे ।
भगवति भवभङ्गकरीं
भक्तिं भद्रार्थदे प्रसीद मम ॥ ७६ ॥

वागीशीस्तवमिति यो
जपार्चनाहवनवृत्तिषु प्रजपेत् ।
स तु विमलचित्तवृत्ति-
र्देहापदि नित्यशुद्धमेति पदम् ॥ ७७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे अष्टमः पटलः ॥

नवमः पटलः ॥

[1]अथाभिवक्ष्ये सकलप्रपञ्च-
मूलात्मिकायाः प्रकृतेर्यथावत् ।
मन्त्रं तु साङ्गं सहुताभिषेक-
जपार्चनाद्यं सकलार्थसिद्ध्यै ॥ १ ॥

घनवर्त्मकृष्णगतिशान्तिबिन्दुभिः
कथितः परः प्रकृतिवाचको मनुः ।
दुरितापहोऽर्थसुखधर्ममोक्षदो
भजतामशेषजनरञ्जनक्षमः ॥ २ ॥

शक्तिः स्यादृषिरस्य तु
गायत्री चोदिता मनोश्छन्दः ।
बोधस्वरूपवाची
संवित्प्रोक्ता च देवता गुरुभिः ॥ ३ ॥

1. अथ प्रवक्ष्ये

नेत्रकरणर्तुदिनकर-
भुवनविकारस्वराग्निबिन्दुयुजा ।
व्योम्नाङ्गषट्कक्लप्ति-
र्जातिविभिन्नेन चापि संप्रोक्ता ॥ ४ ॥

अग्नीन्दुयोगविकृता लिपयो हि सृष्टा-
स्ताभिः प्रलोमपठिताभिरिदं शरीरम् ।
भूतात्मकं त्वगसृगादियुतं समस्तं
संव्यापयेन्निशितधीर्विधिना यथावत् ॥ ५ ॥

अन्त्यावूष्मस्वमून्वादिषु खलिपिषु[1] तांस्तांश्चतुर्वर्गवर्णे-
ष्वेतानस्यम्यदस्तद्दति तदपि परेषु स्वरेषु क्रमेण ।
संहृत्य स्थानयुक्तं क्षपितसकलदेहो [2]ललाटस्थितान्तः-
प्राप्तिव्याप्तद्विसप्तादिकभुवनतलो [3]यातु मद्भावमेव ॥ ६ ॥

मूलाधारात्स्फुरिततटिदाभा प्रभा सूक्ष्मरूपो-
द्गच्छन्त्यामस्तकमणुतरा तेजसां मूलभूता ।
सौषुम्नाध्वाचरणनिपुणा सा सवित्रानुबद्धा
ध्याता सद्योऽमृतमथ रवेः स्रावयेत्सार्धसोमात् ॥ ७ ॥

---

1. मलिंपिषु. 2. ललाटस्थितस्तं प्राप्य व्याप्त० 3. याति.

शिरसि निपतिता या बिन्दुधारा सुधाया
भवति लिपिमयी सा ताभिरङ्गं मुखाद्यम् ।
विरचयतु समस्तं पातितान्तश्च तेज-
स्यनल इव घृतस्योद्दीपयेदात्मतेजः ॥ ८ ॥

संहृत्य चोत्पाद्य शरीरमेवं
तेजोमयं व्याप्तसमस्तलोकम् ।
संकल्प्य शक्त्यात्मकमात्मरूपं
तच्चिह्नमात्मन्यपि[1] संदधीत ॥ ९ ॥

उद्यद्भास्वत्समाभां विजितनवजपामिन्दुखण्डावनद्ध-
द्योतन्मौलिं त्रिणेत्रां विविधमणिलसत्कुण्डलां पद्मगां च ।
हारग्रैवेयकाञ्चीगुणमणिवलयाद्यैर्विचित्राम्बराढ्या-
मम्बां पाशाङ्कुशेष्टाभयकरकमलामम्बिकां तां नमामि ॥

धातू द्वौ स्तो रक्षणव्यापकार्थौ
पाद्योऽशाद्यस्तत्प्रभावात्तयोश्च ।
सर्वं संरक्ष्याथ सर्वात्मना यो
व्याप्नोत्यंशं स्यादसौ पाशवाची ॥ ११ ॥

---

1. ०न्यथ.

*P. 9

अं स्यादात्मा कुर्धरा कुस्तनुर्वा
भागार्थः स्याच्छोऽथ वा वृत्तिवाची ।
भूश्चेद्भूतान्यन्यथा चेच्छरीरा-
ण्याकृष्यात्मन्याहरेदङ्कुशाख्यः ॥ १२ ॥

स्मृते यथा संसृतिचक्रचङ्क्रमो-
द्भवाद्धनापायसमुत्थितादपि ।
वियोजयत्यात्मतनुं नरं भया-
त्तथाभयस्याभयसंज्ञिता विभोः ॥ १३ ॥

मुख्यार्थवाची वरशब्द उक्तः
स्याद्वाञ्छितार्थश्च वराभिधानम् ।
मुख्यं त्वभीष्टं स्मृतिमात्रकेण
ददाति योऽसौ वरदोऽवगम्यः ॥ १४ ॥

दीक्षाक्लृप्त्यै पुरोक्ते रचयतु विधिवन्मण्डलं मण्डपे त-
द्व्यक्तं युक्तं च कान्त्या त्रिगुणितविलसत्कर्णिकं [1]वर्णकीर्णम् ।
आपीतं केसरेष्वारचितहरिहरार्णैश्च मध्ये समायै-
स्तैरग्रे माययाढ्यं कमलमथ बहिः प्रोक्तचिह्नैरुपेतम् ॥१५॥

---

1. वर्णवीतम्.

शक्त्याविःसाध्यमिन्द्रानिलनिर्ऋतिगबीजाभिबद्धं पुरोऽग्ने-
स्तत्कोणोल्लासिमायं हरिहरविलसद्दण्डमेभिः समायैः ।
वर्णैश्चावेष्टितं तत्त्रिगुणितमिति विख्यातमेतत्सुयन्त्रं
स्यादायुष्यं च वश्यं धनकरममितश्रीपदं कीर्त्तिदं च ॥

हृल्लेखाख्यां गगनां
रक्तां च करालिकां महोच्छुष्माम् ।
मूर्धनि वदने गुह्ये
पदयोर्न्यस्येत्तदङ्गैश्च ॥ १७ ॥

गायत्रीं न्यसतु गले स्तनेऽथ सव्ये
सावित्रीं पुनरपरे सरस्वतीं च ।
सव्येंसे सरसिजसंभवं मुकुन्दं
हृद्देशे पुनरपरांसके शिवं च ॥ १८ ॥

अलिकांसपार्श्वकुक्षिषु
पार्श्वांसापरगलहृत्सु च क्रमशः ।
ब्रह्माण्याद्या विधिव-
न्न्यस्तव्या मातरोऽष्ट मन्त्रितमैः ॥ १९ ॥

सजया विजया च तथा-
जिताह्वया[1] चापराजिता नित्या ।
तदनु विलासिनिदोग्ध्र्यौ
साघोरा[2] मङ्गला नव प्रोक्ताः ॥ २० ॥

एवं संपूज्य पीठं तदनु नव घटान्पञ्च वा कर्णिकायां
पत्राग्रेषु न्यसेत्काञ्चनरजतताम्रोद्भवान्मार्त्तिकान्वा ।
एकं वा कर्णिकायां सुमतिरथ विनिक्षिप्य कुम्भं यथाव-
त्संपूर्या[3]वाहयेत्त्रिष्वपि विधिषु पुनर्वक्ष्यमाणक्रमेण ॥२१॥

मधुनाथ महारवैश्च साकं
विधिना मध्यगतं प्रपूर्य कुम्भम् ।
अभिवाद्य कलाः प्रवेष्टयीत
प्रवराभ्यामथ[4] तन्नवांशुकाभ्याम् ॥ २२ ॥

ऐन्द्रं घृतेन यमदिक्प्रभवं च दध्ना
क्षीरेण वारुणमथो तिलजेन सौम्यम् ।
क्षीरद्रुचर्मदशमूलकपुष्पसिद्ध-
क्काथेन कोणनिलयानपि पूरयेच्च ॥ २३ ॥

---

1. जितापरा; 2. साघोषा; 3. त्संभूया०; 4. ०मपि.

मूत्रेणैन्द्रं गोमयेनापि याम्यं
क्षीरेणाप्यं सौम्यजं चैव दध्ना ।
[1]मध्यप्रोक्तं सर्पिषा [2]पञ्च कुम्भा-
न्संस्थाप्यापः पूरणीयाः क्रमेण ॥ २४ ॥

गोमूत्रगोमयोदक-
पयोदधिघृतांशकाः क्रमात्प्रोक्ताः ।
एकार्धधातुसत्त्वा-
द्येके सर्वाणि वा समानि स्युः ॥ २५ ॥

तारभवाभिरथर्गिभः
क्रमेण संयोजयेच्च गव्यानि ।
आत्माष्टाक्षरमन्त्रै-
रथ वा योज्यानि पञ्चभिः पञ्च ॥ २६ ॥

यद्येककलशक्लृप्तौ
विधिरपि पञ्चाशदोषधिक्वाथैः ।
पूरयतु पञ्चभिर्वा
गव्यैस्तोयात्मकेऽष्टगन्धाप्तिः ॥ २७ ॥

---

1. मध्यप्रोत्थं ; 2. पञ्च कुम्भाः स्युश्चेदेवं.

[1]अत्रोत्तरस्यां दिशि पङ्कजे च
पलाशचर्मोत्कशितैः पयोभिः ।
संपूरणीयः कलशो यथाव-
त्सुवर्णवस्त्रादियुतः सुशुद्धः ॥ २८ ॥

द्वारेषु मण्डपस्य
द्वौ द्वौ [2]कलशौ सुशुद्धजलपूर्णौ ।
संस्थाप्य च वसनाद्यैः
प्रवेष्टयित्वाभिपूजनीयाः स्युः ॥ २९ ॥

ऊर्ध्वेन्द्रयाम्यसौम्य-
प्रत्यक्षु च भूतवर्णकाः क्रमशः ।
हृल्लेखाद्यास्तदनु च
पूर्ववदङ्गानि पूजनीयानि ॥ ३० ॥

गायत्रीं शतमखजे निशाचरोत्थे
सावित्रीं पवनगते सरस्वतीं च ।
ब्रह्माणं हुतभुजि वारुणे च विष्णुं
[3]बीजेऽग्रे समभियजेदथेशमैशे ॥ ३१ ॥

---

1. अस्रो०; 2. कुम्भौ; 3. बीजेश्रेः.

रक्ता रक्ताकल्पा
चतुर्मुखी कुण्डिकाक्षमालेऽब्जे ।
दधती प्राग्बीजस्य
गायत्री तादृशोऽग्निगो ब्रह्मा ॥ ३२ ॥

अरिदरगदाब्जहस्ता
किरीटकेयूरहारसंभिन्नां ।
[1]निशिचरबीजसमुत्था
सावित्री वरुणगस्तथा विष्णुः ॥ ३३ ॥

टङ्काक्षाल्यभयवरा-
न्दधती च त्रीक्षणेन्दुकलितजटा ।
वाणी वायव्यस्था
विशदाकल्पा तथेश्वरस्त्वैशे ॥ ३४ ॥

ब्रह्माण्याद्यास्तद्बहि-
रनन्तरं वासवादिकाशेशाः ।
पूज्याः पूर्वोक्तैरुप-
चारैः सम्यङ्निजेष्टाप्त्यै ॥ ३५ ॥

---

1. निशि वा.

यदि नवकलशास्तेष्वथ
संपूज्या मातरोऽष्टदिक्क्रमशः ।
हृल्लेखाद्याः पूज्या
मध्यादिषु पञ्च चेद्भवन्ति घटाः ॥ ३६ ॥

प्रथमं घृतजं ततः कषायं
दधि पश्चात्कथितं पयः कषायम् ।
अथ तैलकषायकामधूत्थं
द्विजवृक्षोत्कथितं ततोऽभिषिञ्चेत् ॥ ३७ ॥

द्वारगकुम्भघृतैरथ
सलिलैः पुनरन्तरासेकम् ।
कुर्यान्मुखकरचरण-
क्षालनमपि साचमादिकं मन्त्री ॥ ३८ ॥

विधिवत्कृताभिषेको
द्वात्रिंशल्लक्षमथ जपेन्मन्त्रम् ।
निजकरदत्तार्घ्यामृत-
जलपोषितभानुमत्प्रभोऽनुदिनम् ॥ ३९ ॥

भूत्वा शक्तिः स्वयमथ दिनेशेन्दुवैश्वानराणा-
मैक्यं कुर्वन्प्रणवमनुना शक्तिबीजेन भूयः ।
आकृष्यान्तर्बहिरपि समाधाय बुद्ध्यैव तेजो
जप्यान्मन्त्री ज्वलनहुतशिष्टान्नभुक्प्रोक्तसंख्यम् ॥ ४० ॥

अथ तु हविष्यप्राशी
नक्ताशी वा जपेन्मनुं त्वेवम् ।
परिपूर्णायां नियमित-
जपसंख्यायां समारभेद्धोमम् ॥ ४१ ॥

जपादृशांशं जुहुयादथाष्ट-
द्रव्यैर्गुडक्षौद्रघृतावसिक्तैः ।
वर्णौषधीसिद्धजलाभिषेकं
कृत्वा द्विजानभ्यवहारयेच्च ॥ ४२ ॥

ततोऽस्य प्रत्ययास्त्वेवं जायन्ते जपतोऽमुना ।
अधिष्ठितं निश्यदीपं निस्तमिस्रं गृहं भवेत् ॥ ४३ ॥

ततः कृत्वा जपह्रासं समुपासीत शक्तितः ।
युक्तात्मा नित्ययोगेन प्रागुक्तविधिनार्चयेत् ॥ ४४ ॥

अश्वत्थविप्राङ्घ्रिपबिल्वनाम्नां
तर्कारिकप्लक्षकसेव्यकानाम् ।
प्रसारिणीकाश्मरिरोहिणाना-
मुदुम्बरीपाटलडुण्डुकानाम् ॥ ४५ ॥

पलं पलार्धं त्वथ कर्षमर्धं
तेषां तु [1]भागः कथितः क्रमेण ।
एतैः श्रितेनाथ जलेन वासौ
संपूरणीयः कलशो यथावत् ॥ ४६ ॥

प्रत्यब्दसेकाद्भविता शतायु-
र्मेधेन्दिरावान्रहितश्च रोगैः ।
मासेषु जन्मस्वभिषेकतः स्या-
दुर्वीपतिर्मङ्क्षु महापृथिव्याः ॥ ४७ ॥

अर्काभस्तेजसासौ भवति नलिनजा संततं किंकरी स्या-
द्रोगा नश्यन्ति दृष्ट्वा तमथ च धनधान्याकुलं तत्समीपम् ।
देवा नित्यं नमोऽस्मै विदधति फणिनो नैव दंशन्ति पुत्राः
संपन्नाः स्युः सपुत्रास्तनुविपदि परं धाम विष्णोः स भूयात् ॥

1. भागाः कथिताः.

शक्तिप्रग्रस्तसाध्यं हरशरकलमायावृतं वह्निगेह-
द्वन्द्वाश्रिप्राप्तमायं प्रतिविवरलसच्छक्तिबद्धं बहिश्च ।
कोणोद्यद्दण्डदण्डि त्रिलिपि हरिहराबद्धगण्डं विलोमा-
र्णावीतं कोर्युगाष्टोदरनरहरिचिन्तात्मकं षड्गुणाख्यम् ॥

षडङ्गुलप्रमाणेन वर्तुलं कर्तुरालिखेत् ।
षडङ्गुलावकाशेन तद्बहिश्च प्रवर्तयेत् ॥ ५० ॥

वर्तुलं तावता भूयस्तद्बहिश्च तृतीयकम् ।
मध्यवर्तुलमध्ये तु हृल्लेखाबीजमालिखेत् ॥ ५१ ॥

द्वितीयवर्तुलाश्लिष्टमीषच्छिलष्टषडश्रकम् ।
पुटितं मण्डलं वह्नेरस्पृशन्मध्यवर्तुलम् ॥ ५२ ॥

इन्द्राग्निरक्षोवरुणवाय्वीशान्ताश्रकं लिखेत् ।
षट्सु कोणान्तरालेषु हृल्लेखाषट्कमालिखेत् ॥ ५३ ॥

एकैकान्तरितास्तास्तु संवध्युरितरेतरम् ।
शिखाभिरान्तराभिस्तु बाह्याबाह्याभिरान्तराः ॥ ५४ ॥

मध्यवर्तुलसंस्थाया हृल्लेखायाः कपोलयोः ।
अधरे साध्यनामार्णं साधकस्योत्तरे लिखेत् ॥ ५५ ॥

अन्तराग्निश्रियोः कर्म साधकांशे समालिखेत् ।
हरमायाः पञ्चकृत्वः स्युर्बहिर्गर्भवर्तुलम् ॥ ५६ ॥

तद्बहिः शरमायाश्च कलमायाश्च तद्बहिः ।
लिखेन्मायां बिन्दुमतीं वह्नेः कोणेषु षट्स्वपि ॥ ५७ ॥

वह्नेः कोणत्रये श्रीमत्पक्षीये त्रितयं लिखेत् ।
शक्तिश्रीकामबीजानां सदण्डं साधकार्णवत् ॥ ५८ ॥

[1]वह्निस्तु वह्निपक्षीये तान्येवादण्डवन्ति च ।
संसाध्य नामवर्णानि स्पष्टनिष्ठानभाञ्जि च ॥ ५९ ॥

बाह्यरेखामन्तरा स्युर्वर्णाः क्रमगताः शुभाः ।
तद्बहिः प्रतिलोमाश्च ताः [2]स्युर्लेखकपाटवात् ॥ ६० ॥

ततो विदर्भितं भूमेर्मण्डलद्वयमालिखेत् ।
महादिक्स्थनृसिंहार्णं चिन्तारत्नाश्रिताश्रकम् ॥ ६१ ॥

बहिः षोडशशूलाङ्कं शोभनं व्यक्तवर्णवत् ।
एतद्यन्त्रं समालिख्य पद्ममारचयेत्ततः ॥ ६२ ॥

[3]रुचिरद्वादशदलं [4]षट्त्रिंशत्केसरोज्ज्वलम् ।
पूर्वोक्तलक्षणोपेतं शुभं दृष्टिमनोहरम् ॥ ६३ ॥

---

1. वह्नेस्तु; 2. स्युर्लेखाकपाटवत्; 3. रुचिरं; 4. षड्विंशत्.

अभ्यर्च्य पीठं नवशक्तिकान्त-
 मङ्गानि बीजेषु च षट्सु भूयः ।
गायत्रिसावित्रिसरस्वतीश्च
 यजेदथ श्रीरतिपुष्टिसंज्ञाः ॥ ६४ ॥

ब्रह्माणमथ च विष्णुं
 महेश्वरं धनदमदनगणनाथान् ।
अभ्यर्चयेच्च षट्स्वपि
 वह्नेः कोणेषु तद्बहिः क्रमशः ॥ ६५ ॥

रक्तामनङ्गकुसुमां कुसुमातुरां च
 नित्यामनङ्गमदनां मदनातुरां च ।
गौरीं तथैव गगनां गगनस्य रेखां
 पद्मां भवप्रमथिनीं शशिशेखरां च ॥ ६६ ॥

एता द्विषट् प्रतिदलं प्रतिपूज्य शक्ती-
 स्तद्बाह्यतो यजतु मातृगणं क्रमेण ।
इन्द्रादिकान्बहिरतश्च तदायुधानि
 संपूज्य पूर्वविधिनामुमथाभिषिञ्चेत् ॥ ६७ ॥

योऽमुमर्चयति मुख्यविधानं
सिद्धशक्तिरपि सज्जपहोमैः ।
स श्रियो निलयनं त्रिदशानां
वन्द्यतां व्रजति विष्णुसमानः ॥ ६८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे नवमः पटलः ॥

दशमः पटलः ॥

अथ वक्ष्ये संग्रहतो

द्वादशगुणिताख्यमद्य यन्त्रवरम् ।

संपूज्य येन शक्तिं

भुक्तेर्मुक्तेर्व्रजेन्नरोऽनुभवम् ॥ १ ॥

व्याहृत्यावीतशक्तिज्वलनपुरयुगद्वन्द्वसंध्युत्थशक्त्या-

वीतं कोणात्तदुर्बीजकमनु च कपोलात्तगायत्रिमन्त्रम् ।

आग्नेयावीतमर्णैर्वृतमनुविगतैर्भूपुराभ्यां च रन्ध्रे

क्ष्रौंचिन्तारत्नकं द्वादशगुणितमिदं यन्त्रमिष्टार्थदायि ॥

पूर्वोक्तमानक्लृप्त्या

मन्त्री त्रितयं विलिख्य वृत्तानाम् ।

विलिखेदन्तर्वर्तुल-

मनु शक्तिं स्पष्टबिन्दुनिष्ठानाम् ॥ ३ ॥

द्वादशमध्यमवर्तुल-

रेखा बहिरालिखेच्च शक्तीनाम् ।

हरियमवरुणधनाधिप-
दिक्षु द्वे द्वे च ताः क्रमेण स्युः ॥ ४ ॥

ईशाग्निनिरृतिमरुतां
दिक्ष्वेकैकं विलिख्य भूयश्च ।
बीजान्तरालनिर्गत-
शूलाङ्कितकोणषट्कयुगमग्नेः ॥ ५ ॥

मण्डलयुगयुगलं स्या-
दस्पृशदान्तरितवर्तुलं विशदम् ।
शक्तिं प्रवेष्टयेच्च
प्रतिलोमव्याहृतीभिरन्तःस्थाम् ॥ ६ ॥

रविकोणेषु दुरन्तां
मायां विलिखेदथाग्रबिन्दुमतीम् ।
एकैकान्तरितास्ताः
परस्परं शक्तयश्च संबध्युः ॥ ७ ॥

गायत्रीं प्रतिलोमतः प्रविलिखेदग्नेः कपोलं बहि-
र्द्वे द्वे चैव लिपी बहिश्च रचयेद्भूयस्तथा त्रिष्टुभम् ।

वर्णान्प्रानुगतांश्च भूपुरयुगे सिंहाख्यचिन्तामणिं
लिख्याद्यन्त्रमशेषदुःखशमनायोक्तं पुरा देशिकैः ॥ ८ ॥

बहिरपि षोडशपत्रं
वृत्ताविचित्रं च राशिवीथियुतम् ।
रचयेन्मण्डलमेवं
पुनर्यथोक्तं निधापयेत्कलशम् ॥ ९ ॥

आदावङ्गावरणमनु हृल्लेखिकाद्याश्चतस्रो
ब्रह्माण्याद्याः षोडशविकृतिद्वन्द्वसंख्याक्रमेण ।
सार्धं भूयश्चतसृभिरथो षष्टिभिर्लोकपालै-
र्वज्राद्यैरष्टममपि समभ्यर्चयेद्भक्तिनम्रः ॥ १० ॥

कराली विकराली च उमा देवी सरस्वती ।
दुर्गा शची उषा लक्ष्मीः श्रुतिः स्मृतिधृती तथा ॥ ११ ॥

श्रद्धा मेधा मतिः कान्तिरार्या षोडश शक्तयः ।
विद्याह्रीपुष्टयः प्रज्ञा सिनीवाली कुहूस्तथा ॥ १२ ॥

रुद्रवीर्या प्रभानन्दा पोषणी ऋद्धिदा शुभा ।
कालरात्री महारात्री भद्रकाली कपालिनी ॥ १३ ॥

*P. 10

विकृतिर्दण्डिमुण्डिन्यौ सेन्दुखण्डा शिखण्डिनी ।
निसुम्भसुम्भमथनी महिषासुरमर्दिनी ॥ १४ ॥

इन्द्राणी चैव रुद्राणी शंकरार्धशरीरिणी ।
नारी नारायणी चैव त्रिशूलिन्यपि पालिनी ॥ १५ ॥

अम्बिका ह्लादिनी चैव द्वात्रिंशच्छक्तयो मताः ।
पिङ्गलाक्षी विशालाक्षी समृद्धिर्वृद्धिरेव च ॥ १६ ॥

श्रद्धा स्वाहा स्वधाख्या च मायाभिख्या वसुंधरा ।
त्रिलोकधात्री गायत्री सावित्री त्रिदशेश्वरी ॥ १७ ॥

सुरूपा बहुरूपा च स्कन्दमाताच्युतप्रिया ।
विमला सामला चैव अरुणी वारुणी तथा ॥ १८ ॥

प्रकृतिर्विकृतिः सृष्टिः स्थितिः संहृतिरेव च ।
संध्या माता सती हंसा मर्दिका वज्रिका परा ॥ १९ ॥

देवमाता भगवती देवकी कमलासना ।
त्रिमुखीसप्तमुख्यौ च सुरासुरविमर्दिनी ॥ २० ॥

सलम्बोष्ठ्यूर्ध्वकेश्यौ च बहुशिश्रा वृकोदरी ।
रथरेखाह्वया चैव शशिरेखा तथापरा ॥ २१ ॥

पुनर्गगनवेगाख्या वेगा च पवनादिका ।
भूयो भुवनवेगाख्या तथैव मदनातुरा ॥ २२ ॥

अनङ्गानङ्गमदना भूयश्चानङ्गमेखला ।
अनङ्गकुसुमा विश्वरूपासुरभयंकरी ॥ २३ ॥

अक्षोभ्यासत्यवादिन्यौ वज्ररूपा शुचिव्रता ।
वरदा चैव वागीशी चतुःषष्टिः प्रकीर्तिताः ॥ २४ ॥

इष्ट्वा यथोक्तमिति तं कलशं निजं वा
पुत्रं तथाप्तमपि शिष्यमथाभिषिञ्चेत् ।
आस्तिक्ययुक्तमथ सत्यरतं वदान्यं
विप्रप्रियं कुलकरं च नृपोत्तमं वा ॥ २५ ॥

विधानमेतत्सकलार्थसिद्धि-
करं परं पावनमिन्दिराढ्यम् ।
आयुष्करं वश्यकरं रिपूणां
प्रध्वंसनं मुक्तिफलप्रदं च ॥ २६ ॥

पाशाङ्कुशमध्यगया
शक्त्याथ जपार्चनाहुतादियुतम् ।

वक्ष्ये यन्त्रविधानं
त्रैलोक्यप्राभृतायमानमिदम् ॥ २७ ॥

[1]अष्टाशान्तार्गलाविर्हगलयवरगाच्चपूर्वपाश्चात्त्यषट्कं
कोष्ठोद्यत्साङ्कसाष्टाक्षरयुगयुगलाष्टाक्षराख्यं बहिश्च ।
मायोपेतात्मयुग्मस्वरमिलितलसत्केसरं साष्टपत्रं
पद्मं तन्मध्यवर्तित्रितयपरिलसत्पाशशक्त्यङ्कुशार्णम् ॥

पाशाङ्कुशावृतमनुप्रतिलोमगैश्च
वर्णैः सरोजपुटितेन घटेन चापि ।
आवीतमिष्टफलभद्रघटं तदेत-
द्यन्त्रोत्तमं भुवि घटार्गलनामधेयम् ॥ २९ ॥

प्राक्प्रत्यगर्गले हल-
मथ पुनराग्नेयमारुते च ह्यम् ।
दक्षोत्तरे हवार्णं
नैर्ऋतशैवे हरं द्विपङ्क्ति लिखेत् ॥ ३० ॥

विलिखेच्च कर्णिकायां
पाशाङ्कुशसाध्यसंयुतां शक्तिम् ।

1. अष्टाशान्तार्गलाविर्हलयवरयुताच्चपूर्वं०

अभ्यन्तराष्टकोष्ठे-
ष्वङ्गान्यवशेषितेषु चाष्टार्णौ ॥ ३१ ॥

कोष्ठेषु षोडशस्वथ
षोडशवर्णं तथा मनुं मन्त्री ।
पद्मस्य केसरेष्वथ
युगस्वरात्मान्वितां तथा मायाम् ॥ ३२ ॥

एकैकेषु दलेषु
त्रिशस्त्रिशः कर्णिकागतान्वर्णान् ।
पाशाङ्कुशबीजाभ्यां
प्रवेष्टयेद्बाह्यतश्च नलिनस्य ॥ ३३ ॥

अनुलोमविलोमगतैः
प्रवेष्टयेदक्षरैश्च तद्बाह्ये ।
तदनु घटेन सरोज-
स्थितेन तद्बक्ककेऽम्बुजं च लिखेत् ॥ ३४ ॥

बिन्द्वन्तिका प्रतिष्ठा
संदिष्टा पाशबीजमिति मुनिभिः ।

निजभूर्दहनाप्यायिनि-
शशधरखण्डान्वितोऽङ्कुशो भवति ॥ ३५ ॥

पाशश्रीशक्तिस्वर-
मन्मथशक्तीन्दिराङ्कुशाश्चेति ।
एकं कामिनिरञ्जिनि
ठद्वयमपरं त्विहाष्टवर्णं स्यात् ॥ ३६ ॥

अथ गौरि रुद्रदयिते
योगेश्वरि सकवचास्त्रठद्वितयैः ।
बीजादिकमिदमुक्तं
शाक्तेयं षोडशाक्षरं मन्त्रम् ॥ ३७ ॥

इति कृतदलसुविभूषित-
मतिरुचिरं लोकनयनचित्तहरम् ।
कृतोज्ज्वलं मण्डलमपि
पीठाद्यं पुरेव परिपूज्य ॥ ३८ ॥

पूर्वप्रोक्तैः क्वाथै-
रेकेनापूर्य पूरयेत्कलशम् ।

ह्लेखाद्यङ्गाख्यौ
मात्रसुरेशादिकौ च कुलिशादिम् ॥ ३९ ॥

एवं संपूज्य देवीं कलशमनुशुभैर्गन्धपुष्पादिकैस्ता-
न्दध्याज्यक्षौद्रसिक्तैस्त्रिशतमथ पृथग्दुग्धवीरुत्समिद्भिः ।
हुत्वा दत्वा सुवर्णांशुकपशुधरणीर्दक्षिणार्थं द्विजेभ्यः
संपूज्याचार्यवर्यं वसुभिरमलधीः संयतात्माभिषिञ्चेत् ॥

इति कृतकलशोऽयं सिच्यते येन पुंसा
स भवति कविरेनं नित्यमालिङ्गति श्रीः ।
धनदिनरजनीशैस्तुल्यतेजा महिम्ना
निरुपमचरितोऽसौ देहिनां स्यात्पुरोगः ॥ ४१ ॥

जपेच्चतुर्विंशतिलक्षमेवं
सुयन्त्रितो मन्त्रवरं यथावत् ।
हविष्यभोजी परिपूर्णसंख्ये
जपे पुनर्होमविधिर्विधेयः ॥ ४२ ॥

पयोद्रुमाणां च समित्सहस्र-
षट्कैर्दधिक्षौद्रघृतावसिक्तैः ।

तिलैश्च तावज्जुहुयात्पयोक्तै-
  र्द्विजोत्तमानभ्यवहारयेच्च ॥ ४३ ॥

गुरुमपि परिपूज्य काञ्चनाद्यै-
  र्जपति च मन्त्रमथो सहस्रमात्रम् ।
भजति च दिनशोऽमुमर्चनायां
  विधिविहितं विधिमादरेण भूयः ॥ ४४ ॥

संक्षेपतो निगदितो विधिरर्चनायाः
  शक्तेरमुं भजतु संसृतिमोचनाय ।
कान्त्यै श्रियै च यशसे जनरञ्जनाय
  सिद्ध्यै प्रसिद्धमहसोऽस्य परस्य धाम्नः ॥ ४५ ॥

गजमृगमदकाश्मीरै-
  र्मन्त्रितमः सुरभिरोचनोपेतैः ।
विलिखेदलक्तकरसा-
  लुलितैर्यन्त्राणि सकलकार्यार्थी ॥ ४६ ॥

राज्या पटुसंयुतया
  सपाशशक्त्यङ्कुशेन मन्त्रेण ।

स्वाद्वक्त्रयाभिजुह्व-
न्निश्युर्वीशांस्तथोर्वशीं वशयेत् ॥ ४७ ॥

एभिर्विधानैर्भुवनेश्वरीं तां
समर्चयित्वाथ जपंश्च मन्त्री ।
स्तुत्यानयाभिष्टुवतां समग्र-
प्रीत्यै समस्तार्तिविभञ्जिकायाः ॥ ४८ ॥

प्रसीद प्रपञ्चस्वरूपे प्रधाने
प्रकृत्यात्मिके प्राणिनां प्राणसंज्ञे ।
प्रणोतुं प्रभो प्रारभे प्राञ्जलिस्त्वां
प्रकृत्याप्रतर्क्ये प्रकामप्रवृत्ते ॥ ४९ ॥

स्तुतिर्वाक्यबद्धा पदात्मैव वाक्यं
पदं त्वक्षरात्माक्षरस्त्वं महेशि ।
ध्रुवं त्वां त्वमेवाक्षरैस्त्वन्मयैस्तो-
ष्यसि त्वन्मयी वाक्प्रवृत्तिर्यतः स्यात् ॥ ५० ॥

अजाधोक्षजत्र्यीक्षणाश्चापि रूपं
परं नाभिजानन्ति मायामयं ते ।

स्तुवन्तीशि तां त्वाममी स्थूलरूपां
तदेतावदम्बेह युक्तं ममापि ॥ ५१ ॥

नमस्ते समस्तेशि बिन्दुस्वरूपे
नमस्ते रवत्वेन तत्त्वाभिधाने ।
नमस्ते महत्त्वं प्रपन्ने प्रधाने
नमस्ते त्वहंकारतत्त्वस्वरूपे ॥ ५२ ॥

नमः शब्दरूपे नमो व्योमरूपे
नमः स्पर्शरूपे नमो वायुरूपे ।
नमो रूपतेजोरसांभःस्वरूपे
नमस्तेऽस्तु गन्धात्मिके भूस्वरूपे ॥ ५३ ॥

नमः श्रोत्रचर्माक्षिजिह्वाख्यनासा-
सवाक्पाणिपत्पायुसोपस्थरूपे ।
मनोबुद्ध्यहंकारचित्तस्वरूपे
विरूपे नमस्ते विभो विश्वरूपे ॥ ५४ ॥

रवित्वेन भूत्वान्तरात्मा दधासि
प्रजाश्चन्द्रमस्त्वेन पुष्णासि भूयः ।

दहस्यग्निमूर्तिं वहन्त्याहृतं वा
    महादेवि तेजस्त्रयं त्वत्त एव ॥ ५५ ॥

चतुर्वक्त्रयुक्ता लसद्धंसवाहा
    रजः संश्रिता ब्रह्मसंज्ञां दधाना ।
जगत्सृष्टिकार्ये जगन्मातृभूते
    परं तत्पदं ध्यायसीशि त्वमेव ॥ ५६ ॥

विराजत्किरीटा लसच्चक्रशङ्खा
    वहन्ती च नारायणाख्यां जगत्सु ।
गुणं सत्त्वमास्थाय विश्वास्थितिं यः
    करोतीह सोंशोऽपि देवि त्वमेव ॥ ५७ ॥

जटाबद्धचन्द्राहिगङ्गा त्रिणेत्रा
    जगत्संहरन्ती च कल्पावसाने ।
तमः संश्रिता रुद्रसंज्ञां दधाना
    वहन्ती परश्वक्षमाले विभासि ॥ ५८ ॥

सचिन्ताक्षमाला सुधाकुम्भलेखा-
    धरा त्रीक्षणार्धेन्दुराजत्कपर्दा ।

सुशुक्लांशुकाकल्पदेहा सरस्व-
त्यपि त्वन्मयैवेशि वाचामधीशा ॥ ५९ ॥

लसच्चक्रशङ्खा चलत्खड्गभीमा
नदत्सिंहवाहा ज्वलत्तुङ्गमौलिः ।
द्रवद्दैत्यवर्गा स्तुवत्सिद्धसंघा
त्वमेवेशि दुर्गा विसर्गाविहीने ॥ ६० ॥

पुरारातिदेहार्धभागो भवानी
गिरीन्द्रात्मजात्वेन यैषा विभासि ।
महायोगिवन्द्यां महेशासुनाथा
महेश्यंबिका तत्त्वतस्त्वन्मयैव ॥ ६१ ॥

लसत्कौस्तुभोद्भासिते व्योमनीले
वसन्ती च वक्षःस्थले कैटभारेः ।
जगद्वल्लभां सर्वलोकैकनाथां
श्रियं तां महादेव्यहं त्वामवैमि ॥ ६२ ॥

अजाद्रीगुहाब्जाक्षपोत्रीन्द्रकाणां
महाभैरवस्यापि चिह्नं वहन्त्यः ।

विभो मातरः सप्ततद्रूपरूपाः
स्फुरन्त्यस्त्वदंशा महादेवि ताश्च ॥ ६३ ॥

समुद्यद्दिवाकृत्सहस्रप्रभासा
सदा संतताशेषविश्वावकाशे ।
लसन्मौलिबद्धेन्दुरेखे सपाशा-
ङ्कुशाभीत्यभीष्टात्तहस्ते नमस्ते ॥ ६४ ॥

प्रभाकीर्त्तिकान्तीन्दिरारात्रिसंध्या-
क्रियाशातमिस्राक्षुधाबुद्धिमेधाः ।
स्तुतिर्वाङ् मतिः संनतिः श्रीश्च शक्ति-
स्त्वमेवेशि येऽन्ये च शक्तिप्रभेदाः ॥ ६५ ॥

हरे बिन्दुनादैः सशक्त्याख्यशान्तै-
र्नमस्तेऽस्तु भेदैः प्रभिन्नैरभिन्ने ।
सदा सप्तपाताललोकाचलाब्धि-
ग्रहद्वीपधातुस्वरादिस्वरूपे ॥ ६६ ॥

नमस्ते नमस्ते समस्तस्वरूपे
समस्तेषु वस्तुष्वनुस्यूतशक्ते ।

अतिस्थूलसूक्ष्मस्वरूपे महेशि
स्मृते बोधरूपेऽप्यबोधस्वरूपे ॥ ६७ ॥

मनोवृत्तिरस्तु स्मृतिस्ते समस्ता
तथा वाक्प्रवृत्तिः स्तुतिः स्यान्महेशि ।
शरीरप्रवृत्तिः प्रणामक्रिया स्या-
त्प्रसीद क्षमस्व प्रभो संततं मे ॥ ६८ ॥

हृल्लेखाजपविधिमर्चनाविशेषा-
नेतांस्तां स्तुतिमपि नित्यमादरेण ।
योऽभ्यस्येत्स खलु परां श्रियं च गत्वा
शुद्धं तद्व्रजति पदं परस्य धाम्नः ॥ ६९ ॥

इति हृल्लेखाविहितो
विधिरुक्तः संग्रहेण सकलोऽयम् ।
अस्मिन्निष्णातमना
मन्त्री योगी स एव भोगी च ॥ ७० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे दशमः पटलः ॥

एकादशः पटलः ॥

अथ श्रियो मन्त्रविधिः समासतो
जगद्धिताय प्रतिवक्ष्यतेऽधुना ।
सहाङ्गभेदैः सजपार्चनाहुत-
क्रमैः समभ्युद्धरणाय दुर्गतेः ॥ १ ॥

वियत्तुरीयस्तु विलोमतोऽनल-
प्रदीपितो वामविलोचनान्वितः ।
सचन्द्रखण्डः कथितो रमामनु-
र्मनोरथावाप्तिमहासुरद्रुमः ॥ २ ॥

ऋषिर्भृगुश्छन्दसि चोदिता निचृ-
त्समीरिता श्रीरपि देवता पुनः ।
दृगक्षिकर्णेनमनुस्वरानला-
न्वितेन चास्थ्ना विहितं षडङ्गकम् ॥ ३ ॥

भूयाद्भूयो द्विपद्माभयवरदकरा तप्तकार्तस्वराभा
शुभ्राभ्राभेभयुग्मद्वयधृतकरकुम्भाद्भिरासिच्यमाना ।
रत्नौघाबद्धमौलिर्विमलतरदुकूलार्तवालेपनाढ्या
पद्माक्षी पद्मनाभोरसि कृतवसतिः पद्मगा श्रीः श्रिये वः ॥

संदीक्षितोऽथ गुरुणा मनुवर्यमेनं
सम्यग्जपेन्निशितधीर्दिननाथलक्षम् ।
अभ्यर्चयन्नहरहः श्रियमादरेण
मन्त्री सुशुद्धचरितो रहितो वधूभिः ॥ ५ ॥

जपावसाने दिनकृत्सहस्र-
संख्यैः सरोजैर्मधुरत्रयाक्तैः ।
हुनेत्तिलैर्वा विधिनाथ बैल्वैः
समिद्वरैर्मन्त्रिवरोऽक्षभिर्वा ॥ ६ ॥

रुचिराष्टपत्रमथ वारिरुहं
गुणवृत्तराशिचतुरश्रयुतम् ।
प्रविधाय पीठमपि तत्र यजे-
न्नवशक्तिभिः सह रमां तु ततः ॥ ७ ॥

विभूतिरुन्नतिः कान्तिर्हृष्टिः[1] कीर्त्तिश्च संनतिः ।
पुष्टिराकृष्टिर्ऋद्धिश्च रमाया नव शक्तयः ॥ ८ ॥

आवाह्य सम्यक्कलशे यथाव-
त्समर्चनीया विधिना रमासौ ।
जप्त्वा यथाशक्ति पुनर्गुरुस्तु
संसेचयेत्संयतमात्मशिष्यम् ॥ ९ ॥

अङ्गैः प्रथमावृतिरपि
मूर्तीभचतुष्कनिधियुगैरपरा ।
शक्त्यष्टकेन चान्या
चरमा ककुबीश्वरैः समभ्यर्च्या ॥ १० ॥

वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ।
दमकः शललश्चैव गुग्गुलुश्च कुरण्डकः ॥ ११ ॥

बलाकी विमला चैव कमला वनमालिका ।
विभीषिका द्राविका च शांकरी वसुमालिका ॥ १२ ॥

---

[1] कान्तिः सृष्टिः.

*P. 11

अयनैव च पूर्वसेवया
परितुष्टा कमला प्रसीदति ।
धनधान्यसमृद्धिसंकुला-
मचिरादेव च मन्त्रिणे श्रियम् ॥ १३ ॥

अम्भस्युरोजद्वयसे हि तिष्ठं-
स्त्रिलक्षमेनं प्रजपेच्च मन्त्री ।
श्रियं विचिन्त्यार्कगतां यथाव-
द्दारिद्रताया भवति प्रमुक्तः ॥ १४ ॥

वसतावुपविश्य कैटभारेः
कमलावृक्षतलेऽथ वा त्रिलक्षम् ।
जपतोऽपि भवेच्च काङ्क्षितार्था-
दधिकं वत्सरतो वसुप्रपञ्चः ॥ १५ ॥

जुहुयादशोकदहने
सघृतैरपि तण्डुलैः सकलवश्यतमम् ।
खदिरानले त्रिमधुरै-
रपि तैर्धनदं च राजकुलवश्यमपि ॥ १६ ॥

समधुरनलिनानां लक्षहोमादलक्ष्मी-

परिगतमपि जन्तुं प्राप्नुयाच्छ्रीः समग्रा ।

घनविभवसमृद्ध्या नित्यमाह्लादयन्ती

त्यजति न करुणार्द्रा तस्य सा संततिं च ॥ १७ ॥

बिल्वं श्रीसूक्तजापी निजभुवि मुखजो वर्धयित्वास्य पूर्वं

पत्रैस्त्रिस्वादुयुक्तैः कुसुमफलसमिद्भिस्ततस्कन्धभेदैः ।

तन्मूलैर्मण्डलात्प्राक्सुनियतचरितोऽसौ हुताग्निर्मलात्मा

रूपं पश्येद्रमायाः कथमपि न पुनस्तत्कुले स्यादलक्ष्मीः ॥

हृदयकमलवर्णतः परस्ता-

दमृतमनन्तयुगं ततश्च सिन्यै ।

हुतवहदयितेत्यसौ रमायाः

प्रवरधनार्थिभिरर्थितो हि मन्त्रः ॥ १९ ॥

दक्षोऽस्य स्यादृषिश्छन्दसि सुमतिभिरुक्तो विराड्देवता च

श्रीदेवीपद्मिनीभ्यां हृदयकशिरसी विष्णुपत्न्या शिखा च ।

मेदोरेफाह्वदार्णैरपि च कमलरूपाक्षरैर्वर्मसास्त्रां

ताराद्याभिर्नमोन्ताभिरिति निगदितं जातियुक्ताभिरङ्गम् ॥

पद्मस्था पद्मनेत्रा कमलयुगवराभीतियुग्दोःसरोजा
देहोत्थाभिः प्रभाभिस्त्रिभुवनमखिलं भासुरा भासयन्ती ।
मुक्ताहाराभिरामोन्नतकुचकलशा रत्नमञ्जीरकाञ्ची-
ग्रैवेयोर्म्यङ्गदाढ्या धृतमणिमकुटा श्रेयसे श्रीर्भवेद्वः ॥ २१ ॥

ध्यात्वैवं श्रियमपि पूर्वक्लृप्तपीठे
पद्मादौ प्रथममथार्चयेत्तदङ्गैः ।
अष्टाभिर्दलमनुशक्तिभिस्तदन्ते
लोकेशैरिति विधिनार्चयेत्समृद्ध्यै ॥ २२ ॥

दीक्षातो जपतु रमारमेशभक्तो
लक्षाणां दशकममुं मनुं नियत्या ।
स श्रीमान्बहुधनधान्यसंकुलः स-
न्मेधावी भवति च वत्सरेण मन्त्री ॥ २३ ॥

इति मन्त्रजपाहृतधीर्मधुर-
त्रितयैरयुतं जुहुयात्कमलैः ।
परिशुद्धमना नचिरात्स पुन-
र्लभते निजवाञ्छितमर्थचयम् ॥ २४ ॥

समुद्रगायामवतीर्य नद्यां
स्वकण्ठमात्रे पयसि स्थितः सन् ।
त्रिलक्षजाप्याढ्यतमोऽब्दमात्रा-
न्मन्त्री भवेन्नात्र विचारणीयम् ॥ २५ ॥

नन्द्यावर्तैर्जुहुत भगभेऽभ्यर्च्य लक्ष्मीं सहस्रं
तावद्बैल्वैस्त्रिमधुरयुतैर्वा फलैः पौर्णमास्याम् ।
पञ्चम्यां वा सितसरसिजैः शुक्रवारेऽच्छपुष्पै-
रन्यैर्मासं प्रतिहुतविधिर्वत्सरैः स्याद्धनाढ्यः ॥ २६ ॥

ताररमामायाश्रीः
कमले कमलालये प्रसीदयुगम् ।
बीजानि तानि पुनरपि
समहालक्ष्मीहृदिन्दिरामन्त्रः ॥ २७ ॥

त्रिभिस्तु वर्णैर्हृदयं शिरोभिः
स्यात्पञ्चभिश्चाथ शिखा त्रिवर्णा ।
त्रिभिस्तथा वर्म चतुर्भिरस्त्रं
पृथक् त्रिबीजापुटितैस्तदङ्गम् ॥ २८ ॥

हस्तोद्यद्वसुपात्रपङ्कजयुगादर्शा स्फुरन्नूपुर-
ग्रैवेयाङ्गदहारकङ्कणमहामौलिज्वलत्कुण्डला ।
पद्मस्था परिचारिकापरिवृता शुक्लाङ्गरागांशुका
देवी दिव्यगणानता भवदघप्रध्वंसिनी स्याद्रमा ॥२९॥

लक्षं जपेन्मनुमिमं मधुरत्रयाक्तै-
र्बैल्वैः फलैः प्रतिहुनेदयुतं तदन्ते ।
आराधयेदनुदिनं प्रतिवक्ष्यमाण-
मार्गेण दुर्गतिभयाद्रहितो भवेत्सः ॥ ३० ॥

श्रीधरश्च हृषीकेशो वैकुण्ठो विश्वरूपकः ।
वासुदेवादयश्चाङ्गावरणात्समनन्तरम् ॥ ३१ ॥

भारतीपार्वतीचान्द्रीशचीभिरपि संयुता ।
दमकादिस्तृतीयानुरागाद्यैश्च चतुर्थ्यपि ॥ ३२ ॥

अनुरागो विसंवादो विजयो वल्लभो मदः ।
हर्षो बलश्च तेजश्चेत्यष्टौ बाणा महाश्रियः ॥ ३३ ॥

अनन्तब्रह्मपर्यन्तैः पञ्चमीन्द्रादिभिर्मता ।
चक्रपद्मान्तिकैः षष्ठीवज्राद्यैरावृतिः श्रियः ॥ ३४ ॥

संपूज्यैवं श्रियमनुदिनं यो जपेन्मन्त्रमेनं
प्रोक्तां संख्यां सहुतविधिमप्युच्छ्रितां प्राप्य लक्ष्मीम् ।
द्वित्रादर्वाग्भवति पशुपुत्रादिभोगैः समृद्धो
वर्षाद्देहापदि च पदमभ्येति नित्यं स विष्णोः ॥ ३५ ॥

श्रीमन्त्रेष्विति गदितेषु भक्तियुक्तः
श्रीसूक्तान्यपि च जपेद्यजेद्धुनेच्च ।
सूक्ते तु प्रथमतरे स्वयं मुनिः स्या-
दन्येषां मुनय [1]इमे भवन्ति भूयः ॥ ३६ ॥

आनन्दः कर्दमश्चैव चिक्लीतश्चेन्दिरासुतः ।
ऋचामथो तदन्यासामृषयः समुदीरिताः ॥ ३७ ॥

आद्ये सूक्तत्रये च्छन्दोऽनुष्टुप्कांसे बृहत्यपि ।
तदन्त्ययोस्त्रिष्टुबाख्यां परस्तादष्टके पुनः ॥ ३८ ॥

अनुष्टुबन्त्ये प्रस्तारपङ्क्तिश्छन्दांसि वै क्रमात् ।
श्र्यग्नी स्यातां देवते च न्यासाङ्गविधिरुच्यते ॥ ३९ ॥

1. अमी.

मूर्धाक्षिकर्णनासा-
मुखगलदोर्हृदयनाभिगुह्येषु ।
पायूरुजानुजङ्घा-
चरणेषु न्यसतु सूक्तकैः क्रमशः ॥ ४० ॥

सहिरण्मयी च चन्द्रा-
रजताहिरण्यस्रजे हिरण्याख्या ।
अङ्गानि जातियुञ्ज्यथ
हिरण्यवर्णाह्वया तथास्त्रं स्यात् ॥ ४१ ॥

अरुणकमलसंस्था तद्रजःपुञ्जवर्णा
करकमलधृतेष्टाभीतियुग्माम्बुजा च ।
मणिमकुटविचित्रालंकृताकल्पजातै-
र्भवतु भुवनमाता संततं श्रीः श्रियै वः ॥ ४२ ॥

प्रारभ्यार्च्छा प्रतिपदमथ प्राप्तदीक्षो वियुक्त-
स्तन्वङ्गीभिस्तनुविमलवासाः सुधौतद्विजाद्यः ।
एकादश्यामपि परिसमाप्यार्कसाहस्रिकान्तं
जापं मन्त्री प्रयजतु रमां प्राक्तनप्रोक्तपीठे ॥ ४३ ॥

पद्मा सपद्मवर्णा
पद्मस्थार्द्रा च तर्पयन्त्यभिधा ।
तृप्ता ज्वलन्त्यभिख्या
स्वर्णप्राकारसंज्ञका चेति ॥ ४४ ॥

मध्ये दिशाधिपाङ्गा-
वृत्योरेतास्ततश्च वज्रादीन् ।
प्रयजेच्चतुरावरणं
निगदितामिति सूक्तकल्पितविधानम् ॥ ४५ ॥

अन्नघृताभ्यां जुहुया-
दर्चास्वष्टोत्तरं शतं मन्त्री ।
आवाहनासनार्घ्यक-
पाद्याचमनमधुपर्कसेकानि ॥ ४६ ॥

वासोभूषणगन्धा-
न्सुमनोयुतधूपदीपभोज्यानि ।
सोद्वासनानि कुर्या-
द्भक्तियुतः पञ्चदशभिरथ मनुभिः ॥ ४७ ॥

व्यस्तैरपि च समस्तैः
 पूजायां संयतात्मकः सिद्ध्यै ।
[1]पक्कैर्बिल्वसमिद्भिः
 पयोन्धसा सर्पिषा क्रमाज्जुहुयात् ॥ ४८ ॥

एकैकं त्रित्रिशतं
 द्वादश्यां भोजयीत विप्रांश्च ।
मन्दारकुन्दकुमुदक-
 नन्द्यावर्ताह्वमालतीजात्यः ॥ ४९ ॥

कह्लारपद्मरक्तो-
 त्पलकेतकचम्पकादयो ग्राह्याः ।
परिषिञ्चेत्त्रिशो नित्यं
 सूक्तैस्तैः स्नानकर्मणि ॥ ५० ॥

आदित्याभिमुखो जप्यात्तावत्तावच्च तर्पयेत् ।
अर्चयेद्विधिना तेन दिनशो जुहुयात्त्रिशः ॥ ५१ ॥

एवं करोति षण्मासं योऽसौ स्यादिन्दिरापतिः ।
उद्बुद्धमात्रे नलिने नवनीतं विनिक्षिपेत् ॥ ५२ ॥

1. पक्वै०

सकर्णिके सकिञ्जल्कोदरे पत्रान्तरालके ।
पुनः पद्मं तदुद्धृत्य समिद्धे तु हुताशने ॥ ५३ ॥

जुहुयादन्त्ययाथर्चा शतमष्टोत्तरं जपेत् ।
चत्वारिंशच्छुक्रवारैर्महाश्रीस्तस्य जायते ॥ ५४ ॥

कांसोऽस्मीत्यनया सम्यगेकादश घृताहुतीः ।
षण्मासं जुह्वतो नित्यं भूयात्प्रायो महेन्दिरा ॥ ५५ ॥

सूक्तैरेतैर्जुहुत जपताभ्यर्चयीतावगाहे-
त्सिश्चेद्वर्के दिनमनु तथा संयतस्तर्पयीत ।
संशुद्धात्मा विविधधनधान्याकुलाभ्यन्तरोऽसौ
मन्त्री सर्वैर्भुवि बहुमतः श्रीमतां स्यात्पुरोगः ॥

श्रीलक्ष्मीर्वरदा विष्णुपत्नी च सवसुप्रदा ।
हिरण्यरूपा सस्वर्णमालिनी रजतस्रजा ॥ ५७ ॥

ससुवर्णप्रभा स्वर्णप्राकारा पद्मवासिनी ।
पद्महस्ता पद्मपूर्वप्रिया मुक्तापदादिका ॥ ५८ ॥

अलंकारा तथा सूर्या चन्द्रा बिल्वप्रियेश्वरी ।
भुक्तिः प्रपूर्वा मुक्तिश्च विभूत्यृद्धिसमृद्धयः ॥ ५९ ॥

तुष्टिः पुष्टिश्च धनदा तथान्या तु धनेश्वरी ।
श्रद्धा सभोगीनी भोगदात्री धातृविधातृके ॥ ६० ॥

द्वात्रिंशदेताः श्रीदेव्या ये मन्त्राः समुदीरिताः ।
तारादिका नमोन्ताश्च तैरर्चासु बलिं हरेत् ।
तर्पयेच्च महादेवीं दिनादौ मन्त्रवित्तमः ॥ ६१ ॥

नाभ्यक्तोऽद्यान्न नग्नः सलिलमवतरेन्न स्वपेद्वाशुचिः स-
न्नाभ्यज्यान्नैव चाद्यात्तिलरुहलवणे केवले नैव दोषाम् ।
वक्षे लिम्पेद्वदेन्नानृतमपि मलिनः स्यान्न विम्बाम्बुजन्म-
द्रोणान्नो धारयेत्के भुवमपि न वृथैवालिखेदिन्दिरार्थी ॥

सुविमलचरितः स्याच्छुद्धमाल्यानुलेपा-
भरणवसनदेहो मुख्यगन्धोत्तमाङ्गः ।
सुविशदनखदन्तः शुद्धधीर्विष्णुभक्तो
विमलरुचिरशय्यः स्याच्चिरायेन्दिरार्थी ॥ ६३ ॥

दुष्टां कष्टान्ववायां कलहकलुषितां मार्गदृष्टामनिष्टा-
मन्यासक्तामसक्तामतिविपुलकृशाङ्गीमतिह्रस्वदीर्घाम् ।

रोगार्तां भोगलोलां प्रतिपुरुषचलां राजकान्तामकान्तां
काकाक्षीमेकचारां ग्रहकुसुमयुतां न स्पृशेदिन्दिरार्थी ॥

शान्तः शश्वत्स्मितमधुरपूर्वाभिभाषी दयार्द्रो
देवाचार्यातिथिदहनपूजारतः पुण्यशीलः ।
नित्यस्नायी नियमनिरतः प्रत्यगाशामुखाशी
मन्त्री वर्णाश्रमदृढरतिः स्याच्चिरायेन्दिरार्थी ॥ ६५ ॥

श्रीमन्त्रभक्तः श्रितविष्णुदीक्षः
श्रीसूक्तजापी शितधीः सुशीलः ।
स्वदारतुष्टो मितभाषणाशी
लोकप्रियः स्याच्चिरमिन्दिरार्थी ॥ ६६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे एकादशः पटलः ॥

द्वादशः पटलः ॥

अथ रमाभुवनेशिमनोभवै-
  स्त्रिपुटसंज्ञकमन्त्रमुदीरितम् ।
सकलवर्गफलाप्तियशस्करं
  जगति रञ्जनकृत्कविताकरम् ॥ १ ॥

बीजैस्त्रिभिर्द्विरुक्तैः
  कुर्यादङ्गानि साधकः सिद्ध्यै ।
पूर्वतरेरितयोर्वा
  द्वयोरथैकं तदङ्गयोः प्रभजेत् ॥ २ ॥

नवकनकभासुरोर्वी-
  विरचितमणिकुट्टिमे सकल्पतरौ ।
रत्नवरबद्धसिंहा-
  सननिहितसरोरुहे समासीनाम् ॥ ३ ॥

आबद्धरत्नमकुटां मणिकुण्डलोद्य-
त्केयूरकोर्मिरशनाह्वयनूपुराढ्याम् ।
ध्यायेद्धृताब्जयुगपाशकशाङ्कुरेक्षु-
चापां सपुष्पविशिखां नवहेमवर्णाम् ॥ ४ ॥

चामरमुकुरसमुद्गक-
ताम्बूलकरङ्कवाहिनीभिश्च ।
दूतीभिः समभिवृतां
पश्यन्तीं साधकं प्रसन्नदृशा ॥ ५ ॥

[1]योगेश्वरीमिति विचिन्त्य जपेच्च मन्त्र-
मादित्यलक्षमथ मन्त्रितमो जपान्ते ।
श्रीराजवृक्षसमिधां सजपार्तवानां
तावत्सहस्रसमितं मधुरैर्जुहोतु ॥ ६ ॥

अङ्गैर्लक्ष्मीहरिगिरिसुताशर्वरत्यङ्गजातैः
षट्कोणस्थैर्निधियुगयुतैस्तद्बहिर्मातृभिश्च ।
योषिद्रूपैर्बहिरपि यजेल्लोकपालैस्तदेत-
त्प्रोक्तं देव्या अपि सुरगणैः पूजनीयं विधानम् ॥ ७ ॥

1. लोके०

लक्ष्मीगौरीमनसिशयबीजानि कृत्वा कलायां
तां वा बिन्दौ तमपि गगने तच्च सिन्दूरवर्णम् ।
स्मृत्वा बुद्ध्या भुवनमखिलं तन्मयन्वेन मन्त्री
देवान्वश्यानपि वितनुते किं पुनर्मर्त्यजातीन् ॥ ८ ॥

य इमं भजते मनुं मनस्वी
विधिना वा पुनरर्चयेद्विधानम् ।
स तु सम्यगवाप्य दृष्टभोगा-
न्परतस्तत्पदमैशमेति धाम ॥ ९ ॥

सहृदयभगवत्यै दान्तरण्यै धरार्णाः
सणिधरशिवधार्णारे द्विठान्ता ध्रुवाद्याः ।
गदितमिति धराया मन्त्रमुत्कृष्टधात्री-
सुखसुतधनधान्यप्राप्तिदं कीर्त्तिदं च ॥ १० ॥

ऋषिरपि वराह उक्त-
श्छन्दो निचृदस्य देवता धरणी ।
मनुनामुनैव च पदैः
षोढा भिन्नेन निगदितोऽङ्गविधिः ॥ ११ ॥

मुख्याम्भोजे निविष्टारुणचरणतला श्यामलाङ्गी मनोज्ञा
चञ्चच्छाल्यग्रचुम्बच्छुकलसितकरा प्राप्तनीलोत्पला च ।
रत्नाकल्पाभिरामा मणिमयमकुटा चित्रवस्त्रा प्रसन्ना
दिश्याद्विश्वंभरा वः सततमभिमतं वल्लभा कैटभारेः ॥

लक्षायता च सदशांशहुतावसाना
प्रोक्ता धराहृदयमन्त्रजपक्रिया स्यात् ।
सर्पिष्मता सुविमलेन पयोन्धसास्य
होमो विधिः सकलसिद्धिकरः किलायम् ॥ १३ ॥

पीठे विष्णोः पूजयेत्पूर्वमन्त्रै-
र्भूवह्न्यम्बुप्राणसंज्ञैश्च भूतैः ।
शान्त्यन्ताभिः शक्तिभिः साकमाशा-
पालैः पृथ्वीं संयतात्मोपचारैः ॥ १४ ॥

पुष्पैः प्रियङ्गोर्मधुरत्रयाक्तै-
र्नीलोत्पलैर्वापि तथारुणैस्तैः ।
सहस्रमानं प्रतिजुह्वतः स्या-
द्गौर्गोमती सस्यकुलाकुला च ॥ १५ ॥

*P. 12

पिङ्गलां पृथुलशालिमञ्जरीं
यो जुहोति मधुरत्रयोक्षिताम् ।
नित्यशः शतमथास्य मण्डला-
द्धस्तगा भवति विस्तृता मही ॥ १६ ॥

भृगोस्तु वारे निजसाध्यभूभृ-
द्विलोलिताम्भःपरिपक्वमन्धः ।
पयोघृताक्तं जुहुयात्सहस्रं
दुग्धेन वा तेन दिनावतारे ॥ १७ ॥

षण्मासादनुभृगुवारमेष होमः
संपन्नान्समुपनयेद्धराप्रदेशान् ।
पुत्रान्वा पशुमहिषेष्टजुष्टपुष्टा-
मिष्टामप्यनुदिनमिन्दिरां समग्राम् ॥ १८ ॥

संक्षेपतो हृदयमन्त्रविधिर्धरायाः
प्रोक्तो हिताय जगतां रहितक्षमाणाम् ।
एनं भजन्निति धराकमलासमृद्धः
स्यादत्र सिद्धिमपरत्र परां प्रयाति ॥ १९ ॥

अथ पुरुषार्थचतुष्टय-
सिद्धिकरी मन्त्रजापनिरतानाम् ।
त्वरिताख्येयं विद्या
निगद्यते जपहुतार्चनाविधिभिः ॥ २० ॥

भक्तियुतानां त्वरया
सिद्धिकरी चेति मन्त्रिणां सततम् ।
देव्यास्त्वरिताख्या स्या-
त्त्वरितं क्ष्वेलग्रहादिहरणतया ॥ २१ ॥

वर्मद्वयं च तदन्त्यः
शिवयुक्चरमेऽङ्गनाद्युसाधिलवम् ।
अन्त्यः स योनिरस्त्रा-
न्तिकः सतारो मनुर्दशार्णयुतः ॥ २२ ॥

तारान्तेऽस्त्रादावपि
मायाबीजं प्रयोजयेन्मन्त्री ।
तेन हि काङ्क्षितसिद्धि-
र्भूयादचिरेण मन्त्रविदाम् ॥ २३ ॥

कूर्मादिभ्यां द्वाभ्यां
 द्वाभ्यामपि पूर्वपूर्वहीनाभ्याम् ।
कुर्यात्सप्तभिरर्णै-
 रङ्गानि च षट् क्रमेण मन्त्रज्ञः ॥ २४ ॥

कालिकगलहृन्नाभिक-
 गुह्योरुषु जानुजङ्घयोः पदयोः ।
देहे न्यासं कुर्या-
 न्मन्त्रेण व्यापकं समस्तेन ॥ २५ ॥

श्यामतनुमरुणपङ्कज-
 चरणतलां वृषलनागमञ्जीराम् ।
स्वर्णांशुकपरिधानां
 वैश्याहिद्वन्द्वमेखलाकलिताम् ॥ २६ ॥

तनुमध्यलतां पृथुल-
 स्तनयुगलां करविराजदभयवराम् ।
शिखिपिञ्छनालवलयां
 गुञ्जाफलगुणितभूषणारुणिताम् ॥ २७ ॥

नूपफणिकेयूरां तां
गलविलसद्विविधमणियुताभरणाम् ।
द्विजनागविहितकुण्डल-
मण्डितगण्डद्वयीमुकुरशोभाम् ॥ २८ ॥

शोणतराधरपल्लव-
विद्रुममणिभासुरां प्रसन्नां च ।
पूर्णशशिबिम्बवदना-
मरुणायतलोचनत्रयीनलिनाम् ॥ २९ ॥

कुञ्चितकुन्तलविलस-
न्मकुटाघटिताहिवैरिपिञ्छयुताम् ।
कैरातीं वनकुसुमो-
ज्ज्वलां मयूरातपत्रकेतनिकाम् ॥ ३० ॥

सुरुचिरसिंहासनगां
विभ्रमसमुदायमन्दिरां तरुणीम् ।
तामेनां त्वरिताख्यां
ध्यात्वा कुर्याज्जपार्चनाहोमान् ॥ ३१ ॥

दीक्षां प्राप्य गुरोरथ
लक्षं जप्याद्दशांशकं जुहुयात् ।
बिल्वसमिद्भिस्त्रिमधुर-
युक्ताभिः साधकः सुसंयतधीः ॥ ३२ ॥

अष्टहरिविधृतसिंहा-
सने समावाह्य सरसिजे देवीम् ।
अङ्गैः सह प्रणीतां
गायत्रीं पूजयेद्दिशां क्रमतः ॥ ३३ ॥

हुङ्काराख्या खेचरि
चण्डेसच्छेदनी तथा क्षपणी ।
भूयः स्त्रियाह्वया हुं-
कारीसक्षेमकारिकाः पूज्याः ॥ ३४ ॥

सश्रीबीजा लोके-
शायुधभूषान्विता दलाग्रेषु ।
फट्कारी चाप्यग्रे
शरासशरधारिणी च तद्बाह्ये ॥ ३५ ॥

सस्वर्णवेत्रयष्ट्यौ
द्वाःस्थे पूज्ये पुनर्जयाविजये ।
कृष्णो बर्बरकेशो
लगुडधरः किंकरश्च तत्पुरतः ॥ ३६ ॥

अरुणैश्चन्दनकुसुमै-
र्वनजैरपि धूपदीपनैवेद्यैः ।
प्रवरैश्च नृत्तगीतैः
समर्चयेद्भक्तिभारनम्रतनुः ॥ ३७ ॥

जपहुतपूजाभेदै-
रिति सिद्धे मन्त्रजापिनो मन्त्रे ।
नारीनरनरपतयः
कुर्वन्ति सदा नमस्क्रियामस्मै ॥ ३८ ॥

विद्याधर्यो यक्ष्यः
ससुरासुरसिद्धचारणप्रमदाः ।
अप्सरसश्च विशिष्टाः
साधकसक्तेन चेतसाकुलिताः ॥ ३९ ॥

स्मरशरविह्वलिताङ्ग्यो
रोमाञ्चितगात्रवल्लरीललिताः ।
घनघर्मबिन्दुमौक्तिक-
विलसत्कुचगण्डमण्डलाढ्चितयाः ॥ ४० ॥

विस्पष्टजघनवक्षो-
रुहदोर्मूलाः स्खलत्पदन्यासाः ।
मुकुलितनयनसरोजाः
प्रस्पन्दितदशनवसनसंभिन्नाः ॥ ४१ ॥

श्लथमानांशुकचिकुरा
मदविवशस्खलितमन्दभाषिण्यः ।
मृदुतरमस्तकविरचित-
नत्यञ्जलयः प्रसादकाङ्क्षिण्यः ॥ ४२ ॥

वीक्षस्व देहि वाचं
परिरम्भणपरमसौख्यमस्माकम् ।
एहि सुरोद्यानादिषु
रंस्यामः स्वेच्छया निरातङ्कम् ॥ ४३ ॥

इत्यादि [1]वाणिनीभि-
  र्विलोभ्यमानो यदा न विक्रियते ।
मन्त्री तदेत्य वाञ्छित-
  मखिलं तस्मै ददाति सा देवी ॥ ४४ ॥

योनिं कुण्डस्यान्तः
  प्रकल्प्य तत्रानलं समाधाय ।
संपूज्य पूर्वविधिना
  जुहुयात्सर्वार्थसिद्धये मन्त्री ॥ ४५ ॥

इक्षुशकलैः समृद्ध्यै
  दूर्वाभिः स्वायुषे श्रिये धान्यैः ।
धान्याय यवैः पुष्ट्यै
  गोधूमैर्ऋद्धये तिलैर्जुहुयात् ॥ ४६ ॥

जम्बूभिः स्वर्णाप्त्यै
  राजीभिः शत्रुशान्तयेऽक्षतकैः ।
अक्षयसिद्ध्यै वकुलैः
  कीर्त्यै कुन्दैर्महोदयाय तथा ॥ ४७ ॥

---

1. वादिनीभि-

अरुणोत्पलैश्च पुष्ट्यै
मधूकजैरिष्टसिद्धयेऽशोकैः ।
पुत्राप्त्यै पाटलजैः
स्त्रीसिद्ध्यै निम्बजैश्च विद्विष्ट्यै ॥ ४८ ॥

नीलोत्पलकैस्तुष्ट्यै
चम्पकजैः कनकसिद्धये पद्मैः ।
सह किंशुकैश्च सर्वो-
पद्रवशान्त्यै स साधको जुहुयात् ॥ ४९ ॥

हुतसंख्यासाहस्री
नियुता वाथायुतान्तिकी भवति ।
यावत्संख्यो होम-
स्तावज्जप्यश्च मन्त्रिणा मन्त्रः ॥ ५० ॥

अनुमन्त्रितैश्च वारिभि-
रासेकः क्ष्वेलशान्तिकृद्भवति ।
तज्जप्तयष्टिघातो
मन्त्रितचुलुकोदकाहतिश्च तथा ॥ ५१ ॥

तत्कर्णरन्ध्रजापा-

त्सद्यो नश्युर्विषग्रहादिरुजः ।

तद्यन्त्रस्थापनमपि

विषभूतादिप्रशान्तिकृद्भवति ॥ ५२ ॥

आख्यां मध्ये सतारे मनुमथ शतसंयुक्तविंशत्पुटेषु

प्रादक्षिण्येन शर्वादिकमनुविलिखेद्द्वादशावृत्ति मन्त्री ।

विंशद्द्वन्द्वाष्टशूलाकलितविरचितं यन्त्रमेतत्सुजप्तं

बद्धं क्ष्वेलग्रहार्तिं हरति विजयलक्ष्मीप्रदं कीर्त्तिदं च ॥

आख्यां मध्यगतानले लिखतु दिक्पङ्क्तिष्वथ स्युः सह्रूं

क्ष्रूं त्रूं छ्रूं [1]करणद्विषष्टिपदके शैवादि कालीमनुम् ।

नैर्ऋत्यादि तथा [2]क्रमाक्रमवृतं बाह्येऽनलैरावृतं

प्रोक्तं निग्रहचक्रमन्तकपुरप्राप्तिप्रदं वैरिणाम् ॥ ५४ ॥

कालीमाररमालीका

लीनमोक्षक्षमोनली ।

मामोदेततदेमोमा

रक्षतत्वत्वतक्षरः ॥ ५५ ॥

---

1. करणाद्य० 2. क्रमाद्यम०

यमापाटटपामाय
    माटमोटटमोटमा ।
वामो भूरिरिभूमोवा
    टररीस्त्वस्त्वरीरट ॥ ५६ ॥

वह्नेर्विण्णिम्बनिर्यासकविषमषिभिः सीसपट्टेंशुके वा
  शावे पाषाणके वा विलिखतु मतिमान्काकपत्त्रेण यन्त्रम् ।
वल्मीके चत्वरे वा क्षततरुविवरे वा निदध्यादराति-
  र्मृत्युं प्राप्नोति भूयादवयवविकलो व्याधितः पातितो वा ॥

चक्रे चाष्टाष्टपदे
    कालीशिवयातुधानखण्डाद्यम् ।
यमदहनानिलवीतं
    विलिख्य विषदण्डिमर्कटीलिप्तम् ॥ ५८ ॥

जप्तमधोमुखमेत-
    द्यत्र तु देशे विनिक्षिपेन्मन्त्री ।
तत्रोपद्रवमखिलं
    दिनशः सर्वात्मना भवति ॥ ५९ ॥

खण्डेष्वेकाशीतिषु मध्येन्दुगसाध्यं
  जुंसः पूर्वं दिक्स्थचतुष्पङ्क्तिषु शैखम् ।
लिख्याल्लक्ष्मीं शिष्टचतुःषष्टिषु विद्या-
  नीशाद्यं कन्यादि च बाह्ये त्वरिताख्याम् ॥ ६० ॥

दिग्दिक्संस्थामस्त्रपदाभिर्वषडन्तां
  मेदोमालावेष्टितबिम्बं घटवीतम् ।
पद्मस्थं तत्पङ्कजराजद्वदनान्तं
  प्रोक्तं चक्रं सम्यगिहानुग्रहसंज्ञम् ॥ ६१ ॥

श्रीसामायायामासाश्री
  सानोयाज्ञेज्ञेयानोसा ।
मायालीलालालीयामा
  याज्ञेलालीलीलाज्ञेया ॥ ६२ ॥

लाक्षाभिः कुङ्कुमैर्वा विलिखतु धवले वांशुके स्वर्णपट्टे
  लेखिन्या स्वर्णमय्या दृढमपि गुलिकीकृत्य संधारयेद्यः ।
कृत्याभ्यो मृत्युतो वा ग्रहविषदुरितेभ्यो विमुक्तः स धन्यो
  जीवेत्स्वैः पुत्रपौत्रैरपरिमितमहासंपदा दीर्घकालम् ॥६३॥

चतुःषष्ट्यंशे वा क्रमविदथ लक्ष्मीमनुममुं
शिवाद्यं नैर्ऋत्यादिकमपि चतुर्णामृतवृतम् ।
बहिः स्वच्छे पट्टे कनकविहिते पूर्वविधिना
लिखित्वा जप्त्वा निक्षिपतु शितधीर्यत्र तदिदम् ॥६४॥

चक्रमनुग्रहसंज्ञं
मन्त्री देशेऽत्र संपदो विरतम् ।
शुभतरफलदायिन्यो
भवन्ति सस्यर्द्धिकालवृष्ट्याद्याः ॥ ६५ ॥

हुंकारे साध्यसंज्ञां विलिखतु तदधः कर्णिकायां च शिष्टा-
नष्टौ वर्णान्दलेष्वारचयतु हरमायां त्रिशो [1]वेष्टयित्वा ।
कुम्भस्थं यन्त्रमेतत्सरसिजपुटितं सर्वरक्षाप्रसिद्ध्यै
क्लृप्तं सर्वोपसर्गप्रशमनफलदं श्रीकरं वश्यकारि ॥ ६६ ॥

इति निगदितक्लृप्त्या पूजयेत्तोतलायां
मनुमनुदिनमेनं मानयन्मानवो यः ।
स तु जगति समग्रां संपदं प्राप्य देहा-
पदि मुदिततरात्मा युक्तधीर्मुक्तिमेति ॥ ६७ ॥

1. वेष्टयीत ।

स्मरदीर्घैधरकाग्न्यों-

[1]दीर्घाभ्यक्ष्वेलदद्रलान्ताशिवाः ।

अभितः शक्तिनिरुद्धो

द्वादशवर्णोऽयमीरितो मन्त्रः ॥ ६८ ॥

द्वाभ्यां वा चैकेन

द्वाभ्यां द्वाभ्यां तथा पुनर्द्वाभ्याम् ।

मन्त्राक्षरैर्विदध्या-

दङ्गविधिं जातिसंयुतैर्मन्त्री ॥ ६९ ॥

इन्दुकलाकलितोज्ज्वलमौलि-

र्मारमदाकुलितायुगनेत्रा ।

शोणितसिन्धुतरङ्गितपोत-

द्योतितभानुदलाम्बुजसंस्था ॥ ७० ॥

दोर्धृतदाडिमसायकपाशा

साङ्कुशचापकपालसमेता ।

शोणदुकूलविलेपनमाल्या

शोणतरा भवतोऽवतु देवी ॥ ७१ ॥

1. दीर्घैल्य०

स्मृत्वा नित्यां देवी-
मेवं प्रजपेन्मनुं शतसहस्रम् ।
अयुतं जुहुयादन्ते
नृपतरुसमिधां घृतेन वा सिद्ध्यै ॥ ७२ ॥

शाक्ते पीठे पूज्या
देवी कुसुमानुलेपनैररुणैः ।
स्वयमप्यलंकृताङ्गः
सधूपदीपैर्निवेद्यताम्बूलैः ॥ ७३ ॥

हृल्लेखा क्लेदनी नन्दा क्षोभणी मदनातुरा ।
निरञ्जना रागवती तथान्या मदनावती ॥ ७४ ॥

मेखला द्राविणी चैव भूयोऽन्या वेगवत्यपि ।
सस्मारा द्वादश प्रोक्ताः शक्तयः पत्रसंस्थिताः ॥ ७५ ॥

अङ्गैः शक्तिभिराभि-
र्मातृभिराशाधिपैः क्रमात्पूज्या ।
भक्तिभरानतवपुषा
भवभयभङ्गाय मन्त्रिणाहरहः ॥ ७६ ॥

दारिद्र्यरोगदुःखै-
दौर्भाग्यजरापमृत्युदोषैश्च ।
अस्पृष्टो निरपायो
जीवति मन्त्रं भजन्नमुं मनुजः ॥ ७७ ॥

इतीरिता लोकहिताय वक्र-
प्रस्तारिणी मन्दिरमिन्दिरायाः ।
या सर्वनारीनरराजवर्ग-
संमोहनी मोहनबाणभूता ॥ ७८ ॥

निद्वयोरन्तरा त्यक्तिन्ने मदाः स्युश्च वेशिरः ।
मायादिकस्तया वर्णद्वन्द्वैश्चाङ्गविधिः स्मृतः ॥ ७९ ॥

[1]रक्तारक्तांशुककुसुमविलेपादिका सेन्दुमौलिः
स्विद्यद्वक्त्रा मदविवशसमाघूर्णितत्रीक्षणा च ।
[2]दोःसत्पाशाङ्कुशयुतकपालाभया पद्मसंस्था
देवी पायादमितफलदा नित्यशः पार्वती वः ॥ ८० ॥

दीक्षितः प्रजपेल्लक्षं मनुमेनं हुनेत्ततः ।
मधूकपुष्पैः स्वाद्वक्तैरयुतं हविषा तथा ॥ ८१ ॥

---

1. रक्ताङ्गरागांशुक० 2. दोःस०

*P. 13

पीठं पूर्ववदभ्यर्च्य तत्रावाह्यापि पूजयेत् ।
अङ्गैश्च शक्तिभिर्लोकपालैर्देवीं समाहितः ॥ ८२ ॥

नित्या निरञ्जना क्लिन्ना क्लेदिनी मदनातुरा ।
मदद्रवा द्राविणी च द्रविणा शक्तयो मताः ॥ ८३ ॥

प्रजपेत्प्रमदां विचिन्त्य यां वा
शयनस्थो मनुवित्सहस्रमानम् ।
निशि मारशिलीमुखाहताङ्गी
नचिरात्सा मदविह्वला समेति ॥ ८४ ॥

नित्याभिः सदृशतरा न सन्ति लोके
लक्ष्मीदा जगदनुरञ्जनाश्च मन्त्राः ।
तस्मात्ताञ्शुभमतयो[1] भजन्तु नित्यं
जापार्चाहुतसमुपासनाविशेषैः ॥ ८५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे द्वादशः पटलः ॥

---

1. ञ्छितमतयो

त्रयोदशः पटलः ॥

अथ वक्ष्यामि दुर्गाया मन्त्रान्साङ्गान्सदेवतान् ।
सजपार्चाहुतविधीन्प्रीत्यर्थं मन्त्रजापिनाम् ॥ १ ॥

तारो मायामरेशोऽत्रिपीठो बिन्दुसमन्वितः ।
स एव च विसर्गान्तो गायै नत्यान्तिको मनुः ॥ २ ॥

दुर्गास्य देवता च्छन्दो गायत्रं नारदो मुनिः ।
तारो माया च दुर्गायै ह्रामाद्यन्ताङ्गकल्पना ॥ ३ ॥

शङ्खारिचापशरभिन्नकरां त्रिणेत्रां
तिग्मेतरांशुकलया विलसत्किरीटाम् ।
सिंहस्थितां ससुरसिद्धनुतां च दुर्गां
दूर्वानिभां दुरितवर्गहरीं नमामि ॥ ४ ॥

कृताभिषेकदीक्षस्तु वसुलक्षं जपेन्मनुम् ।
तदन्ते जुहुयात्सर्पिःसंयुक्तेन पयोन्धसा ॥ ५ ॥

अष्टसाहस्रसंख्यैस्तु तिलैर्वा मधुराप्लुतैः ।
पीठार्चायां प्रयष्टव्याः क्रमात्तच्छक्तयो नव ॥ ६ ॥

प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी तथा ।
सुप्रभा विजया सर्वसिद्धिदा नवमी तथा ॥ ७ ॥

अर्च्या ह्रस्वत्रयक्लीबरहितैश्च स्वरैरिमाः ।
तारान्ते वज्रमाभाष्य नखदंष्ट्रायुधानि च ॥ ८ ॥

महासिंहाय चेत्युक्त्वा वर्माञ्जनतयः क्रमात् ।
सिंहमन्त्रोऽयमित्येवं संप्रोक्ता पीठकल्पना ॥ ९ ॥

अङ्गैः स्यादावृतिः पूर्वा द्वितीया शक्तिभिः स्मृता ।
अष्टायुधैस्तृतीया स्याल्लोकपालैश्चतुर्थ्यपि ॥ १० ॥

तदायुधैः पञ्चमी च दुर्गायजनमीदृशम् ।
जया च विजया कीर्त्तिः प्रीतिश्चाथ प्रभाह्वया ॥ ११ ॥

श्रद्धा मेधा श्रुतिरपि शक्तयः स्वाक्षरादिकाः ।
चक्रशङ्खगदाखड्गपाशाङ्कुशशरा धनुः ॥ १२ ॥

क्रमादष्टायुधाः प्रोक्ता दौर्गा दुर्गतिहारिणः ।
इत्थं दुर्गामनौ जापहुतार्चाभिः प्रसाधिते ॥ १३ ॥

मन्त्रीन्दिरावान्भवति दीर्घायुर्दुरिताञ्जयेत् ।
यान्यानिच्छति कामान्स्वांस्तांस्तान्प्राप्नोति यत्नतः ॥ १४ ॥

विधाय विधिनानेन कलशं चाभिषेचयेत् ।
यमसौ भूतवेतालपिशाचाद्यैर्विमुच्यते[1] ।
राजाभिषिक्तो विधिना सपत्नानमुना जयेत् ॥ १५ ॥

अमुना विधिना कृताभिषेका
ललना पुत्रमवाप्नुयाद्विनीतम् ।
हवनात्तिलसर्षपैः सहस्र-
द्वितयैराशु भवेच्च गर्भरक्षा ॥ १६ ॥

अनयैव जपाभिषेकहोम-
क्रियया स्यादनुरञ्जनं जनानाम् ।
भजतां सकलार्थसाधनार्थं
मुनिवर्यैः परिकल्पितोऽयमादौ ॥ १७ ॥

उत्तिष्ठपदं प्रथमं
पुरुषि ततः किंपदं स्वपिषियुक्तम् ।
भयमपि मेऽन्ते समुप-
स्थितमित्युच्चार्य यदिपदं प्रवदेत् ॥ १८ ॥

1. वियुज्यते ।

शक्यमशक्यं वोक्त्वा
तन्मे भगवति निगद्य शमयपदम् ।
प्रोक्ता ठद्वितययुतं
सप्तत्रिंशाक्षरो मनुः प्रोक्तः ॥ १९ ॥

आरण्यकोऽप्यनुष्टु-
ब्वनदुर्गाख्याः क्रमेण भगवत्याः ।
ऋष्यादिकाः स्वमनुना
विहितान्यङ्गानि वाक्यभिन्नेन ॥ २० ॥

षड्भिश्चतुर्भिरष्टभि-
रष्टार्णैः षड्भिरपि च पञ्चार्णैः ।
जातियुतैश्च विदध्या-
दङ्गानि च षट् क्रमेण विशदमतिः ॥ २१ ॥

पद्वयसंधिगुदान्ध्वा-
धारोदरपार्श्वहृत्स्तनेषु गले ।
दोःसंधिवदननासा-
कपोलदृक्कर्णयुग्भ्रुके न्यस्येत् ॥ २२ ॥

हेमप्रख्यामिन्दुखण्डात्तमौलिं
शङ्खारिष्टाभीतिहस्तां त्रिणेत्राम् ।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां
देवीं दुर्गां दिव्यरूपां नमामि ॥ २३ ॥

अरिशङ्खकृपाणखेटबाणा-
न्सधनुःशूलकतर्जिनीर्दधाना ।
भवतां महिषोत्तमाङ्गसंस्था
नवदूर्वासदृशी श्रियेऽस्तु दुर्गा ॥ २४ ॥

चक्रदरखड्गखेटक-
शरकार्मुकशूलसंज्ञकपालैः ।
ऋष्टिमुसलकुन्तनन्दक-
वलयगदाभिण्डिपालशक्त्याख्यैः ॥ २५ ॥

उद्यद्विकृतिभुजाढ्या
[1]महिषाङ्के सजलजलदसंकाशा ।
सिंहस्था वाग्निनिभा
पद्मस्था वाथ मरकतप्रख्या ॥ २६ ॥

1. माहिषके.

व्याघ्रत्वक्परिधाना
सर्वाभरणान्विता त्रिणेत्रा च ।
अहिकलितनीलकुञ्चित-
कुन्तलविलसत्किरीटशशिशकला ॥ २७ ॥

सर्पमयवलयनूपुर-
काञ्चीकेयूरहारसंपन्ना[1] ।
सुरदितिजाभयभयदा
ध्येया कात्यायनी प्रयोगविधौ ॥ २८ ॥

संयतचित्तो लक्षच-
तुष्कं जप्त्वा हुनेद्दशांशेन ।
व्रीहितिलाज्यहविर्भिः
सम्यक्संचिन्त्य भगवतीमनले ॥ २९ ॥

पीठे पूर्वप्रोक्ते
पूज्याङ्गैः शक्तिभिस्तथाष्टाभिः ।
अष्टायुधैश्च मातृभि-
राशेशैः क्रमश एव दुर्गेयम् ॥ ३० ॥

1. ०संभिन्ना ।

आर्या दुर्गा भद्रा
सभद्रकाली तथाम्बिकाख्या च ।
क्षेम्या सवेदगर्भा
क्षेमकरी चेति शक्तयः प्रोक्ताः ॥ ३१ ॥

अरिदरकृपाणखेटक-
बाणधनुःशूलसंयुतकपालाः ।
अष्टायुधाः क्रमोक्ताः
पूर्वविधानवद्यथोदितं शेषम् ॥ ३२ ॥

इत्थं जपार्चनाहुत-
सिद्धमनोर्मन्त्रिणः प्रयोगविधिः ।
विहितो जपः प्रतिदिनं
निजरक्षायै शतं सहस्रं वा ॥ ३३ ॥

उद्दिश्य यद्यदेनं
मनुं जपेदथ सहस्रमयुतं वा ।
तत्तन्मन्त्री लभ्ये-
दचिरात्तदनुग्रहादसाध्यमपि ॥ ३४ ॥

*P. 13a

स्नात्वार्काभिमुखः स-
न्नाभिद्वयसेऽम्भसि स्थितो मन्त्री ।
अष्टोर्ध्वशतं प्रजपे-
न्निजवाञ्छितसिद्धये च लक्ष्म्यै च ॥ ३५ ॥

ध्यात्वा त्रिशूलहस्तां
ज्वरसर्पग्रहविपत्सु जन्तूनाम् ।
संस्पृश्य शिरसि जप्या-
त्तज्जन्योपद्रवं शमयेत् ॥ ३६ ॥

अयुतं तिलैर्वनोत्थै
राजीभिर्वा हुनेत्समिद्भिर्वा ।
मायूरिकीभिरचिरा-
त्सोऽपस्मारादिकांश्च नाशयति ॥ ३७ ॥

जुहुयाद्रौहिणसमिधा-
मयुतं मन्त्री पुनः सशुङ्गानाम् ।
सर्वापदां विमुक्त्यै
सर्वसमृद्ध्यै ग्रहादिशान्त्यै च ॥ ३८ ॥

आर्कैः सामित्सहस्रैः
प्रतिजुहुयादर्कवारमारभ्य ।
दशदिनतोऽर्वाग्वाञ्छित-
सिद्धिर्देव्याः प्रसादतो भवति ॥ ३९ ॥

शुद्धैः सारैरिध्मै-
स्त्रिदिनं वा सप्तरात्रकं वापि ।
प्रतिशकलं प्रतिजुहुया-
न्मनुना निजवाञ्छिताप्तये मन्त्री ॥ ४० ॥

विशिखानां त्रिंशत्कं
पुरो निधायाथ तीक्ष्णतैलेन ।
जुहुयात्सहस्रकं वा-
युतमपि संख्यासु पूरितासु पुनः ॥ ४१ ॥

संपातिततैलेन च
शरान्समभ्यज्य पूर्ववज्जप्यात् ।
तानथ शूरो धन्वी
शुद्धाचारः प्रवेधयेद्बाणान् ॥ ४२ ॥

प्रतिसेनाया मध्ये
सा धावति सद्य एव संभ्रान्ता ।
भूयो गुरुं धनैरपि
धान्यैः परिपूजयेच्च कारयिता ॥ ४३ ॥

अष्टोत्तरशतजप्तं
यच्छिरसि प्रक्षिपेच्चिताभस्म ।
स तु विद्विष्टो लोकै-
र्देशाद्देशान्तरं परिभ्रमति ॥ ४४ ॥

कारस्करस्य पत्रै-
रष्टसहस्रैर्निपातितैर्मरुता ।
जुहुयात्सपादपांसुभि-
रुच्चाटकरं भवेद्रिपोः सद्यः ॥ ४५ ॥

सेनां संस्तम्भयितुं
विषतरुसुमनःसहस्रकं जुहुयात् ।
तावद्भिस्तत्पत्रै-
र्जुहुयान्मन्त्री च तां निवर्तयितुम् ॥ ४६ ॥

विषतरुमयीं च शत्रोः

प्रतिकृतिमसकृत्प्रतिष्ठितप्राणाम् ।

छित्त्वा च्छित्त्वा काको-

लूकवसाक्तैः सहस्रमष्टौ च ॥ ४७ ॥

असितचतुर्दश्यां त-

द्गात्रैर्जुहुयादरण्यकेऽर्धनिशि ।

त्रिचतुर्दशीप्रयोगा-

दर्वाङ् म्रियते रिपुर्न संदेहः ॥ ४८ ॥

[1]स्ववसारक्तोपेतै-

र्जुहुयात्पत्रैरुलूकवायसयोः ।

म्रियतेऽरातिर्मत्त-

स्तून्मत्तसमित्सहस्रहोमेन ॥ ४९ ॥

संस्थापितानिलां तां

प्रतिकृतिमुष्णोदके विनिक्षिप्य ।

प्रजपेदुन्मादः स्या-

च्छत्रोर्दुग्धाभिषेकतः शान्तिः ॥ ५० ॥

---

1. श्ववसा०

रविबिम्बगतामरुणां
करयुगपरिक्लृप्तशूलतर्जनिकाम् ।
ध्यात्वायुतं प्रजप्या-
न्मारयितुं सद्य एव रिपुनिवहम् ॥ ५१ ॥

असिखेटकरार्कस्था
क्रुद्धा मारयति सैव जपविधिना ।
सिंहस्था बाणधनु-
ष्करा समुच्चाटयेदरीनाचिरात् ॥ ५२ ॥

विषतरुसमिद्युतहुता-
दथ करिणो रोगिणो भवन्त्यचिरात् ।
तत्पर्णैश्च विनाश-
स्तेषामुच्चाटनं च तत्पुष्पैः ॥ ५३ ॥

आनित्यसमिद्धोमा-
द्रोगा नश्यन्ति दन्तिनामचिरात् ।
तत्पुष्पैर्मधुराक्तै-
र्होमाच्च वशीभवन्ति मातङ्गाः ॥ ५४ ॥

त्रिमधुरयुतैरनित्यक-
पत्रैर्मत्ता भवन्ति ते सद्यः ।
रक्षाकरस्तु करिणां
तज्जापितपञ्चगव्यलेपः स्यात् ॥ ५५ ॥

आज्यतिलराज्यनित्यक-
दुग्धोदकपञ्चगव्यतण्डुलकैः ।
सघृतैश्च प्रत्येकं
सहस्रहवनं गजाश्ववर्धनकृत् ॥ ५६ ॥

द्विजभूरुहं महान्तं
छित्त्वा निर्भिद्य पञ्चधा भूयः ।
आशाक्रमेण पञ्चा-
युधा विधेयाश्च साधुशिल्पविदा ॥ ५७ ॥

शङ्खः सनन्दकोऽरिः
शार्ङ्गः कौमोदकी दिशाक्रमतः ।
पञ्चेति पञ्चगव्ये
निधाय जप्याश्च पञ्चसाहस्रम् ॥ ५८ ॥

तावद्धृतेन जुहुया-
त्तेष्वथ संपात्य साधु संपातम् ।
पुनरपि तावज्जप्त्वा
मध्याद्यघटेषु पञ्चगव्ययुतम् ॥ ५९ ॥

संस्थाप्य समीकृत्य च
बलिं हरेत्तत्र तत्र तन्मन्त्रैः ।
पुरराष्ट्रग्रामाणां
कार्या रक्षैवमेव मन्त्रविदा ॥ ६० ॥

यस्मिन्देशे विहिता
रक्षेयं तत्र वर्धते महालक्ष्मीः ।
धनधान्यसमृद्धिः स्या-
द्रिपुचोराद्याश्च नैव बाधन्ते ॥ ६१ ॥

पद्मोत्पलकुमुदहुतै-
र्नृपपत्नीब्राह्मणान्वशीकुरुते ।
कह्लारलोणहोमै-
र्विट्छूद्राञ्जातिभिस्तथा ग्रामम् ॥ ६२ ॥

अथ वारिदरगदाम्बुज-
करं मुकुन्दं विचिन्त्य रविबिम्बे ।
व्यत्यस्तपुरुषभगवति-
पदं मनुं जपतु सर्वसिद्धिकरम् ॥ ६३ ॥

साध्याख्याक्षरगर्भितं मनुममुं पत्रे लिखित्वा च त-
च्चक्रीहस्तमृदा कृतप्रतिकृतेर्विन्यस्य मन्त्री हृदि ।
सप्ताहं त्वथ पुत्तलीमभिमुखे संस्थाप्य संध्यालये
जप्यादष्टशतं चिराय वशतां गच्छत्यसौ निश्चयः ॥ ६४ ॥

व्रीहीणां जुहुयान्नरोऽष्टशतकं संवत्सराद्व्रीहिमा-
न्गोदुग्धैः पशुमान्घृतैः कनकवान्दध्ना च सर्वर्द्धिमान् ।
अन्नैरन्नसमृद्धिमांश्च मधुभिः स्याद्रत्नवान्दूर्वया-
प्यायुष्मान्प्रतिपद्धुतेन महतीं सद्यः श्रियं प्राप्नुयात् ॥

छान्तं मरुत्तुरीयवर्णयुतं सवाद्यं
संवीप्स्य शूलिनिपदं च सदुष्टशब्दम् ।
पश्चान्तकं सदहनं परिभाष्य हान्तं
हुंफड्द्विठान्तामिति शूलिनिमन्त्रमेतत् ॥ ६५ ॥

ऋषिर्दीर्घतमाश्छन्दः ककुब्दुर्गा च देवता ।
दुर्गा हृद्वरदा शीर्षं शिखा स्याद्विन्ध्यवासिनी ॥ ६६ ॥

वर्म चासुरमर्दिन्या युद्धपूर्वप्रिये तथा ।
त्रासयद्वितयं चास्त्रं देवसिद्धसुपूजिते ॥ ६७ ॥

नन्दिन्यन्ते रक्षयुगं महायोगेश्वरीति च ।
शूलिन्याद्यं तु पञ्चाङ्गं हुंफडन्तमितीरितम् ।
अङ्गकर्मैव रक्षाकृत्प्रोक्तं ग्रहनिवारणम् ॥ ६८ ॥

बिभ्राणा शूलबाणास्यरिसदरगदाचापपाशान्कराब्जै-
र्मेघश्यामा [1]किरीटोल्लिखितजलधरा भीषणा भूषणाढ्या ।
सिंहस्कन्धाधिरूढा चतसृभिरसिखेटान्विताभिः परीता
कन्याभिर्भिन्नदैत्या भवतु भवभयध्वंसनी शूलिनी वः ॥

एवं विचिन्त्य पुनरक्षरलक्षमेनं
मन्त्री जपेत्प्रतिजुहोतु दशांशतोऽन्ते ।
आज्येन साज्यहविषा प्रयजेच्च देवी-
मङ्गाष्टशक्तिनिजहेतिदिशाधिनाथैः ॥ ७० ॥

---

1. किरीटोल्लसितशशिकलोल्लासिता

दुर्गा च वरदा विन्ध्यवासिन्यसुरमर्दिनी ।
युद्धप्रिया देवसिद्धपूजिता नन्दिनी तथा ॥ ७१ ॥

महायोगेश्वरी चाष्ट शक्तयः समुदीरिताः ।
रथाङ्गशङ्खासिगदाबाणकार्मुकसंज्ञिताः ॥ ७२ ॥

सशूलपाशा यष्टव्या दिक्क्रमादष्ट हेतयः ।
दीक्षाजपहुतार्चाभिः सिद्धिः कर्म समाचरेत् ।
आमयोन्मादभूतापस्मारक्ष्वेलशमादिकम् ॥ ७३ ॥

उद्घूर्णैः प्रहरणकैरुदीर्णवेगैः
शूलाद्यैर्निजमथ शूलिनीं विचिन्त्य ।
आविश्य क्षणमिव जप्यमानमन्त्र-
स्यावृत्त्या द्रुतमपयान्ति भूतसंघाः ॥ ७४ ॥

अन्तराथ पुनरात्मरोगिणा-
मम्बिकामपि निजायुधाकुलाम् ।
संविचिन्त्य जपतोऽरिमुद्रया
विद्रवन्त्यवशविग्रहा ग्रहाः ॥ ७५ ॥

अहिमूषिकवृश्चिकादिजं वा
बहुपात्कुक्कुरलूतिकोद्भवं वा ।

विषमाशु विनाशयेन्नराणां
प्रतिपत्त्यैव च विन्ध्यवासिनी सा ॥ ७६ ॥

आधाय बाणे निशितेऽथ देवीं
क्षेमंकरीं मन्त्रमिमं जपित्वा ।
तद्वेधनादेव विपक्षसेना
दिशो दशाधावति नष्टसंज्ञा ॥ ७७ ॥

[1]आत्मानमार्यां प्रतिपद्य शूल-
पाशान्वितां वैरिबलं प्रविश्य ।
मन्त्रं जपन्नाशु परायुधानि
गृह्णाति मुष्णाति च बोधमेषाम् ॥ ७८ ॥

तिलसिद्धार्थैर्जुहुया-
ल्लक्षं मन्त्री सपत्ननामयुतम् ।
स तु रोगाभिहतात्मा
मृतिमेति न तत्र संदेहः ॥ ७९ ॥

त्रिमधुरयुक्तैश्च तिलै-
रष्टसहस्रं जुहोति योऽनुदिनम् ।

1. आत्मानमम्बां

अप्रतिहतास्य शक्ति-
भूयात्प्रागेव वत्सरतः ॥ ८० ॥

सर्पिषाष्टशतहोमतोऽमुना
वाञ्छितं सकलमब्दतो भवेत् ।
दूर्वया त्रिकयुजेप्सितं लभे-
त्सम्यगष्टशतसंख्यया हुतात् ॥ ८१ ॥

क्षुरिकाकृपाणनखरा
मन्त्रेणानेन साधु संजप्ताः ।
संपाताज्यसुसिक्ता
अप्रतिहतशक्तयो भवन्ति युधि ॥ ८२ ॥

गोमयविहिताङ्गुलिकां
जुहुयाच्छतमष्टपूर्वकं मन्त्री ।
दिवसैः सप्तभिरिष्टौ
द्विष्टौ च मिथो वियोगिनौ भवतः ॥ ८३ ॥

अस्पृष्टकुं गोमयमन्तरिक्षे
संगृह्य जप्त्वा त्रिसहस्रमानम् ।

धियासतां वै निखनेन्नराणां
संस्तम्भनं द्वारि चमूमुखे च ॥ ८४ ॥

पानीयान्धःपाणिमार्यां प्रसन्नां
ध्यात्वा ग्रामं वा पुरं वापि गच्छन् ।
जप्त्वा मन्त्रं तर्पयित्वा प्रविष्टो
मृष्टं भोज्यं प्राप्नुयाद्भृत्यवर्गैः ॥ ८५ ॥

आर्कैर्मन्त्री त्रिमधुरयुतैरर्कसाहस्रमिध्मै-
राश्वत्थैर्वा त्वतिविशदचेतास्तिलैर्वा जुहोतु ।
यानुद्दिश्यावहितमनसा तन्मये सम्यगग्नौ
ते वश्याः स्युर्विधुरितधियो नात्र कार्यो विचारः ॥ ८६ ॥

कुर्यात्प्रयोगानपि दावदुर्गा-
कल्पोदितान्वै मनुनामुना च ।
मन्त्री जपार्चाहुतितर्पणाद्या-
न्नाल्पो हि मन्वोरनयोर्विशेषः ॥ ८७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे त्रयोदशः पटलः ॥

चतुर्दशः पटलः ॥

अथ कथयिष्ये मन्त्रं

चतुरक्षरसंज्ञकं समासेन ।

प्रणवो भुवनाधीशो

दण्डिखमस्यादिको विसर्गान्तः ॥ १ ॥

ऋषिरस्याजश्छन्दो

गायत्रं देवता च भुवनेशी ।

अङ्गानि षट् क्रमेण

प्रोक्तानि प्रणवशक्तिबीजाभ्याम् ॥ २ ॥

भास्वद्रत्नौघमौलिस्फुरदमृतरुचो रञ्जयच्चारु रेखां

सम्यक्संतप्तकार्तस्वरकमलजपाभासुराभिः प्रभाभिः ।

विश्वाकाशावकाशं ज्वलयदशिशिरं धर्तृ पाशाङ्कुशेष्टा-

भीतीनां भङ्गितुङ्गस्तनमवतु जगन्मातुरार्कं वपुर्वः ॥

मंदीक्षितोऽथ प्रजपेच्च मन्त्रं
मन्त्री पुनर्लक्षचतुष्कमेनम् ।
पुष्पैस्तदन्ते द्विजवृक्षजातैः
स्वादुप्लुतैर्वा जुहुयात्सरोजैः ॥ ४ ॥

मनोरथार्कात्मतया त्वनेन
प्रवर्त्यतेऽर्घ्येपहिता प्रपूजा ।
समे सुमृष्टे रचयेद्विविक्ते
शुद्धे तले स्थण्डिलमङ्गणस्य ॥ ५ ॥

प्रयजेदथ प्रभूतां
विमलां साराह्वयां समाराध्याम् ।
परमसुखामग्न्यादि-
ष्वश्रिषु मध्ये च पीठक्लृप्तेः प्राक् ॥ ६ ॥

ह्रस्वत्रयक्लीबवियोजिताभिः
क्रमात्कृशान्विन्दुयुताभिरज्भिः ।
सहाभिपूज्या नव शक्तयः स्युः
प्रोद्योतनाः प्राज्यतरप्रभावाः ॥ ७ ॥

दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ।
अमोघा विद्युता चैव नवमी सर्वतोमुखी ॥ ८ ॥

ब्रह्माविष्णुशिवात्मकं
समीर्य सौराय योगपीठाय ।
प्रोक्त्वेति नतिमपि पुनः
समापयेत्पीठमन्त्रमहिमरुचेः ॥ ९ ॥

आवाह्य हार्ल्लेखिकमर्कमर्घ्य-
पाद्याचमाद्यैर्मधुपर्कयुक्तैः ।
प्रपूजयेदावरणैः समस्त-
संपत्त्यवाप्त्यै तदधीनचेताः ॥ १० ॥

हृल्लेखाद्याः पञ्च च
षड्भिरङ्गैस्तदनु मातृभिः पश्चात् ।
[1]ओंकाराद्यैराशा-
पालैरभ्यर्चयेत्क्रमान्मन्त्री ॥ ११ ॥

---

1. अंकाराद्यै०
*P. 14a

प्रतिपूज्य शक्तिमिति तत्र पुरः
प्रणिधाय ताम्ररचितं चषकम् ।
प्रजपन्मनुं प्रतिगतक्रमतः
प्रतिपूरयेत्सुविमलैः सलिलैः ॥ १२ ॥

अक्षतकुशयवदूर्वा-
तिलसर्षपकुसुमचन्दनोपेतैः ।
प्रस्थग्राह्याच्छिद्रं
स्वैक्यं संभावयन्समाहितधीः ॥ १३ ॥

इष्ट्वा दिनेशमथ पीठगतं तथैव
व्योमस्थितं परिवृतावरणं विलोक्य ।
अष्टोत्तरं शतमथ प्रजपेन्मनुं तं
पूर्वोत्तरं निजकरेण पिधाय पात्रम् ॥ १४ ॥

भूयोऽभ्यर्च्य सुधामयं जलमथो तद्गन्धपुष्पादिभि-
र्जानुभ्यामवनिं गतश्चषकमप्यामस्तकं प्रोद्धरन् ।
दद्यान्मण्डलबद्धदृष्टिहृदयो भक्त्यार्घ्यमोजोबल-
ज्योतिर्दीप्तियशोधृतिस्मृतिकरं लक्ष्मीप्रदं भास्वते ॥ १५ ॥

अथ कृतपुष्पाञ्जलिरपि
　पुनरष्टशतं जपेन्मनुं मन्त्री ।
यावद्रश्मिषु भानो-
　र्व्याप्नोत्यम्भः सुधामयं तदपि ॥ १६ ॥

अमृतमयजलावसिक्तगात्रो
　दिनपतिरप्यमृतत्वमातनोति ।
धनविभवसुदारमित्रपुत्रं
　पशुगणजुष्टमनन्तभोगयोगि ॥ १७ ॥

तस्मादिनाय दिनशो ददतादिनादौ
　दैन्यापनोदितनवे दिनवल्लभाय ।
अर्घ्यं समग्रविभवस्त्वथ वार्कवारे
　पारं स गच्छति भवाह्वयवारिराशेः ॥ १८ ॥

अनुदिनमर्चयितव्यः
　पुंसा विधिनामुनाथ वा रवये ।
दद्यादर्घ्यद्वयमपि
　कुर्याद्वा वाञ्छितार्थसमवाप्त्यै ॥ १९ ॥

एकीकृत्य समस्तवस्त्वनुगतानादित्यचन्द्रानला-
न्वेदाद्येन गुणात्मकेन सगुणानाकृष्य हृल्लेखया ।
सर्वं तत्प्रतिमथ्य तावपि समावष्टभ्य हंसात्मना
नित्यं शुद्धमनन्यमक्षरपदं मन्त्री भवेद्योगतः ॥ २० ॥

अथ वदाम्यजपामनुमुत्तमं
सकलसंसृतियापनसाधनम् ।
दुरितरोगविषापहरं नृणा-
मिह परत्र च वाञ्छितसिद्धिदम् ॥ २१ ॥

विष्णुपदं ससुधाकरखण्डं
चन्द्रयुगावधिकं वतुरीयम् ।
क्षेत्रविदो मनुरेष समुक्तो
यं प्रजपत्यपि संततमात्मा ॥ २२ ॥

ऋष्याद्या ब्रह्मदैव्यादिगायत्रीपरमात्मकः ।
हंसाक्षीबकलादीर्घयुजाङ्गानि समाचरेत् ॥ २३ ॥

अरुणकनकवर्णं पद्मसंस्थं च गौरी-
हरनियमितचिह्नं सौम्य तानूनपातम् ।

भवतु भवदभीष्टावाप्तये पाशाटङ्का-
 भयवरदविचित्रं रूपमर्धाम्बिकेशम् ॥ २४ ॥

प्रजपेद्द्वादशलक्षं
 मनुमिममाज्यान्वितैश्च दौग्धान्नैः ।
तावत्सहस्रमानं
 जुहुयात्सौरे समर्चनापीठे ॥ २५ ॥

निक्षिप्य कलमस्मि-
 न्पूर्वोक्तानामपामथैकेन ।
आपूर्य चोपचर्य च
 विद्वानङ्गैः प्रपूजयेत्पूर्वम् ॥ २६ ॥

ऋतवसुवरनरसंज्ञा-
 स्तथर्तवो बद्रिपूर्विकाजान्ताः ।
आशोपाशास्थेया-
 स्ततो दिशापास्ततश्च वज्राद्याः ॥ २७ ॥

इति परिपूज्य च कलशं
 पुनरभिषिच्याथ नियमितोऽर्घ्यमपि ।

द्द्यादिनाय चैहिक-
पारत्रिकसिद्धये चिरं मन्त्री ॥ २८ ॥

इन्दुद्वयोदितसुधारसपूर्णसार्ण-
संबद्धबिन्दुसुसमेधितमादिबीजम् ।
संचिन्त्य यो मनुमिमं भजते मनस्वी
स्वात्मैक्यतोऽथ दुरितैः परिमुच्यतेऽसौ ॥ २९ ॥

व्योमानुगेन च सुधाम्बुमुचा सुदामा
प्रद्योतमानसविनिःसृतशीतरुग्भ्याम् ।
आबाधिता दहनचन्द्रलसन्महोभ्यां
रोगापमृत्युविषदाहरुजः प्रयान्ति ॥ ३० ॥

हंसाण्डाकाररूपं स्रुतपरमसुधं मूर्ध्नि चन्द्रं ज्वलन्तं
नीत्वा सौषुम्नमार्गे निशितमतिरथ व्याप्तदेहोपगात्रम् ।
स्मृत्वा संजप्य मन्त्रं पलितविषशिरोरुग्ज्वरोन्मादभूता-
पस्मारादींश्च मन्त्री हरति दुरितदौर्भाग्यदारिद्र्यदोषैः ॥

विधाय लिपिपङ्कजं मनुयुतोल्लसत्कर्णिकं
निधाय घटमत्र पूरयतु वारिणा तन्मुखम् ।

विधाय शशिनात्ममन्त्रयुतवामदोष्णा पुनः
सुधायितरसैः स्वसाध्यमभिषेचयेत्तज्जलैः ॥ ३२ ॥

नारी नरो वा विधिनाभिषिक्तो
मन्त्रेण तेनेति विषद्वयोढैः ।
रोगैस्तदाधिप्रभवैर्वियुक्त-
श्चिराय जीवेत्करणैः सुशुद्धैः ॥ ३३ ॥

करेण तेनैव जलाभिपूर्णं
प्रजप्य मन्त्री करकं पिधाय ।
सुधायितैस्तैर्विषिणं निषिञ्चे-
द्विषं निहन्यादपि कालकूटम् ॥ ३४ ॥

गदितं निजपाणितलं विषिणः
शिरसि प्रविधाय जलैः शितधीः ।
अचिरात्प्रतिमोचयते विषतो
मतिमानथ तक्षकदष्टमपि ॥ ३५ ॥

इत्यजपामन्त्रविधिः
संप्रोक्तः संग्रहेण मन्त्रिवराः ।

यं प्राप्य सकलवसुसुख-
धर्मयशोभुक्तिमुक्तिभाजः स्युः ॥ ३६ ॥

अरुणा शिखिदीर्घयुता
हृल्लेखा श्वेतया युतानन्ता ।
प्रोक्तः प्रयोजनानां
तिलकस्तु यथार्थवाचको मन्त्रः ॥ ३७ ॥

गुह्यादाचरणतलं
कण्ठादागुह्यमागलं कान्तान् ।
विन्यस्य मन्त्रबीजा-
न्क्रमेण मन्त्री करोतु चाङ्गानि ॥ ३८ ॥

मन्त्रस्य मध्यमनुना
दीर्घयुजाङ्गानि चेह कथितानि ।
ध्यायेत्पुनरहिमकरं
मन्त्री निजवाञ्छितार्थलाभाय ॥ ३९ ॥

अरुणसरोरुहसंस्थ-
स्त्रिदृगरुणोऽरुणसरोजयुगलधरः ।

कलिताभयवरदो द्युति-

बिम्बोऽमितभूषणस्त्विनोऽवतु वः ॥ ४१ ॥

कृतसंदीक्षो मन्त्री

दिनकरलक्षं जपेन्मनुं जुहुयात् ।

तावत्सहस्रमन्त्रैः

सघृतैर्मधुराप्लुतैस्तिलैरथ वा ॥ ४२ ॥

प्रागभिहितेन विधिना

पीठाद्यं प्रतिविधाय तत्र पुनः ।

विन्यस्य कलशमास्मि-

न्प्रपूजयेत्तरणिमपि च सावरणम् ॥ ४३ ॥

अङ्गैः प्रथमावरणं

ग्रहैर्द्वितीयं तृतीयमाशेशैः ।

मुख्यतरगन्धसुमनो-

धूपाद्यैरात्तभक्तिनम्रमनाः ॥ ४४ ॥

प्रागादिदिशासंस्थाः

शशिबुधगुरुभार्गवाः क्रमेण स्युः ।

आग्नेयादिष्वश्रिषु
  धरणिजमन्दाहिकेतवः पूज्याः ॥ ४५ ॥

शुभ्रासितपीतशुक्ला
  रक्तासितधूम्रकृष्णकाः क्रमशः ।
चन्द्राद्याः केत्वन्ता
  वामोरुन्यस्तवामकरलसिताः ॥ ४६ ॥

अपरकराभयमुद्रा-
  विकृतमुखोऽहिः कराहिताञ्जलियुक् ।
दंष्ट्रोग्रास्यो मन्दः
  सुवर्णसदृशांशुकादिभूषश्च ॥ ४७ ॥

संपूज्यैवं विधिना
  विधिवद्गोरोचनादिभिर्द्रव्यैः ।
दद्यादर्घ्यं रवये
  मन्त्री निजवाञ्छितार्थलाभाय ॥ ४८ ॥

गोरोचनाम्बुतिलवैणवराजिरक्त-
  शीताख्यशालिकरवीरजपाकुशाग्रान् ।

श्यामाकतण्डुलयुतांश्च यथाप्रलाभा-
न्संयोज्य भक्तिभरतोऽर्घ्यविधिर्विधेयः ॥ ४९ ॥

कृत्वा मण्डलमष्टपत्रलसितं तत्कर्णिकायां तथा
पत्राग्रेषु निधाय कुम्भनवकं तत्पूरयित्वा जलैः ।
आवाह्य क्रमशो ग्रहान्नव समाराध्याभिषेकक्रियां
कुर्याद्यो ग्रहवैकृतादि विलयं यान्त्यस्य लक्ष्मीर्भवेत् ॥

गृहपरिमितमिष्ट्वा पूर्वक्लृप्त्या दिनेशं
प्रतिजुहुत निजर्क्षे वैकृते वा ग्रहाणाम् ।
शुभमतिरुपरागे चन्द्रभान्वोः स्वभे वा
रिपुनृपजभये वा घोररूपे गदे वा ॥ ५१ ॥

अर्कद्विजाङ्घ्रिपमयूरकपिप्पलाश्च
सोदुम्बराः खदिरशम्यभिधाः सदूर्वाः ।
दर्भाह्वयाश्च समिधोऽष्टशतं क्रमेण
[1]सव्याहृतीनि घृतहव्यघृतानि होमः ॥ ५२ ॥

---

1. सर्पिर्हविर्घृतयुताः पृथगेव च स्युः ॥ ५२ ॥
आज्याहुत्या त्वादा-
वन्ते च व्याहृतीभिरपि जुहुयात् ।

सोमादीनां दिशि दिशि समाधाय वह्निं यथाव-
द्धोमे सम्यक्कृतवति मुदं यान्ति सर्वे ग्रहाश्च ।
युद्धे सम्यग्जयमपि रुजः शान्तिमायुश्च दीर्घं
कृत्वा शान्तिं व्रजति पुनरेकत्र वा सर्वहोमः ॥ ५३ ॥

अमुना [1]विधिना हुतार्चनाद्यैः
प्रभजेद्यो दिनशो नरो दिनेशम् ।
मणिभिः स धनैश्च धान्यवर्यैः
परिपूर्णावसथो भवेच्चिराय ॥ ५४ ॥

त्यद्यन्त आर्यसूर्यर्णा मेधारेचिकया गुणः ।
व्यत्ययोऽष्टाक्षरः प्रोक्तः सौरः सर्वार्थसाधकः ॥ ५५ ॥

देवभाग ऋषिः प्रोक्तो गायत्री च्छन्द उच्यते ।
आदित्यो देवता चास्य कथ्यन्तेऽङ्गान्यतो मनोः ॥ ५६ ॥

सत्यब्रह्माविष्णुरुद्रैः साग्निभिः सर्वसंयुतैः ।
तेजोज्वालामणिं हुंफट्स्वाहान्तैरङ्गमाचरेत् ॥ ५७ ॥

1. विधिनार्चनाहुताद्यैः.

आदित्यं रविभानू
  भास्करसूर्यौ न्यसेत्स्वरैर्लघुभिः ।
सशिरोमुखहृद्गुह्यक-
  चरणेषु क्रमश एव मन्त्रितमः ॥ ५८ ॥

सशिरोमुखगलहृदयो-
  दरनाभिशिवाङ्घ्रिषु प्रविन्यस्येत् ।
प्रणवाद्यैरष्टार्णैः
  क्रमेण सोऽयं तदक्षरन्यासः ॥ ५९ ॥

अरुणोरुणपङ्कजे निषण्णः
  कमलेऽभीतिवरौ करैर्दधानः ।
स्वरुचाहितमण्डलस्त्रिणेत्रो
  रविराकल्पशताकुलोऽवताद्वः ॥ ६० ॥

संदीक्षितस्तु मन्त्री
  मन्त्रं प्रजपेत्तु वर्णलक्षं तम् ।
जुहुयात्त्रिमधुरसिक्तै-
  र्दुग्धतरुसमिद्भिरैर्वसुसहस्रम् ॥ ६१ ॥

अथ वा सघृतैरन्नैः

समर्चयेन्नित्यशोऽर्घ्यमपि दद्यात् ।

पूर्वोक्त एव पीठे

कुम्भं प्रणिधाय साधु संपूर्य ॥ ६२ ॥

शुद्धाद्भिररुणवासो-

युगेन संवेष्ट्य पूजयेत्क्रमशः ।

अङ्गावृतैः परस्ता-

दादित्याद्यैरुषादिशक्तियुतैः ॥ ६३ ॥

मातृभिररुणान्ताभि-

र्ग्रहैः सुरैश्चान्तसूर्यपरिषद्भिः ।

सोषा सप्रज्ञा च

प्रभा च संध्या च शक्तयः प्रोक्ताः ॥ ६४ ॥

संपूज्यैवं दिनेशं पटुमतिरथ जप्त्वा च हुत्वाभिषेकं

कृत्वा दत्त्वेन संख्यां वसुमपि गुरवे सांशुकं भोजयेच्च ॥

विप्रानादित्यसंख्यानिति विदितमनुं नित्यशोऽर्घ्यं च दद्या-

द्वारे वा भास्करीये शुभतरचरितो वल्लभाय ग्रहाणाम् ॥

इतीह दिनकृन्मनुं भजति नित्यशो भक्तिमा-

न्य एष निचितेन्दिरो भवति नीरुजो वत्सरात् ।

समस्तदुरितापमृत्युरिपुभूतपीडादिका-

नपास्य सुसुखी च जीवति परं च भूयात्पदम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य

श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ

प्रपञ्चसारे चतुर्दशः पटलः ॥

पञ्चदशः पटलः ॥

—*—

अथ चन्द्रमनुं वक्ष्ये सजपार्चाहुतादिकम् ।
हिताय मन्त्रिणां सार्घ्यविधानं च समासतः ॥ १ ॥

भृगुः ससद्यः सार्धेन्दुर्बिन्दुहीनः पुनश्च सः ।
विषानन्तौ मान्तनती मन्त्रोऽयं सोमदैवतः ॥ २ ॥

दीर्घभाजा स्वबीजेन कुर्यादङ्गानि वै क्रमात् ।
विचिन्तयेत्पुनर्मन्त्री यथावन्मन्त्रदेवताम् ॥ ३ ॥

अमलकमलसंस्थः सुप्रसन्नाननेन्दु-
र्वरदकुमुदहस्तश्चारुहारादिभूषः ।
स्फटिकरजतवर्णो वाञ्छितप्राप्तये वो
भवतु भवदभीष्टोद्द्योतिताङ्कः शशाङ्कः ॥ ४ ॥

दीक्षितः प्रजपेन्मन्त्री रसलक्षं मनुं वशी ।
पञ्चमीदशमीपञ्चदशीषु तु विशेषतः ॥ ५ ॥

अयुतं प्रजपेन्मन्त्री सायाह्नेऽभ्यर्च्य भाधिपम् ।
पयोन्नेन हुनेद्भूयः सघृतेन सहस्रकम् ॥ ६ ॥

ससर्पिषा पायसेन षट्सहस्रं हुनेत्ततः ।
पीठक्लृप्तौ तु सोमान्तं परिपूज्यार्चयेद्विधुम् ॥ ७ ॥

केसरेष्वङ्गपूजा स्याच्छक्तीस्तद्बहिरर्चयेत् ।
रोहिणीं कृत्तिकाख्यां च रेवतीं भरणीं तथा ॥ ८ ॥

रात्रिमार्द्राह्वयां ज्योत्स्नां कलां च क्रमतोऽर्चयेत् ।
दलाग्रेषु ग्रहानष्टौ दिशानाथाननन्तरम् ॥ ९ ॥

सुसितैर्गन्धकुसुमैः पात्रैः रूप्यमयैस्तथा ।
शक्तयः फुल्लकुन्दाभास्तारहारविभूषणाः ॥ १० ॥

सितमाल्याम्बरालेपा रचिताञ्जलयो मताः ।
इति सिद्धमनुर्मन्त्री शशिनं मूर्ध्नि चिन्तयेत् ॥ ११ ॥

त्रिसहस्रं जपेद्रात्रौ मासान्मृत्युंजयो भवेत् ।
हृदयाम्भोजसंस्थं तं भावयन्प्रजपन्मनुम् ॥ १२ ॥

राज्यैश्वर्यं वत्सरेण प्राप्नुयादप्यकिंचनः ।
आहाराचारनिरतो जपेल्लक्षचतुष्टयम् ॥ १३ ॥

असंशयतरं तेन [1]निधानमुपलभ्यते ।
घोरा ज्वरा गराः शीर्षरोगाः कृत्याश्च कामिलाः ॥ १४ ॥

तन्मन्त्रायुतजापेन नश्यन्ति सकलापदः ।
नित्यशः प्रजपेन्मन्त्रं पूर्णासु विजितेन्द्रियः ॥ १५ ॥

जपेन्मनुं यथाशक्ति लक्ष्मीसौभाग्यसिद्धये ।
त्रितयं मण्डलानां तु कृत्वा पाश्चात्त्यपौर्विकम् ॥

आसीनः पश्चिमे [2]मध्ये संस्थे द्रव्याणि विन्यसेत् ।
पूर्वस्मिन्पङ्कजोपेते पूर्ववत्सोममर्चयेत् ॥ १७ ॥

राकायामुदये राज्ञो निजकार्यं विचिन्तयेत् ।
संस्थाप्य राजतं तत्र चषकं परिपूरयेत् ॥ १८ ॥

गव्येन शुद्धपयसा स्पृष्टपात्रो जपेन्मनुम् ।
अष्टोत्तरशतावृत्त्या दद्यादर्घ्यमथेन्दवे ॥ १९ ॥

विद्यामन्त्रेण मन्त्रज्ञो यथावत्तद्गतात्मना ।
विद्याविद्यापदे प्रोक्त्वा मालिनीति च चन्द्रिणी ॥ २० ॥

चन्द्रमुख्यनिजायां च निगदेत्प्रणवादिकम् ।
प्रतिमासं च षण्मासात्सिद्धिमेष्यति काङ्क्षितम् ॥ २१ ॥

---

1. निधानमपि लभ्यते । 2. मध्यसंस्थे.

इष्टाय दीयते कन्या कन्यां विन्देन्निजेप्सिताम् ।
अमितां श्रियमाप्नोति कान्तिं पुत्रान्यशः पशून् ।
सोमार्घ्यदाता लभते दीर्घमायुश्च विन्दति ॥ २२ ॥

इति सोममन्त्रसिद्धिं
प्रणिगदितः संग्रहेण मन्त्रविदाम् ।
उपकृतयेऽमितलक्ष्म्यै
मेधायै प्रेत्य चेह संपत्त्यै ॥ २३ ॥

अथाग्निमन्त्रान्सकलार्थसिद्धि-
करान्प्रवक्ष्ये जगतो हिताय ।
सप्त्यादिक्लृप्तीनपि साङ्गभेदा-
न्सार्चाविशेषान्सजपादिकांश्च ॥ २४ ॥

वियतो दशमोऽर्घिसर्गयुक्तो
भुवसर्गौ भृगुलान्तषोडशाचः ।
हुतभुग्दयिता ध्रुवादिकोऽयं
मनुरुक्तः सुसमृद्धिदः कृशानोः ॥ २५ ॥

भृगुरपि तद्वषिश्छन्दो
गायत्री देवताग्निरुद्दिष्टः ।
प्राक्प्रोक्तान्यङ्गानि
[1]विशः समुक्तैश्च मन्त्रवाक्यैर्वा ॥ २६ ॥

शक्तिस्वस्तिकपाशा-
न्साङ्कुशवरदाभयान्दधात्त्रिमुखः ।
मकुटादिविविधभूषो-
ऽवताच्चिरं पावकः प्रसन्नो वः ॥ २७ ॥

जपेदिमं मनुमृतुलक्षमादरा-
द्दशांशतः प्रतिजुहुयात्पयोन्धसा ।
ससर्पिषाप्यसिततरैश्च षाष्टिकैः
समर्चयेदथ विधिवद्विभावसुम् ॥ २८ ॥

पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ।
रुचिरा [2]कालिनी चेति कृशानोर्नव शक्तयः ॥ २९ ॥

---

1. द्विशः; 2. ज्वालिनी.

पीठे तनूनपात:
प्रागङ्गैरष्टमूर्तिभिस्तदनु ।
भूयश्च शतमखाद्यै-
र्विधिनाथ हिरण्यरेतसं प्रयजेत् ॥ ३० ॥

आज्यैरष्टोर्ध्वशतं
प्रतिपदमारभ्य मन्त्रविद्दिनश: ।
चतुरो मासाञ्जुहुया-
ल्लक्ष्मीरत्यायता भवेत्तस्य ॥ ३१ ॥

शुद्धाभि: शालीभि-
र्दिनमनुजुहुयात्तथाब्दमात्रेण ।
शालीशालि गृहं स्या-
द्गोमहिषाद्यैश्च संकुलं तस्य ॥ ३२ ॥

शुद्धान्नैर्घृतसिक्तै:
प्रतिदिनमग्नौ समेधिते जुहुयात् ।
अन्नसमृद्धिर्महती
स्यादस्य निकेतनेऽब्दमात्रेण ॥ ३३ ॥

जुहुयात्तिलैः सुशुद्धैः
षण्मासाज्जायते महालक्ष्मीः ।
कुमुदैः कह्लारैरपि
जातीकुसुमैश्च जायते सिद्धिः ॥ ३४ ॥

पालाशैः पुनरिध्मकैः सरसिजैर्बिल्वैश्च रक्तोत्पलै-
र्दुग्धोर्वीरुहसंभवैः खदिरजैर्व्याघातवृक्षोद्भवैः ।
दूर्वाख्यैश्च शमीविकङ्कतभवैरष्टोर्ध्वयुक्तं शतं
नित्यं वा जुहुयात्प्रतिप्रतिपदं मन्त्री महासिद्धये ॥

तारं व्याहृतयश्चाग्निर्जातवेद इहावह ।
सर्वकर्माणि चेत्युक्त्वा साधयाग्निवधूर्मनुः ॥ ३६ ॥

ऋष्याद्याः पूर्वोक्ता
मन्त्रेणाङ्गानि वर्णभिन्नेन ।
भूतर्तुकरणसेन्द्रिय-
गुणयुग्मैर्जातिभेदितैस्तदपि ॥ ३७ ॥

अथ वा शक्तिस्वस्तिक-
दर्भाक्षस्रक्स्रुवस्रुगभयवरान् ।

दधदमिताकल्पो यो
वसुखतात्कनकमालिकालसितः ॥ ३८ ॥

वत्सरादेश्चतुर्दश्यां दिनादावेव दीक्षितः ।
मन्त्रं द्वादशसाहस्रं जपेत्सम्यगुपोषितः ॥ ३९ ॥

अर्चयेदङ्गमूर्तीश्च लोकेशकुलिशादिभिः ।
समिदाद्यममावास्यां परिशोध्य यथाविधि ॥ ४० ॥

ब्राह्मणान्भोजयित्वा च स्वयं भुक्त्वा समाहितः ।
परेऽह्नि प्रतिपद्येतैर्जुहुयादर्चितेऽनले ॥ ४१ ॥

मन्त्री वटसमिद्व्रीहितिलराजिहविर्घृतैः ।
अष्टोत्तरशतावृत्त्या हुनेदेकैकशः क्रमात् ॥ ४२ ॥

दशाहमेवं कृत्वा तु पुनरेकादशीतिथौ ।
शक्त्या प्रतर्प्य विप्रांश्च प्रदद्याद्गुरुदक्षिणाम् ॥ ४३ ॥

सुवर्णवासोधान्यानि शोणां गां च सतर्णकाम् ।
पुनरष्टोत्तरं मन्त्री सहस्रं दिनशो जपेत् ॥ ४४ ॥

विधिनेति विधातुरग्निपूजा-
मचिरेणैव भवेन्महासमृद्धिः ।

धनधान्यसुवर्णरत्नपूर्णा
धरणी गोवृषपुत्रमित्रकीर्णा ॥ ४५ ॥

प्रजपदथ वा सहस्रसंख्यं
दिनशो वत्सरतो भवेन्महाश्रीः ।
जुहुयात्प्रतिवासरं शताख्यं
हविषाब्देन भवेन्महासमृद्धिः ॥ ४६ ॥

पालाशैः कुसुमैर्हुनेद्दधिघृतक्षौद्राप्लुतैर्मण्डलं
नित्यं साष्टशतं तथैव करवीरोत्थैः समृद्ध्यै हुनेत् ।
षण्मासं कपिलाघृतेन दिनशोऽप्यष्टौ सहस्रं तथा
होतव्यं लभते स राजसदृशीं लक्ष्मीं यशो वा महत् ॥

उत्पूर्वात्तिष्ठशब्दात्पुरुषहरिपदे पिङ्गलान्ते निगद्य
प्रोच्याथो लोहिताक्षं पुनरपि च वदेद्देहि मेदान्क्रमेण ।
भूयो ब्रूयात्तथा दापय शशियुगलार्णाश्चतुर्विंशदर्णः
प्रोक्तो मन्त्रोऽखिलेष्टप्रतरणसुरसम्राङ्घ्रिपः स्यात्कृशानोः ॥

ऋष्याद्याः स्युः पूर्वव-
दृतुभूतदिशाक्षिकरणयुगलार्णैः ।

मूलमनुनाथ कुर्या-

दङ्गानि क्रमश एव मन्त्रितमः ॥ ४९ ॥

हैमाश्वत्थसुरद्रुमोदरभुवो निर्यान्तमश्वाकृतिं

वर्षन्तं धनधान्यरत्ननिचयान्रन्ध्रैः स्वकैः संततम् ।

ज्वालापल्लवितस्वरोमविवरं भक्तार्तिसंभेदनं

वन्दे धर्मसुखार्थमोक्षसुखदं[1] दिव्याकृतिं पावकम् ॥ ५० ॥

जप्याच्च लक्षमानं

मन्त्री संदीक्षितोऽथ मनुमेनम् ।

जुहुयाच्च तदवसानं

घृतसिक्तैः पायसैर्दशांशेन ॥ ५१ ॥

अङ्गैर्हुतवहमूर्तिभि-

राशेशैः संयजेत्तदस्त्रैश्च ।

पावकमिति मन्त्रितमो

गन्धाद्यैरनुदिनं तदुपहारैः ॥ ५२ ॥

दिनावतारे मनुमेनमन्वहं

जपेत्सहस्रं नियमेन मन्त्रवित् ।

1. ०फलदं

*P. 16

अधृष्यतायै यशसे श्रिये रुजां
विमुक्तये युक्तमतिस्तथायुषे ॥ ५३ ॥

शालीतण्डुलकैः सितैश्च पयसा कृत्वा हविः पावकं
गन्धाद्यैः परिपूज्य तेन हविषा संवर्त्य पिण्डं महत् ।
आज्यालोलितमेकमेव जुहुयाज्जप्त्वा मनुं मन्त्रवि-
त्साष्टोर्ध्वं प्रतिपद्यथो शतमतः स्यादिन्दिरा वत्सरात् ॥

अष्टोत्तरं शतमथो मृगमुद्रयैव
मन्त्री प्रतिप्रतिपदं जुहुयात्पयोन्नैः ।
साज्यैर्भवेन्न खलु तत्र विचारणीयं
संवत्सरात्स च निकेतनमिन्दिरायाः ॥ ५५ ॥

अष्टोर्ध्वशतं हविषा
मन्त्रेणानेन नित्यशो जुहुयात् ।
षण्मासादाढ्यतमो
भवति नरो नात्र संदेहः ॥ ५६ ॥

शालीभिः शुद्धाभिः
प्रतिदिनमष्टोत्तरं शतं जुहुयात् ।

धनधान्यसमृद्धः स्या-
न्मन्त्री संवत्सरार्धमात्रेण ॥ ५७ ॥

आज्यैर्युतं जुहुया-
त्प्रतिमासं प्रतिपदं समारभ्य ।
अतिमहती लक्ष्मीः स्या-
दस्य तु षण्मासतो न संदेहः ॥ ५८ ॥

अरुणैः पुनरुत्पलैः शतं यो
मधुराक्तैः प्रजुहोति वत्सरार्धम् ।
मनुनाप्यमुना दशाधिकं स
प्रलभेन्मङ्क्षु महत्तरां च लक्ष्मीम् ॥ ५९ ॥

जातीपलाशकरवीरजपाख्यबिल्व-
व्याघातकेसरकुरण्डभवैः प्रसूनैः ।
एकैकशः शतमथो मधुरत्रयाक्तै-
र्जुह्वत्प्रतिप्रतिपदं श्रियमेति वर्षात् ॥ ६० ॥

खण्डैश्च सप्तदिनमप्यमृतालतोत्थै-
र्मन्त्री हुनेद्गुणसहस्रमथो पयोक्तैः ।

सम्यक्समर्च्य दहनं नचिरेण जन्तु-

श्चातुर्थिकादिविषमज्वरतो वियुञ्ज्यात् ॥ ६१ ॥

क्षीरद्रुमत्वगभिपक्वजलैर्यथाव-

त्संपूर्य कुम्भमभिपूज्य कृशानुमत्र ।

जप्त्वा मनुं पुनरमुं त्रिसहस्रमानं

सेकक्रिया ज्वरहरी ग्रहवैकृतघ्नी ॥ ६२ ॥

पयसि हृदयदघ्ने भानुमालोक्य तिष्ठ-

न्प्रजपतु च सहस्रं नित्यशो मन्त्रमेनम् ।

स दुरितमपमृत्युं रोगजातांश्च हित्वा

व्रजति नियतसौख्यं वत्सराद्दीर्घमायुः ॥ ६३ ॥

मनुनामुनाष्टशतजप्तमथ

प्रपिबेज्जलं ज्वलनदीपनकृत् ।

गुरु भुक्तमप्युदरगं त्वमुना

परिजापितं पचति कुक्ष्यनलः ॥ ६४ ॥

हुनेदरुणपङ्कजैस्त्रिमधुराप्लुतैर्नित्यशः

सहस्रमृतुमासतः पृथुतरा रमा जायते ।

प्रतिप्रतिपदं हुनेदिति बुधो धिया वत्सरा-
द्विनष्टवसुरप्यसौ भवति चेन्दिरामन्दिरम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे पञ्चदशः पटलः ॥

षोडशः पटलः ॥

—— * ——

अथ संग्रहेण कथयामि
मनुमपि महागणेशितुः ।
यमवहितधियः समुपास्य
सिद्धिमधिकां प्रपेदिरे ॥ १ ॥

तारश्रीशक्तिमारावनिगणपतिबीजानि दण्डीनि चोक्त्वा
पश्चाद्विघ्नं चतुर्थ्या वरवरदमथो सर्वयुक्तं जनं च ।
आभाष्य क्ष्वेलमेन्तं वशमिति च तथैवानयेति द्विठान्तः
प्रोक्तोऽयं गाणपत्यो मनुरखिलविभूतिप्रदः कल्पशाखी ॥

ऋषिरपि गणकोऽस्य स्या-
च्छन्दोनिचृदन्विता च गायत्री ।
सकलसुरासुरवन्दित-
चरणयुगो देवता महागणपः ॥ ३ ॥

प्रणवादिबीजपीठ-
स्थितेन दीर्घस्वरान्वितेन सता ।
अङ्गानि षड्विदध्या-
न्मन्त्री विघ्नेश्वरस्य बीजेन ॥ ४ ॥

मन्दाराद्यैः कल्पक-
वृक्षविशेषैर्विशिष्टतरफलदैः ।
शिशिरितचतुराशेऽन्त-
र्बालातपचन्द्रिकाकुले च तले ॥ ५ ॥

ऐक्षवजलनिधिलहरी-
कणजालकवाहिना च गन्धवहेन ।
संसेविते च सुरतरु-
सुमनःश्रितमधुपपक्षचलनपरेण ॥ ६ ॥

रत्नमये मणिवज्र-
प्रवालफलपुष्पपल्लवस्य सतः ।
महतोऽधस्तादृतुभि-
र्युगपत्संसेवितस्य कल्पतरोः ॥ ७ ॥

सिंहमुखपादपीठग-

लिपिमयपद्मे त्रिषट्कोणोल्लसिते ।

आसीनस्त्वेकरदो

बृहदुदरो दशभुजोऽरुणतनुश्च गजवदनः ॥ ८ ॥

बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-

व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।

ध्येयो वल्लभया सपद्मकरयाश्लिष्टो ज्वलद्भूषया

विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥

करपुष्करधृतकलश-

स्रुतमणिमुक्ताप्रवालवर्षेण ।

अविरतधारां विकिर-

न्परितः साधकसमग्रसंपत्त्यै ॥ १० ॥

मदजललोलुपमधुकर-

मालां निजकर्णतालताडनया ।

निर्वासयन्मुहुर्मुहु-

रमरैरसुरैश्च सेवितो युगपत् ॥ ११ ॥

अग्रेऽथ बिल्वमभितश्च रमारमेशौ
तद्दक्षिणे वटजुषौ गिरिजावृषाङ्कौ ।
पृष्ठेऽथ पिप्पलजुषौ रतिपुष्पबाणौ
सव्ये प्रियङ्गुमभितश्च महीवराहौ ॥ १२ ॥

ध्येयौ च पद्मयुगचक्रदरैः पुरोक्तौ
पाशाङ्कुशाख्यपरशुत्रिशिखैरथान्यौ ।
युग्मोत्पलेक्षुमयचापधरौ[1] तृतीया-
वन्यौ शुकाह्वकलमाग्रगदारथाङ्गैः ॥ १३ ॥

ध्येयाः षट्कोणाश्रिषु
परितः पाशाङ्कुशाभयेष्टकराः ।
सप्रमदा गणपतयो
रक्ताकाराः प्रभिन्नमदविवशाः ॥ १४ ॥

अग्राश्रावामोदः
प्रमोदसुमुखौ च तदभितोऽश्रियुगे ।
पृष्ठे च दुर्मुखाख्य-
स्त्वमुमभितो विघ्नविघ्नकर्तारौ ॥ १५ ॥

1. ०शरौ

सव्यापसव्यभागे
तस्य ध्येयौ च शङ्खपद्मनिधी ।
मौक्तिकमाणिक्याभौ
वर्षन्तौ धारया धनानि सदा ॥ १६ ॥

सिद्धिसमृद्धी चान्या
कान्तिर्मदनावती मदद्रवया ।
द्राविणिवसुधाराख्ये
वसुमत्यापि विघ्ननिधियुगप्रमदाः ॥ १७ ॥

ध्यात्वैवं विघ्नपतिं
चत्वारिंशत्सहस्रसंयुक्तम् ।
प्रजपेल्लक्षचतुष्कं
चतुःसहस्रं च दीक्षितो मन्त्री ॥ १८ ॥

दिनशः स चतुश्चत्वा-
रिंशत्संख्यं प्रतर्पयेद्विघ्नम् ।
उक्तजपान्ते मन्त्री
जुहुयाच्च दशांशतोऽष्टभिर्द्रव्यैः ॥ १९ ॥

मोदकपृथुका लाजाः
  ससक्तवः सेक्षुनालिकेरतिलाः ।
कदलीफलसहितानी-
  त्यष्ट द्रव्याणि संप्रदिष्टानि ॥ २० ॥

अनुदिनमर्चयितव्यो
  जपता मनुमपि च मन्त्रिणा गणपः ।
प्राक्प्रोक्तपद्मपीठे
  सशक्तिके साधिका मनौ विधिना ॥ २१ ॥

तीव्रा ज्वालिनिनन्दे
  सभोगदा कामरूपिणी चोग्रा ।
तेजोवती च नित्या
  संप्रोक्ता विघ्ननाशिनी नवमी ॥ २२ ॥

सर्वयुतं शक्तिपदं
  प्रोक्त्वा कमलासनाय नम इति च ।
आसनमन्त्रः प्रोक्तो
  नवशक्त्यन्ते समर्चयेदमुना ॥ २३ ॥

आद्या मिथुनैरावृति-
रपरा सनिधिभिरपि च षड्विघ्नैः ।
अङ्गैरन्या मातृभि-
रपरेन्द्राद्यैश्च पञ्चमी पूज्या ॥ २४ ॥

दीक्षाभिषेकयुक्तः
प्रजपेत्संपूजयेदिति गणेशम् ।
अभिधीयतेऽस्य च पुन-
र्गुर्वादेशेन मन्त्रिणो दीक्षा ॥ २५ ॥

मध्ये च दिग्दलानां
चतुष्टयाग्रे प्रविन्यसेत्कलशान् ।
क्षीरद्रुबिल्वरोहिण-
पिप्पलफलिनीत्वगुद्भवैः कथितैः ॥ २६ ॥

संपूजयेद्यथाव-
त्क्रमात्समावाह्य गणपमिथुनानि ।
अभ्यर्च्य चोपचारै-
र्हुत्वा विधिवत्पुनः समभिषिञ्चेत् ॥ २७ ॥

इति जपहुतार्चनाद्यैः
सिद्धो मन्त्रेण कर्म कुर्वीत ।
अष्टद्रव्यैर्वान्यै-
र्हुनेच्च तत्तत्प्रयोजनावाप्त्यै ॥ २८ ॥

स्वर्णाप्त्यै मधुना च गव्यपयसा गोसिद्धये सर्पिषा
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना च सर्वर्द्धये ।
अन्नैरन्नसमृद्धये च सतिलैर्द्रव्याप्तये तण्डुलै-
र्लाजाभिर्यशसे कुसुम्भकुसुमैः साश्वारिजैर्वाससे ॥

पद्मैर्भूपतिमुत्पलैर्नृपवधूं तन्मन्त्रिणः कैरवै-
रश्वत्थादिसमिद्भिरग्रजमुखान्वर्णान्वधूः पिष्टजैः ।
पुत्तल्यादिभिरन्वहं च वशयेज्जुह्वन्ननावृष्टये
लोणैर्वृष्टिसमृद्धये च जुहुयान्मन्त्री पुनर्वेतसैः ॥ ३० ॥

मन्त्रेणाथ पुरामुनैव चतुरावृत्त्या समातर्प्य च
श्रीशक्तिस्मरभूविनायकरतीर्नाम्नैव बीजादिकम् ।
आमोदादिनिधिद्वयं च सचतुःपूर्वं चतुर्वारकं
मन्त्री तर्पणतत्परोऽभिलषितं संप्राप्नुयान्मण्डलात् ॥

अथ गजलिप्सुर्नृपति-
  र्गजवनमध्ये प्रसाधयेद्वारि ।
तन्निकटे तु विशालं
  चतुरश्रं कारयेच्च गृहवर्यम् ॥ ३२ ॥

परिवीतदृढावरणं
  तत्र चतुर्द्वारतोरणोल्लसितम् ।
तस्मिन्मण्डपवर्ये
  चतुरश्रामुन्नतां स्थलीं कृत्वा ॥ ३३ ॥

उत्तरभागे तस्याः
  कुण्डं रचयेद्यथा पुरा तत्र ।
चापजहरिभवमानुष-
  चक्रप्रोक्तानथाक्षरान्मन्त्री ॥ ३४ ॥

ऊर्ध्वादिमेखलासु
  क्रमेण विलिखेन्निजेष्टसमवाप्त्यै ।
संप्रोक्तलक्षणयुतं
  प्रविरचयेन्मण्डलं स्थलीमध्ये ॥ ३५ ॥

आवाह्य विघ्नेश्वरमर्चयित्वा
　　प्रागुक्तया तत्र विधानक्लृप्त्या ।
निवेदयित्वा सह भक्ष्यलेह्यैः
　　प्राज्यैश्च साज्यैरपि भोज्यजातैः ॥ ३६ ॥

आधाय वैश्वानरमत्र कुण्डे
　　समर्च्य मन्त्रैः क्रमशः कृशानोः ।
तैरेव पूर्वं जुहुयाद्धुतेन
　　मन्त्री समृद्ध्या च ततस्त्रिवारम् ॥ ३७ ॥

तारेण लक्ष्म्यद्रिसुतास्मरक्ष्मा-
　　विघ्नेशबीजैः क्रमशोऽनुबद्धैः ।
पदत्रयेणापि च मन्त्रराजं
　　विभज्य मन्त्री नवधा जुहोतु ॥ ३८ ॥

पुनः समस्तेन च मन्त्रवर्ण-
　　संख्यं प्रजुह्वन्नपि सर्पिषैव ।
पूर्वप्रदिष्टैर्जुहुयादथाष्ट-
　　द्रव्यैः प्रसिक्तैर्मधुरत्रयेण ॥ ३९ ॥

सचतुश्चत्वारिंश-
त्सहस्रसंख्यैश्चतुःशतैः श्रुतिभिः ।
दशकचतुष्कैर्हुत्वा
चत्वारिंशद्भिरन्तरेण दिनैः ॥ ४० ॥

करिकलभाः करिणीभिः
संपात्यन्तेऽवटेऽत्र गणपतिना ।
प्रतिदिनमभ्यवहार्य च
विप्रान्संवर्धितस्तदाशीर्भिः ॥ ४१ ॥

तेषां मातङ्गानां
दद्यात्पञ्चांशदक्षिणां गुरवे ।
तद्विक्रीतं वसु वा
प्रसादितायाथ तद्दशांशं वा ॥ ४२ ॥

मिथुनानां गणपानां
निध्योश्च तथाङ्गमातृलोकेशानाम् ।
मन्त्री घृतेन हुत्वा-
भ्यर्च्य च होमं समापयेत्सम्यक् ॥ ४३ ॥

पुनरुद्धृत्य निवेद्या-
दिकं समभ्यर्च्य गणपतिं सावरणम् ।
उद्वास्य स्वे हृदये
विहरेदित्यर्चना क्रमोद्दिष्टा ॥ ४४ ॥

प्रोक्तस्त्वेवं दशभुजमनुः संग्रहेणात्र भक्त्या
दीक्षां प्राप्तो विधिवदभिजस्त्वाथ हुत्वार्चयित्वा ।
नुत्वा नत्वा दिनमनु तथा तर्पयित्वा स्वकामा-
ल्लँब्ध्वा चान्ते व्रजति मुनिभिः प्रार्थनीयं पदं तत् ॥

स्मृतिपीठः पिनाकी सानुग्रहो बिन्दुसंयुतः ।
बीजमेतद्भुवः प्रोक्तं संस्तम्भनकरं परम् ॥ ४६ ॥

चतुरीयो विलोमेन तारादिर्बिन्दुसंयुतः ।
वैघ्नो मन्त्रो हृदन्तोऽर्चाविधौ होमे द्विठान्तकः ॥ ४७ ॥

गणकः स्यादृषिश्छन्दो निचृद्विघ्नश्च देवता ।
बीजेन दीर्घयुक्तेन दण्डिनाङ्गक्रियेरिता ॥ ४८ ॥

रक्तो रक्ताङ्गरागांशुककुसुमयुतस्तुन्दिलश्चन्द्रमौलि-
र्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरात्तनासः ।

हस्ताग्राक्लृप्तपाशाङ्कुशरदवरदो [1]नागयज्ञाभिभूषो
देवः पद्मासनो वो भवतु नतसुरो भूतये विघ्नराजः ॥

दीक्षितः प्रजपेल्लक्षचतुष्कं प्राक्समीरितैः ।
जुहुयादष्टभिर्द्रव्यैर्यथापूर्वं दशांशतः ॥ ५० ॥

पीठे तीव्रादिभिः पद्मकर्णिकायां विनायकम् ।
आवाह्य पूजयेद्दिक्षु चतुर्ष्वपि यजेत्पुनः ॥ ५१ ॥

गणाधिपगणेशौ च गणनायकमेव च ।
गणक्रीडं कर्णिकायामङ्गैः किञ्जल्कसंस्थितैः ॥ ५२ ॥

वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ ।
लम्बोदरश्च विकटो विघ्नराड्धूमवर्णकौ ॥ ५३ ॥

समर्चयेन्मातृवर्गं बाह्ये लोकेश्वरानपि ।
इति प्रोक्ता संग्रहेण गाणेशीयं समर्चना ॥ ५४ ॥

नालिकेरान्वितैर्मन्त्री सक्तुलाजतिलैर्हुनेत् ।
आरभ्याच्छां प्रतिपदं चतुर्थ्यन्तं चतुःशतम् ॥ ५५ ॥

दिनशः सर्ववश्यं स्यात्सर्वकामप्रदं नृणाम् ।
तिलतण्डुलकैर्लक्ष्मीवश्यकृच्च यशस्करम् ॥ ५६ ॥

---

1. नागवक्त्रोऽहिभूषो.

मधुरत्रयसिक्ताभिर्लाजाभिः सप्तवासरम् ।
जुहुयात्कन्यकार्थी वा कन्यका वा वरार्थिनी ॥ ५७ ॥

चतुर्थ्यां नालिकेरैस्तु होमः सद्यः श्रियावहः ।
हविषा घृतसिक्तेन सर्वकार्यार्थदो हुतः ॥ ५८ ॥

[1]दध्यन्नलोणमुद्राभिर्हुनेन्निशि चतुर्दिनम् ।
इष्टार्थसिद्ध्यै मतिमान्सद्यः संवादसिद्धये ॥ ५९ ॥

ईदृशं गणपं ध्यात्वा मन्त्री तोयैः सुधामयैः ।
दिनादौ दिनशस्तस्य तर्पयेन्मस्तके सुधीः ॥ ६० ॥

चत्वारिंशच्चतुःपूर्वं तत्पूर्वं वा चतुःशतम् ।
चत्वारिंशद्दिनात्तस्य काङ्क्षिता सिद्धिरेष्यति ॥ ६१ ॥

नवनीते नवे लिख्यादनुलोमविलोमकम् ।
उदरस्थितसाध्याख्यं तद्बीजं [2]तत्प्रतिष्ठितम् ॥ ६२ ॥

समीरणं प्रतिष्ठाप्य जप्त्वाष्टशतसंख्यकम् ।
तूर्णीं प्रभक्षयेदेतत्सप्तरात्राद्वशीकरम् ॥ ६३ ॥

अन्त्यासनोऽथ सूक्ष्मो
लोहितगोऽग्निः पुनः स एव स्यात् ।

1. दध्यक्त० 2. तत्प्रवेष्टितम्.

सादान्तेनायार्णौ
नत्यन्तो मनुरयं स्वबीजाद्यः ॥ ६४ ॥

ऋषिदेवते तु पूर्वे
च्छन्दस्तु विराडमुष्य संप्रोक्ता ।
बीजेन दीर्घभाजा
कथितोऽङ्गविधिः क्रमेण बिन्दुमता ॥ ६५ ॥

धृतपाशाङ्कुशकल्पक-
लतिकास्वरदश्च बीजपूरयुतः ।
शशिशकलकलितमौलि-
स्त्रिलोचनोऽरुणतनुश्च गजवदनः ॥ ६६ ॥

भासुरभूषणदीप्तो
बृहदुदरः पद्मविष्टरो ललितः ।
ध्येयोऽनायतदोःपद-
सरसिरुहः संपदे सदा मनुजैः ॥ ६७ ॥

दीक्षायुक्तः प्रजपे-
ल्लक्षं मनुमेनमथ तिलैर्युतम् ।

त्रिमधुरसिक्तैर्जुहुया-
त्पूर्वोक्तैर्वाथ वाष्टभिर्द्रव्यैः ॥ ६८ ॥

विघ्नविनायकवीराः
सशूलवरदेभवक्त्रकैकरदाः ।
लम्बोदरश्च मात-
ङ्गावृत्योरन्तरा च लोकेशाः ॥ ६९ ॥

पूज्याः सितघृतपायस-
हवनात्संजायते महालक्ष्मीः ।
केवलघृतहुतमुदितो
विघ्नः सद्यो वशीकरोति जगत् ॥ ७० ॥

एकमपि नालिकेरं
सचर्मलोष्टेन्धनं हुनेन्मन्त्री ।
दिनशश्चत्वारिंश-
द्दिनतः स तु वाञ्छितार्थमभ्येति ॥ ७१ ॥

सह पृथुकसक्तुलाजै-
स्तिलैरभीष्टार्थसिद्धये जुहुयात् ।

सापूपनालिकेरे-
क्षुककदलीभिस्तथा सुमधुराभिः ॥ ७२ ॥

अष्टभिरेतैर्विहितो
होमः सर्वार्थसाधको भवति ।
दिनशः सघृतान्नहुतो
गृहयात्रायापको गृहस्थानाम् ॥ ७३ ॥

अन्वहमन्वहमादौ
गणपं संतर्पयेच्चतुःपूर्वम् ।
चत्वारिंशद्वारैः
शुद्धजलैरिन्दिराप्तये मन्त्री ॥ ७४ ॥

समहागणपतियुक्तै-
र्विघ्नाद्यैर्दशभिराह्वयैर्दिनशः ।
तर्पणपूजाहुतविधि-
रपि वाञ्छितसिद्धिदायको भवति ॥ ७५ ॥

बिम्बादम्बुदवत्समेत्य सवितुः सोपानकै राजतै-
स्तोयं तोयजविष्टरं धृतलतादन्तं सपाशाङ्कुशम् ।

तासां साध्यनृके निधाय सुधया तद्रन्ध्रनिर्यातया
सिञ्चन्तं वपुरन्वहं गणपतिं स्मृत्वामृतैस्तर्पयेत् ॥

प्राग्भाषितानपि विधीन्विधिवद्विदध्या-
न्मन्त्री विशेषविदथान्वहमादरेण ।
एकत्र वा गणपतौ मनुजाः स्वरुच्या
नामानुरूपमनुमेनममी भजन्तु ॥ ७७ ॥

इति जपहुतपूजातर्पणैर्विघ्नराजं
प्रभजति मनुजो यस्तस्य शुद्धिर्विशाला ।
भवति सधनधान्या पुत्रमित्रादियुक्ता
विगतसकलविघ्ना विश्वसंवादिनी च ॥ ७८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे षोडशः पटलः ॥

सप्तदशः पटलः ॥

—*—

अथ मन्मथमन्त्रविधिं विधिना
कथयामि सहोमविधिं सजपम् ।
मथनस्य पुरामपि मोहकरं
व्यथिताखिलसिद्धसुरादिगणम् ॥ १ ॥

अजकलाप्रथमावनिशान्तिभि-
र्युतसुधाकरखण्डविकासिभिः ।
निगदितो मनुरेष मनोभुवः
सकलधर्मयशोर्थसुखावहः ॥ २ ॥

ऋष्यादिकाश्च संमो-
हनगायत्रीमनोभवाः प्रोक्ताः ।
बीजेन दीर्घभाजा
कथितान्यङ्गान्यमुष्य जातियुजा ॥ ३ ॥

अरुणमरुणवासोमाल्यदामाङ्गरागं
स्वकरकलितपाशं साङ्कुशास्त्रेषुचापम् ।
मणिमयमकुटाद्यैर्दीप्तमाकल्पजातै-
ररुणनलिनसंस्थं चिन्तयेदङ्गयोनिम् ॥ ४ ॥

तरणिलक्षममुं मनुमादरा-
त्समभिजप्य हुनेच्च दशांशकैः ।
तदनु किंशुकजैः प्रसवैः शुभै-
स्त्रिमधुरार्द्रतरैर्निजसिद्धये ॥ ५ ॥

मोहिनी क्षोभिणी त्रासी स्तम्भिन्याकर्षिणी तथा ।
द्राविणीह्लादिनीक्लिन्नाक्लेदिन्यः स्मरशक्तयः ॥ ६ ॥

आशान्तिद्वयवाम-
श्रुतिसर्गैर्द्रयुगकलबलैश्च सस्रैः ।
शोषणमोहनसंदी-
पनतापनमादनान्यजेत्क्रमशः ॥ ७ ॥

अनङ्गरूपा सानङ्गमदनानङ्गमन्मथा ।
अनङ्गकुसुमानङ्गकुसुमातुरसंज्ञका ॥ ८ ॥

अनङ्गशिशिरानङ्गमेखलानङ्गदीपिका ।
अङ्काशापालयोर्मध्ये बाणानङ्गावृतीर्यजेत् ॥ ९ ॥

आलिख्यात्कर्णिकायामनलपुरपुटे मारबीजं ससाध्यं
तद्रन्ध्रेष्वङ्गषट्कं बहिरपि गुणशो मारणाय त्रिवर्णान् ।
मालामन्त्रं दलाग्रेष्वपि गुहमुखशः पार्थिवाश्रिष्वनङ्गं
कुर्याद्यन्त्रं तदेतद्भुवनमपि वशे का कथा मानवेषु ॥ १० ॥

प्रोक्त्वाथ कामदेवा-
य विद्महे तदनु पुष्पबाणाय ।
तथा च धीमह्यन्ते
तन्नोऽनङ्गः प्रचोदयाद्गायत्री ॥ ११ ॥

नत्यन्ते कामदेवाय प्रोक्त्वा सर्वजनं वदेत् ।
प्रियायेति तथा सर्वजनसंमोहनाय च ॥ १२ ॥

दीप्सयित्वा ज्वलपदं प्रज्वलं च प्रभाषयेत् ।
पुनः सर्वजनस्येति हृदयं मम चेत्यथ ॥ १३ ॥

वशमुक्त्वा कुरु वीप्स्य कथयेद्वह्निवल्लभाम् ।
प्रोक्तो मदनमन्त्रोऽष्टचत्वारिंशाद्भिरक्षरैः ॥ १४ ॥

इति यन्त्रक्लृप्तकलशो बहुशः
 कतमं नरं न परिमोहयति ।
प्रमदावनीश्वरसभानगरा-
 दिकमाश्वरीनपि वशे कुरुते ॥ १५ ॥

वक्ष्ये विधानमन्य-
 न्मनोभवस्याथ मोहनं जगतः ।
येनार्चितः स देवो
 वाञ्छितमखिलं करोति मन्त्रविदाम् ॥ १६ ॥

अमृतोद्भवो मकरके-
 तनश्च संकल्पजाह्वयाक्षररूपौ[1] ।
इक्षुधनुर्धरपुष्पश-
 राख्यावङ्गानि वह्निजायान्तानि ॥ १७ ॥

अरुणतरवसनमाल्या-
 नुलेपनाभरणमिषुशरासधरम् ।
न्यस्तशरबीजदेहो
 ध्यायेदात्मानमङ्गजं रुचिरम् ॥ १८ ॥

---

1. क्षतरूपौ.

अङ्गबाणावृतेरूर्ध्वं पूज्याः षोडश शक्तयः ।
युवतिर्विप्रलम्भा च ज्योत्स्ना सुभ्रूर्मदद्रवा ॥ १९ ॥

सुरता वारुणी लोला कान्तिः सौदामिनी तथा ।
कामच्छत्रा चन्द्रलेखा शुकी च मदनाह्वया ॥ २० ॥

[1]योनिर्मायावती चेति शक्तयः स्युर्मनोभुवः ।
शोको मोहो विलासश्च विभ्रमो मदनातुरः ॥ २१ ॥

अपत्रपो युवा कामी चूतपुष्पो रतिप्रियः ।
ग्रीष्मस्तपान्त ऊर्जश्च हेमन्तः शिशिरो मदः ॥ २२ ॥

चतुर्थ्यामावृतौ पूज्याः स्युर्मारपरिचारकाः ।
परभृत्सारसौ चैव शुकमेघाह्वयौ तथा ॥ २३ ॥

अपाङ्गभ्रूविलासौ द्वौ हावभावौ स्मरप्रियाः ।
माधवी मालती चैव हरिणाक्षी मदोत्कटा ।
एताश्चामरहस्ताः स्युः पूज्याः कोणेषु संस्थिताः ॥ २४ ॥

हृल्लेखया स्वनाम्ना च शक्त्यादीनां समर्चनम् ।
इन्द्राद्यैः सप्तमी पूज्या स्मरार्चाविधिरीदृशः ॥ २५ ॥

1. मायामयी

मदनविधानमितीत्थं
प्रोक्तं योऽनेन पूजयेद्विधिना ।
स तु सकललोकपूज्यो
भवेन्मनोज्ञश्च मन्दिरं लक्ष्म्याः ॥ २६ ॥

विलसदहंकारतनु-
र्मनःशिवो विभ्रमास्पदीभूतः ।
बुद्धिशरीरां नारीं
नरः सदा चित्तयोनिमभिगच्छेत् ॥ २७ ॥

इति मदनयोगरत्या[1]
यो रमयेन्नित्यशो निजां वनिताम् ।
स तु भुक्तिमुक्तिकामी
वनिताजनहृदयमोहनो भवति ॥ २८ ॥

आत्मानं मदनं ध्यायेदाशुशुक्षणिरूपिणम् ।
तद्बीजाग्रं शिवज्वालातनुं तन्वीतनुं तथा ॥ २९ ॥

सुधामयीं च तद्योनिं नवनीतमयं स्मरेत् ।
संगच्छेच्च शिवज्वालालीढं तद्धृदयादिकम् ॥ ३० ॥

1. ०क्लृप्त्या.

आलिङ्गेदग्निसंस्पर्शद्रुततद्रूपकामृतम् ।
रसनाशिखया कर्षेत्तद्दन्तवसनामृतम् ॥ ३१ ॥

कुसुमास्त्रधिया बाह्ये स्पृशेत्कररुहैरपि ।
हानिं न कुर्याज्जीवस्य मन्त्री विशदमानसः ॥ ३२ ॥

एतावथोऽधोमध्योर्ध्वक्रमेणैवं समाहितम् ।
निजप्रियां भजेदेवं सा मारशरविह्वला ।
छायेवानपगा तस्य भवेदेवं भवान्तरे ॥ ३३ ॥

साध्याख्या कामवर्णैः प्रतिपुटितलसत्कर्णिकं पत्त्रराज-
त्तारर्त्विक्पक्षजाष्टादशसमिदृतुगण्डान्तगान्ताक्षराढ्यम् ।
आशाशूलाङ्कितं तद्विपतिरिपुदले सम्यगालिख्य सेरं
मारं जप्त्वास्य यामाशयति वशगता सा भवेत्सद्य एव ॥

हंसारूढो मदन-
त्रैलोक्यक्षोभको भवेदाशु ।
द्युयुतो रञ्जनकृत्स्या-
ज्जीवोपेतस्तथायुषे शस्तः ॥ ३५ ॥

तारयुजा त्वमुनाग्नौ
　हुत्वा संपातितेन चाज्येन ।
संभोजयेत्पतिं स्वं
　वनिता स नितान्तरञ्जितो भवति ॥ ३६ ॥

दध्यक्ताभिर्जुहुया-
　ल्लाजाभिः कन्यकां समाकाङ्क्षन् ।
कन्यापि वरं लभते
　विधिना नित्यानुरक्तममुनैव ॥ ३७ ॥

अभिनवैः सुमनोभिरशोकजै-
　र्दधितिलैर्विहिता हवनक्रिया ।
परमवश्यकरी परिकाङ्क्षिता-
　[1]मपि लभेदचिरादिव कन्यकाम् ॥ ३८ ॥

अभीष्टदायी स्मरणादपि स्मर-
　स्तथा जपादर्चनया विशेषतः ।
प्रसादतोऽस्याखिललोकवर्तिन-
　श्चिराय वश्याश्च भवन्ति मन्त्रिणः ॥ ३९ ॥

1. मभिवहे०

कुङा मध्यगताः ष्णायगोऽयर्णा यज्ञमध्यगाः ।
गोपीजनवकाराः स्युर्भायस्वाहास्मरादिकाः ॥ ४० ॥

ऋषिस्तु नारदोऽस्य स्याद्गायत्रं छन्द इष्यते ।
मन्त्रस्य देवता कृष्णस्तदङ्गविधिरुच्यते ॥ ४१ ॥

मूलमन्त्रचतुर्वर्णचतुष्केण द्विकेन च ।
प्रोक्तान्यङ्गानि भूयोऽमुं चिन्तयेद्देवकीसुतम् ॥ ४२ ॥

अव्यान्मीलत्कलापद्युतिरहिरिपुपिञ्छोल्लसत्केशजालो
गोपीनेत्रोत्पलाराधितललितवपुर्गोपगोवृन्दवीतः ।
श्रीमद्वक्त्रारविन्दप्रतिहसितशशाङ्काकृतिः पीतवासा
देवोऽसौ वेणुवाद्यक्षपितजनधृतिर्देवकीनन्दनो वः ॥

अयुतद्वितयावधिर्जपः स्या-
दरुणैरम्बुरुहैर्हुतो दशांशैः ।
मुरजिद्विहिते तु पीठवर्ये
दिनशो नन्दसुतः समर्चनीयः ॥ ४४ ॥

अङ्गाशेद्रुमाद्यैः
परिवृत्य च पायसेन सुसितेन ।

हैयङ्गवीनकदली-
फलदधिभिः प्रीणयेच्च गोविन्दम् ॥ ४५ ॥

जुहुयाद्दुग्धहविर्भि-
र्विमलैः सर्पिःसितोपलोपेतैः ।
इष्टां तुष्टो लक्ष्मीं
समावहेत्सद्य एव गोविन्दः ॥ ४६ ॥

बालं नीलाम्बुदाभं नवमणिविलसत्किङ्किणीजालनद्ध-
श्रोणीजङ्घान्तयुग्मं विपुलरुरुनखप्रोल्लसत्कण्ठभूषम् ।
फुल्लाम्भोजाभवक्त्रं हतशकटपतत्पूतनाद्यं प्रसन्नं
गोविन्दं वन्दितेन्द्राद्यमरवरमजं पूजयेद्वासरादौ ॥

वन्द्यं देवैर्मुकुन्दं विकसितकरवन्दाभमिन्दीवराक्षं
गोपीगोवृन्दवीतं जितरिपुनिवहं कुन्दमन्दारहासम् ।
नीलग्रीवाग्रपिञ्छाकलनसुविलसत्कुन्तलं भानुमन्तं
देवं पीताम्बराढ्यं यजतु च दिनशो मध्यमेऽह्नो रमायै ॥

विक्रान्त्या ध्वस्तवैरिव्रजमजितमपास्तावनीभारमाद्यै-
रावीतं नारदाद्यैर्मुनिभिरनुदिनं तत्त्वनिर्णीतिहेतोः ।
*P. 18

सायाह्ने निर्मलं तं निरुपममजरं पूजयेन्नीलभासं
मन्त्री विश्वोदयस्थित्यपहरणपरं मुक्तिदं वासुदेवम् ॥ ४९ ॥

त्रिकालमेवं प्रविचिन्त्य शार्ङ्गिणं
प्रपूजयेद्यो मनुजो महामनाः ।
स धर्ममर्थं सुसुखं श्रियं परा-
मवाप्य देहापदि मुक्तिमाप्नुयात् ॥ ५० ॥

ग्रामं गच्छन्नगरमपि वा मन्त्रजापी मनुष्यो
देवेशं तं मुखमनु मुहुस्तर्पयेद्दुग्धबुद्ध्या ।
शुद्धैस्तोयैः स तु बहुरसोपेतमाहारजातं
दद्यान्नित्यं प्रचुरधनधान्यांशुकाद्यैर्मुकुन्दः ॥ ५१ ॥

भिक्षावृत्तिर्दिनमनु तमेवं विचिन्त्यात्मरूपं
गोपस्त्रीभ्यो मुहुरपहरन्तं मनोभिः सहैव ।
लीलावृत्त्या ललितललितैश्चेष्टितैर्दुग्धसर्पि-
र्दध्याद्यं वा स पुनरमितामेति भिक्षां गृहेभ्यः ॥ ५२ ॥

ध्यानी मन्त्री मन्त्रजापी च नित्यं
यद्यद्वाञ्छन्यत्र यत्र प्रयाति ।

तत्तत्प्राप्त्वा तत्र तत्र प्रकामं
　प्रीतः क्रीडेद्देववन्मानुषेषु ॥ ५३ ॥

एवं देवं पूजयन्मन्त्रमेनं
　जप्यान्मन्त्री सर्वलोकप्रियः स्यात् ।
इष्टान्कामान्प्राप्य संपन्नवृत्ति-
　र्नित्यं शुद्धं तत्परं धाम भूयात् ॥ ५४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे सप्तदशः पटलः ॥

अष्टादशः पटलः ॥

अथ प्रणवसंज्ञकं प्रतिवदामि मन्त्रं परं
सजापमपि सार्चनं सहुतक्लृप्ति सोपासनम् ।
अशेषदुरितापहं विविधकामकल्पद्रुमं
विमुक्तिफलसिद्धिदं विमलयोगिसंसेवितम् ॥ १ ॥

आद्यस्वरः समेतो-
ऽमरेण सधसप्तमश्च बिन्दुयुतः ।
प्रोक्तः स्यात्प्रणवमनु-
स्त्रिमात्रिकः सर्वमन्त्रसमवायी ॥ २ ॥

मन्त्रस्यास्य मुनिः प्रजापतिरथ च्छन्दश्च देव्यादिका
गायत्री गदिता जगत्सु परमात्माख्यस्तथा देवता ।
अङ्गीबैर्युगमध्यगध्रुवयुतैरङ्गानि कुर्यात्स्वरै-
र्मन्त्री जातियुतैश्च सत्यरहितैर्वा व्याहृतीभिः क्रमात् ॥३॥

विष्णुं भास्वत्किरीटाङ्गदवलययुगाकल्पहारोदराङ्घ्रि-

[1]श्रोणीरूपं सवक्षोमणिमकरमहाकुण्डलामण्डिताङ्गम् ।

हस्तोद्यच्चक्रशङ्खाम्बुजगदममलं पीतकौशेयमाशा-

विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥ ४ ॥

दीक्षितो मनुमिमं शतलक्षं

संजपेत्प्रतिहुनेच्च दशांशम् ।

पायसैर्घृतयुतैश्च तदन्ते

विप्रभूरुहभवाः समिधो वा ॥ ५ ॥

सर्पिःपायसशाली-

तिलसमिदाद्यैरनेन यो जुहुयात् ।

ऐहिकपारत्रिकमपि

स तु लभते वाञ्छितं फलं नचिरात् ॥ ६ ॥

अभ्यर्च्य वैष्णवमथो विधिनैव पीठ-

मावाह्य तत्र सकलार्थकरं मुकुन्दम् ।

अङ्गैः समूर्तियुगशक्तियुगैः सुरेन्द्र-

वज्रादिकैर्यजतु मन्त्रिवरः क्रमेण ॥ ७ ॥

---

1. श्रोणीभूषं.

वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ।
स्फटिकस्वर्णदूर्वेन्द्रनीलाभा वर्णतो मताः ॥ ८ ॥

चतुर्भुजाश्चक्रशङ्खगदापङ्कजधारिणः ।
किरीटकेयूरिणश्च पीताम्बरधरा अपि ॥ ९ ॥

सशान्तिश्रीसरस्वत्यौ रतिश्चाश्रिदलाश्रिताः ।
अच्छपद्मरजोदुग्धदूर्वावर्णाः स्वलंकृताः ॥ १० ॥

आत्मान्तरात्मपरमज्ञानात्मानस्तु मूर्तयः ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्च शक्तयः ॥ ११ ॥

ज्वलज्ज्वालासमाभाः स्युरात्माद्या [1]मूर्तिशक्तयः ।
इति पञ्चावरणकं विधानं प्रणवोद्भवम् ॥ १२ ॥

इत्थं मन्त्री तारममुं जापहुतार्चा-
भेदैरङ्गीकृत्य च योगानपि युञ्ज्यात् ।
यैः संलब्ध्वा चेह समग्रां श्रियमन्ते
शुद्धं विष्णोर्धाम परं प्राप्स्यति योगी ॥ १३ ॥

---

1. शक्तिमूर्तयः.

करपादमुखादिविहीनमना-
रतदृश्यमनन्यगमात्मपदम् ।
यमिहात्मनि पश्यति तत्त्वविद-
स्तमिमं किल योगमिति ब्रुवते ॥ १४ ॥

योगाग्निदूषणपरं त्वथ कामकोप-
लोभप्रमोहमदमत्सरतेति षट्कम् ।
वैरिं जयेत्सपदि योगविदेनमङ्ग-
र्योगस्य धीरमतिरष्टभिरिष्टदैश्च ॥ १५ ॥

यमनियमासनपवना-
यामाः प्रत्याहृतिश्च धारणया ।
ध्यानं चापि समाधिः
प्रोक्तान्यङ्गानि योगयोग्यानि ॥ १६ ॥

सत्यमहिंसा समता
धृतिरस्तेयं क्षमार्जवं च तथा ।
वैराग्यमिति यमः स्या-
त्स्वाध्यायतपोऽर्चनाव्रतानि तथा ॥ १७ ॥

संतोषश्च सशौचो
नियमः स्यादासनं च पञ्चविधम् ।
पद्मस्वस्तिकभद्रक-
वज्रकवीराह्वयं क्रमात्तदपि ॥ १८ ॥

रेचकपूरककुम्भक-
भेदात्त्रिविधः प्रभञ्जनायामः ।
मुञ्चेद्दक्षिणयानिल-
मथानयेद्वामया च मध्यमया ॥ १९ ॥

संस्थापयेच्च नाड्यै-
त्येवं प्रोक्तानि रेचकादीनि ।
षोडशतद्द्विगुणचतुः-
षष्टिकमात्राणि तानि च क्रमशः ॥ २० ॥

चित्तात्मैक्यधृतस्य
प्राणस्य स्थानसंहृतिः स्थानात् ।
प्रत्याहारो ज्ञेय-
श्चैतन्ययुतस्य सम्यगनिलस्य ॥ २१ ॥

स्थानस्थापनकर्म
  प्रोक्ता स्याद्धारणेति तत्त्वज्ञैः ।
यो मनसि देवताया
  भावः स्यात्तस्य मन्त्रिणः सम्यक् ॥ २२ ॥

संस्थापयेच्च तत्रे-
  त्येवं ध्यानं वदन्ति तत्त्वविदः ।
सत्तामात्रं नित्यं
  शुद्धमपि निरञ्जनं च यत्प्रोक्तम् ॥ २३ ॥

तत्प्रविचिन्त्य स तस्मि-
  श्चित्तलयः स्यात्समाधिरुद्दिष्टः ।
अष्टाङ्गैरिति कथितैः
  पुनराशु निगृह्यतेऽरिरात्मविदा ॥ २४ ॥

अथ वा शोषणदहन-
  प्लावनभेदेन शोधिते देहे ।
पञ्चाशद्भिर्मात्रा-
  भेदैर्विधिवत्समायमेत्प्राणान् ॥ २५ ॥

*P. 18a

पञ्चाशदात्मकोऽपि च
कलाप्रभेदेन तार उद्दिष्टः ।
तावन्मात्रायमना-
त्कलाश्च विधृता भवन्ति तत्त्वविदा ॥ २६ ॥

पूर्वमिडाया वदने
विचिन्तयेद्धूम्रमानिलं बीजम् ।
तेनागतेन देहं
प्रशोषयेत्सान्तराधिकरचरणम् ॥ २७ ॥

पिङ्गलया प्रतिमुञ्चे-
त्तथैव कार्शानवेन रक्तरुचा ।
प्रतिदह्य पूर्वविधिना
मुञ्चेन्नैशाकरेण सुसितेन ॥ २८ ॥

संपूरयेत्सुधामय-
जलशीकरवर्षिणा तनुं सकलाम् ।
निर्माय मानसेन च
परिपूर्णमनाश्चिरं भूयात् ॥ २९ ॥

सुजीर्णमितभोजनः सुखसमात्तनिद्रादिकः
सुशुद्धतलसद्गृहे विरहिते च शीतादिभिः ।
पटाजिनकुशोत्तरे सुविशदे च मृद्वासने
निमीलितविलोचनः प्रतिविशेत्सुखं प्राङ्मुखः ॥ ३० ॥

प्रसारितं वामकरं निजाङ्के
निधाय तस्योपरि दक्षिणं च ।
ऋजुः प्रसन्नो विजितेन्द्रियः स-
न्नाधारमत्यन्तसमं स्मरेत्स्वम् ॥ ३१ ॥

तन्मध्यगतं प्रणवं
प्रणवस्थं बिन्दुमपि च बिन्दुगतम् ।
नादं विचिन्त्य तारं
यथावदुच्चारयेत्सुषुम्नान्तम् ॥ ३२ ॥

तन्मध्यगतं शुद्धं
शब्दब्रह्मातिसूक्ष्मतन्तुनिभम् ।
तेजः स्मरेच्च तारा-
त्मकमपि मूलं चराचरस्य सदा ॥ ३३ ॥

ओंकारो गुणबीजं
प्रणवस्तारो ध्रुवश्च वेदादिः ।
आदिरुमध्यो मपरो
नामन्यस्य त्रिमात्रिकश्च तथा ॥ ३४ ॥

अस्य तु वेदादित्वा-
त्सर्वमनूनां प्रयुज्यतेऽथादौ ।
योनिश्च सर्वदेहे
भवति च स ब्रह्म सर्वसंवादे ॥ ३५ ॥

ऋक् च तदाद्यादिः स्या-
त्तन्मध्यान्तं यजुश्च [1]मान्तादिः ।
सामापि तस्य भेदा
बहवः प्रोक्ता हि लोकवेदेषु ॥ ३६ ॥

उच्चार्योच्चार्य च तं
क्रमान्नयेदुपरि षड्द्वयान्तान्तम् ।
मनसा स्मृते यदास्मि-
न्मनो लयं याति तावदभ्यस्येत् ॥ ३७ ॥

1. ०मान्तानि । सामानि.

अथ वा बिन्दुं वर्तुल-
    मावर्तैस्त्रिभिरुपेतमेवमिव ।
प्रोतं रविबिम्बेन च
    समभ्यसेत्स्रुतसुधामयं तेजः ॥ ३८ ॥

अपमृत्युरोगपापजि-
    दचिरेण सुसिद्धिदो नृणां योगः ।
अथ वा मूलाधारो-
    त्थिता प्रभा बिसविभेदतन्तुनिभा ॥ ३९ ॥

वदनामृतकरबिम्ब-
    स्यूता ध्यातामृताम्बुलवलुलिता ।
स्थावरजङ्गमविषहृ-
    द्योगोऽयं नात्र संदेहः ॥ ४० ॥

अथ वा त्रिवलयबिन्दुग-
    धाम प्रणवेन संनयेदूर्ध्वम् ।
पीतोर्णातन्तुनिभं
    सौषुम्नेनैव वर्त्मना योगी ॥ ४१ ॥

तस्मिन्निधाय चित्तं
विलयं गमयेद्दिनेशसंख्यान्ते ।
पुनरावृत्तिविहीनं
निर्वाणपदं व्रजेत्तदभ्यासात् ॥ ४२ ॥

अथ वादिबीजमौ पुन-
रुमापि विषे तमपि संहरेद्बिन्दौ ।
बिन्दुं नादे तमपि च
शक्तौ शक्तिं तथैव शान्ताख्ये ॥ ४३ ॥

तेजस्यनन्यगे चिति
निर्द्वन्द्वे निष्कले सदानन्दे ।
सूक्ष्मे च सर्वतो मुख-
करपदनयनादिलक्षणालक्ष्ये ॥ ४४ ॥

स्वात्मनि संहृत्यैवं
करणेन्द्रियवर्गनिर्गमापेतः ।
निर्लीनपुण्यपापो
निरुच्छ्वसन्ब्रह्मभूत एव स्यात् ॥ ४५ ॥

अथ वा योगोपेताः
पञ्चावस्थाः क्रमेण विज्ञाय ।
ताभिर्युञ्जीत सदा
योगी सद्यः प्रसिद्धये मुक्तः ॥ ४६ ॥

जाग्रत्स्वप्नसुषुप्तीं
तुरीयतदतीतकौ पुनस्तासु ।
स्वैरिन्द्रियैर्यदात्मा
भुङ्क्ते भोगान्स जागरो भवति ॥ ४७ ॥

संज्ञारहितैरपि तै-
स्तस्यानुभवो भवेत्पुनः स्वप्नः ।
आत्मनिरुद्युक्ततया
नैराकुल्यं भवेत्सुषुप्तिरपि ॥ ४८ ॥

पश्यति परं यदात्मा
निस्तमसा तेजसा तुरीयं तत् ।
आत्मपरमात्मपदयो-
रभेदतो व्याप्नुयाद्यदा योगी ॥ ४९ ॥

तच्च तुरीयातीतं
तस्यापि भवन्न दूरतो मुक्तिः ।
अथ वा सूक्ष्माख्यायां
पश्यन्त्यां मध्यमाख्यवैखर्योः ॥ ५० ॥

ससुषुम्नाग्रकयोरपि
युञ्जीयाज्जाग्रदादिभिः पवनम् ।
बीजोच्चारो जाग्र-
द्बिन्दुः स्वप्नः सुषुप्तिरपि नादः ॥ ५१ ॥

शक्त्यात्मना तुरीयः
शान्ते लय आत्मनस्तुरीयान्तम् ।
अङ्गुष्ठगुल्फजङ्घा-
जानुद्वितयं च सीवनी मेढ्रम् ॥ ५२ ॥

नाभिर्हृदयं ग्रीवा
सलम्बिकाग्रं तथैव नासाग्रम् ।
भ्रूमध्यललाटाग्रसु-
षुम्नाग्रं द्वादशान्तमित्येवम् ॥ ५३ ॥

उत्क्रान्तौ परकाय-
　　प्रवेशने चागतौ पुनः स्वतनौ ।
स्थानानि धारणायाः
　　प्रोक्तानि मरुत्प्रयोगविधिनिपुणैः ॥ ५४ ॥

स्थानेष्वेष्वात्ममनः-
　　समीरसंयोगकर्मणोऽभ्यासात् ।
अचिरेणोत्क्रान्त्याद्या
　　भवन्ति संसिद्धयः प्रसिद्धतराः ॥ ५५ ॥

कण्ठे भ्रूमध्ये हृदि
　　नाभौ सर्वाङ्गके स्मरेत्क्रमशः ।
ळवरसमीरखवर्णै-
　　रनिलमहाकालवंश्वनेयं स्यात् ॥ ५६ ॥

अवनिजलानलमारुत-
　　विहायसां शक्तिभिश्च तद्विम्बैः ।
सारूप्यमात्मनश्च
　　प्रतिनीत्वा तत्तदाशु जयति सुधीः ॥ ५७ ॥

*P. 19

एवं प्रोक्तैर्योगै-
रायोजयतोऽन्वहं तथात्मानम् ।
अचिरेण भवति सिद्धिः
समस्तसंसारमोचनी नित्या ॥ ५८ ॥

इति योगमार्गभेदैः
प्रतिदिनमारूढयोगयुक्तधियः ।
सिद्धय उपलक्ष्यन्ते
मोक्षपुरीसंप्रवेशनद्वाराः ॥ ५९ ॥

कम्पः पुलकानन्दौ
वैमल्यस्थैर्यलाघवानि तथा ।
सकलप्रकाशवित्ते-
त्यष्टावस्थाः प्रसूचकाः सिद्धेः ॥ ६० ॥

त्रैकाल्यज्ञानोहौ
मनोज्ञता च्छन्दतो मरुद्रोधः ।
नाडीसंक्रमणविधि-
र्वाक्सिद्धिर्देहतश्च देहाप्तिः ॥ ६१ ॥

ज्योतिःप्रकाशनं चे-
त्यष्टौ स्युः प्रत्ययायुजः सिद्धेः ।
अणिमा महिमा च तथा
लघिमा गरिमेशिता वशित्वं च ॥ ६२ ॥

प्राप्तिः प्राकाम्यं चे-
त्यष्टैश्वर्याणि योगयुक्तस्य ।
अष्टैश्वर्यसमेतो
जीवन्मुक्तः प्रवक्ष्यते योगी ।
योगानुभवमहामृत-
रसपानानन्दनिर्भरः सततम् ॥ ६३ ॥

इत्येवं प्रणवविधिः समीरितोऽयं
भक्त्या तं प्रभजति यो जपादिभेदैः ।
संप्राप्नोत्यनुततनित्यशुद्धबुद्धं
तद्विष्णोः परमतरं पदं नराग्र्यः ॥ ६४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे अष्टादशः पटलः ॥

एकोनविंशः पटलः ॥

---*---

अथ पुनरभिवक्ष्ये मन्त्रमष्टाक्षराख्यं
सकलदुरितदुःखध्वान्तसंभेदभानुम् ।
प्रणवहृदयनारावर्णतोऽन्ते यणार्णौ
मपर इति समुद्दिष्टोऽयमिष्टार्थदायी ॥ १ ॥

तारः शक्त्युत्थतया
निर्दिष्टः सोऽहमर्थकः पूर्वम् ।
नार्णः प्रतिषेधार्थो
मोकारश्चायमर्थको भवति ॥ २ ॥

सलिलानलपवनधराः
क्रमेण नारायणाक्षराः प्रोक्ताः ।
चरमेरस्तु विभक्ति-
व्यक्त्यर्थं दर्शितस्तदर्थार्थे ॥ ३ ॥

ऋषिरस्य मनोः साध्यनारायण इतीरितः ।
छन्दश्च देवी गायत्री परमात्मा च देवता ॥ ४ ॥

अथ क्रुद्धमहावीरद्युसहस्रपदादिकैः ।
उल्कैर्जातियुतैः कुर्यात्पञ्चाङ्गानि मनोः क्रमात् ॥ ५ ॥

अष्टाक्षरेण व्यस्तेन कुर्याद्वाष्टाङ्गकं सुधीः ।
सहृच्छिरःशिखावर्मनेत्रास्त्रोदरपृष्ठके ॥ ६ ॥

अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराज-
त्केयूरं कौस्तुभाभाशबलरुचिरहारं सपीताम्बरं च ।
नानारत्नांशुभिन्नाभरणशतयुजं श्रीधराश्लिष्टपार्श्वं
वन्दे दोःसक्तचक्राम्बुरुहदरगदं विश्ववन्द्यं मुकुन्दम् ॥

संदीक्षितो मनुममुं प्रतिजप्तुमिच्छ-
न्कुर्यान्निजेन वपुषैव तु योगपीठम् ।
अंसोरुयुग्मपदमाननाभिमूल-
पार्श्वद्वयैर्विहितगात्रसमुज्ज्वलं च ॥ ८ ॥

मध्येऽनन्ताद्यैरपि
संज्ञानात्मान्तिकैर्यजेन्मन्त्री ।

पीठाख्यमन्त्रपश्चिम-

मथ गन्धाद्यैश्च सम्यगुपचारैः ॥ ९ ॥

प्रणवं हृदयं चैव प्रोक्त्वा भगवतेपदम् ।

विष्णवे च समाभाष्य सर्वभूतात्मनेपदम् ॥ १० ॥

वासुदेवाय सर्वात्मसंयोगपदमुच्चरेत् ।

योगपद्मपदं प्रोक्त्वा ततः पीठात्मने नमः ॥ ११ ॥

अक्षमन्त्रप्रबद्धाशो मन्त्रवर्णास्तनौ न्यसेत् ।

विन्यस्तैर्यैर्भवेन्मन्त्री मन्त्रवर्णात्मको हरिः ॥ १२ ॥

आधारहृद्वदनदोःपदमूलनाभौ

कण्ठे सनाभिहृदयस्तनपार्श्वपृष्ठे ।

कास्येक्षणश्रवणगन्धवहे च दोःप-

त्संध्यङ्गुलीषु हृदि धातुषु सानिलेषु ॥ १३ ॥

मूर्धेक्षणास्यहृदयोदरसोरुजङ्घा-

पादद्वयेषु लिपिशो न्यसतु क्रमेण ।

गण्डांसकोरुचरणेषु रथाङ्गशङ्ख-

श्रीमद्गदाम्बुजपदेषु समाहितात्मा ॥ १४ ॥

ततोऽष्टाक्षरपूर्त्यर्थं स्मर्तव्यो द्वादशाक्षरः ।
मन्त्रो द्वादशमूर्तीस्तु तत्प्रभिन्नास्तनौ न्यसेत् ॥ १५ ॥

अष्टप्रकृत्यात्मकश्च संप्रोक्तोऽष्टाक्षरो मनुः ।
अष्टानां प्रकृतीनां च चतुर्णामात्मनामपि ॥ १६ ॥

द्वादशानां तु संयोगो मन्त्रः स्याद्द्वादशाक्षरः ।
आदित्या द्वादश प्रोक्ता युक्ता द्वादशमूर्तिभिः ॥ १७ ॥

केशवादिप्रदिष्टानां मूर्तीनां द्वादशादितः ।
आदिस्वरयुता न्यस्येत्ताः स्युर्द्वादश मूर्तयः ॥ १८ ॥

ललाटोदरहृत्कण्ठदक्षपार्श्वांसतद्गले ।
तथा वामत्रये पृष्ठे ककुदोश्च यथाक्रमम् ॥ १९ ॥

द्वादशाक्षरमन्त्रं च मन्त्रविन्मूर्ध्नि विन्यसेत् ।
मूर्धस्थो वासुदेवस्तु व्याप्नोति सकलां तनुम् ॥ २० ॥

पुनस्तत्प्रतिपत्त्यर्थं किरीटादिमनुं जपेत् ।
किरीटकेयूरहारपदान्याभाष्य मन्त्रवित् ॥ २१ ॥

मकारान्ते कुण्डलं च चक्रशङ्खगदादिकम् ।
अब्जहस्तपदं प्रोक्त्वा पीताम्बरधरेति च ॥ २२ ॥

श्रीवत्साङ्कितमाभाष्य वक्षःस्थलमथो वदेत् ।
श्रीभूमिसहितं स्वात्मज्योतिर्द्वयमथो वदेत् ॥ २३ ॥

[1]दीप्तिमुक्ताकरायेति सहस्रादित्यतेजसे ।
हृदन्तः प्रणवादिः स्यात्किरीटादिमनुः स्वयम् ॥ २४ ॥

कृत्वा स्थण्डिलमस्मि-
न्निक्षिप्य निजासिकां समुपविश्य ।
पीठादिकं निजाङ्गं
प्रपूज्य गन्धादिभिः सुशुद्धमनाः ॥ २५ ॥

सद्वादशाक्षरान्तं
प्रपूज्य विधिवत्किरीटमन्त्रेण ।
कुर्यात्पुष्पाञ्जलिमपि
निजदेहे पञ्चशोऽथ वा त्रयशः ॥ २६ ॥

इति दीक्षितविहितविधिः
संप्रोक्तोऽष्टाक्षरस्य मन्त्रस्य ।
शुद्धानां विमलधियां
दीक्षा प्रतिवक्ष्यतेऽथ संक्षेपात् ॥ २७ ॥

---

1. दीप्तिमुक्त्वाधरायेति.

कृत्वा त्रिगुणितादीनामेकं मण्डलमुज्ज्वलम् ।
आत्मार्चनोक्तविधिना शक्तिभिः पीठमर्चयेत् ॥ २८ ॥

विमलोत्कर्षिणी ज्ञाना क्रिया योगेति शक्तयः ।
प्रह्वी सत्या तथेशानानुग्रहा नवमी तथा ॥ २९ ॥

निधाय कलशं तत्र पञ्चगव्येन पूरयेत् ।
पयोभिर्वा गवां प्रोक्तैः [1]क्वथितैर्वाष्टगन्धकैः ॥ ३० ॥

अष्टाक्षराङ्गैरष्टाष्टवर्णैरष्टाक्षरान्वितैः ।
दलमूले यजेद्भूयो वासुदेवादिकान्क्रमात् ।
सशक्तिकांस्ततो बाह्ये संपूज्या हरिहेतयः ॥ ३१ ॥

चक्रसशङ्खगदाम्बुज-
कौस्तुभशार्ङ्गाः सखड्गवनमालाः ।
रक्ताच्छपीतकनक-
श्यामलकृष्णद्युशुक्लभासः स्युः ॥ ३२ ॥

ध्वजश्च वैनतेयश्च शङ्खपद्मौ दिगाश्रिताः ।
विघ्नार्यकौ तथा दुर्गाविष्वक्सेनौ विदिग्गताः ॥ ३३ ॥

1. क्वाथैर्वा शोधितोदकैः.

ध्वजः श्यामो द्विपो रक्तो निधी शुक्लारुणप्रभौ ।
अरुणश्यामलश्यामपीता विघ्नादयो मताः ॥ ३४ ॥

इन्द्रादयस्तद्बहिश्च पूज्या गन्धादिभिः क्रमात् ।
इति विष्णोर्विधानं तु पञ्चावरणमुच्यते ॥ ३५ ॥

एवमभ्यर्चिते विष्णावुपचारैस्तु पूर्ववत् ।
अग्निमाधाय कुण्डे तु ब्रह्मयागसमीरितैः ॥ ३६ ॥

जुहुयादष्टभिर्द्रव्यैर्मनुनाष्टाक्षरेण तु ।
पृथगष्टशतावृत्त्या हुत्वा दत्वा बलिं ततः ॥ ३७ ॥

अभिषिच्य गुरुः शिष्यं प्रवदेत्पूर्ववन्मनुम् ।
द्वात्रिंशल्लक्षमानेन स तु मन्त्रं जपेत्ततः ।
तदर्धसंख्यकं वापि शुद्धाचारो जितेन्द्रियः ॥ ३८ ॥

पद्मासनः प्राग्वदनोऽप्रलापी
तन्मानसस्तर्जनिवर्जिताभिः ।
अक्षस्रजो वाङ्गुलिभिर्जपेत
नातिद्रुतं नातिविलम्बितं च ॥ ३९ ॥

प्रागीरितैरपि जुहोतु दशांशकं वा
　द्रव्यैः शुभैः सरसिजैर्मधुराप्लुतैर्वा ।
रत्नांशुकप्रवरकाञ्चनगोमहीभि-
　र्धान्यैर्यथाविभवतः प्रयजेद्‍गुरूंश्च ॥ ४० ॥

विप्रान्प्रतर्प्य विभवैरथ मन्त्रजापी
　संह्लादयेज्जपविधिं च ततः क्रमेण ।
नित्यार्चना च विहिता विधिनामुनैव
　प्रोक्तक्रमेण विदधात्वथ वात्मपूजाम् ॥ ४१ ॥

इति जपहुतार्चनाद्यै-
　र्मन्त्री योऽष्टाक्षरं समभ्यस्येत् ।
स त्वैहिकीं च सिद्धिं
　संप्राप्यान्ते प्रयाति परमपदम् ॥ ४२ ॥

अङ्गानि पूर्वं त्वथ मूर्तिशक्तीः
　सकेशवादींश्च पुरंदरादीन् ।
समर्चयेद्यस्तु विधानमेत-
　न्नरोऽचिरात्काङ्क्षितमेति कामम् ॥ ४३ ॥

यष्टव्यः स्याद्वासुदेवादिरादौ
चक्राद्याः केत्वादिकाः केशवाद्याः ।
इन्द्राद्याश्चेत्येवमेव प्रदिष्टं
तुष्ट्यायुःश्रीकीर्त्तिसिद्ध्यै विधानम् ॥ ४४ ॥

स वासुदेवादिकमर्चयित्वा
भूयो ध्वजादींश्च पुरंदरादीन् ।
क्रमेण विद्वान्विधिनार्चयीते-
त्ययं क्रमश्च त्रिदशाभिपूज्यः ॥ ४५ ॥

इत्युक्तविधिचतुष्के
पूजयितुरथैकमपि यथाशक्ति ।
अचिरेण भवति लक्ष्मी-
र्हस्तगता सकलवर्गसिद्धिकरी ॥ ४६ ॥

अष्टाक्षराक्षराष्टक-
मूर्तिविधानानि भेदभिन्नानि ।
वक्ष्याम्यर्चयितॄणां
वाञ्छितसकलार्थसाधनानि सदा ॥ ४७ ॥

सिन्दूरकुन्दकरविन्दकबन्धुजीव-
काश्मीरपद्ममकरन्दरुचः क्रमेण ।
नीलोत्पलाम्बुरुहरागसमानवर्णाः
स्युर्मूर्तयोऽष्ट कथिता मनुवर्णजाताः ॥ ४८ ॥

अरिदरगदाब्जहस्ताः
सर्वास्तु नकारमोर्णयोर्मन्त्री ।
शङ्खारिगदाब्जकरे
लक्षणमन्यत्समानरूपं स्यात् ॥ ४९ ॥

या मूर्तिरर्च्यतेऽस्य
व्रजन्ति परिवारितां तदवशिष्टाः ।
अवशिष्टेऽन्त्येऽथांशे
स्वयं च परिवारितां प्रयाति तदा ॥ ५० ॥

इयमेवावृतिरधिका
ध्रुवजे ध्रुवजात्पुरा समुद्दिष्टात् ।
भवति विधानादिति पुन-
रेषां प्रथमं विधानमुद्दिष्टम् ॥ ५१ ॥

अथ द्वितीयाक्षरतोऽङ्गतोऽन्ते[1]
वर्णाष्टमूर्तीरपि मूर्तिशक्तीः ।
यजेद्विधाने च सकेतुलोक-
पालादिकानुक्तविधानक्लृप्त्या ॥ ५२ ॥

मोकारजे रतिधृती च सकान्तितुष्टि-
पुष्टिस्मृतीरपि च दीप्त्यभिधां च कीर्त्तिम् ।
केत्वादिकं च सशतक्रतुपूर्वकं च
संपूजयेद्विमलधीः पुनरन्वितोऽन्ते ॥ ५३ ॥

नाकारजेऽङ्गतोऽन्ते
प्रपूजयेन्मूर्तिशक्तिलोकेशान् ।
रावर्णजेऽङ्गमूर्ति-
श्रीभूमायामनोन्मनीस्तदनु ॥ ५४ ॥

ह्रीः श्री रतिः सपुष्टि-
र्मोहिनिमाये महादियोगाद्ये ।
माये च तृतीयावृति-
रन्यदशेषं पुरैव निर्दिष्टम् ॥ ५५ ॥

---

1. ०जेऽङ्गतो.

यकारजेऽरिशङ्खौ च सगदाहलशार्ङ्गकाः ।
मुसलः खड्गशूलौ च तृतीया साक्षरोद्भवे ॥ ५६ ॥

शेषो वासुकितक्षक-
कार्कोटकपङ्कजमहापद्माः ।
वरपालगुलिकसंज्ञा-
स्तृतीयमन्यत्समं विधानेऽन्त्ये ॥ ५७ ॥

अङ्गैः प्रथमावरणं
मूर्तिभिरपि शक्तिभिर्द्वितीयमपि ।
अन्यैः केशवकेत्वा-
दिभ्यां स्यात्पञ्चमं च मत्स्याद्यैः ॥ ५८ ॥

मत्स्यः कूर्मवराहौ
नृसिंहकुब्जाविरामकृष्णाश्च ।
कल्किः सानन्तात्मा
पुनरमृतात्मा च षष्ठमहिपाद्यैः ॥ ५९ ॥

सप्तममपि लोकेशै-
रष्टममपि तदायुधैश्च संप्रोक्तम् ।

प्रागुक्तेषु विधाने-
ष्वालक्ष्यं नोक्तमत्र यत्तदपि ॥ ६० ॥

अष्टाक्षराक्षरविधानचतुष्कयुग्मं
प्रोक्तक्रमेण विधिनाभियजेद्य एनम् ।
भक्त्या मुकुन्दमनुजापरतो नराग्र्यः
प्राप्नोति वाञ्छितमयत्नत एव कामम् ॥ ६१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
प्रपञ्चसारे एकोनविंशः पटलः ॥